THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

THE

Kashmir Series of Texts and Studies.

No. XLIX.

THE

LAUGĀKSHI-GṚHYA-SŪTRAS

WITH

THE BHĀSHYAM OF

DEVAPĀLA.

EDITED WITH PREFACE AND INTRODUCTION

BY

PAṆḌIT MADHUSUDAN KAUL SHĀSTRĪ, M. A., M. O. L.

VIDYĀVĀRIDHI, M. R. A. S.

Superintendent Research Department,

JAMMU & KASHMIR GOVERNMENT,

SRINAGAR.

Published under the Authority of the Government of

His Highness Rājarājes'wara Mahārājādhirāja

S'rī MAHĀRĀJA HARISINGHJI BAHĀDUR,

K. C. I. E., K. C. V. O.,

MAHĀRĀJA OF JAMMU AND KASHMIR GOVERNMENT.

Volume I.

BOMBAY:

PRINTED AT THE 'NIRNAYA SAGAR' PRESS.

1928. A. D.

ॐकारो यस्य मूलं क्रमपदजटिलं यस्य च्छन्दांसि शाखा
ऋक्पत्रं साम पुष्पं यजुरुचितफलं स्यादथर्वा प्रतिष्ठा ।
यज्ञश्छाया सुशीता द्विजगणमधुपैर्गीयते यस्य नित्यं
शक्तिः सन्ध्या त्रिकालं दुरितभयहरः पातु नो वेदवृक्षः ॥

सुच्छायः स्थिरधर्ममूलवलयः पुण्यालवालान्वितो
धीविद्याकरुणाक्षमादिविलसद्विस्तीर्णशाखाश्रितः ।
सन्तोषोज्ज्वलपल्लवः शुचियशःपुष्पः सदासत्फलः
सर्वाशापरिपूरको विजयते श्रीवेदकल्पद्रुमः ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४९

लौगाक्षि-गृह्य-सूत्राणि ।

देवपालकृतभाष्योपेतानि ।

श्रीराजराजेश्वर-महाराजाधिराजकश्मीरनरेन्द्र-श्रीहरिसिंहजी-बहादुराज्ञया,

रिसर्चकार्यालयाध्यक्ष-पण्डित-मधुसूदनकौल-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन संगृह्य,

संशोधनादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

'निर्णयसागर' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतानि ।

(प्रथमो भागः)

संवत् १९८४. काश्मीर-श्रीनगर खैस्ताब्दः १९२८.

The Laugākshi-gṛhya-sūtras.

PREFACE.

The set of manuscripts, that has been principally utilised in preparing the present edition of the Laugākshi-gṛhya-sūtras of the Kāṭhaka school of the Kṛshṇa-Yajurvedins, was purchased over a decade of years ago by Mr. J. C. Chatterji, B. A. (Cantab), Vidyāvāridhi, late Superintendent of the Research Department. Edition of them could not be taken up early, as the manuscripts were almost all untrustworthy and as the Department had many other works to handle immediately. The manuscripts used herein are detailed below:

MS. A.—Belongs to the Departmental Library. Contains 135 leaves of the old type local paper of different colours, having a rectangular painting on the borders, representing an old system of decorating the Kas'mirian MSS., not in vogue at present. The first three leaves are missing. The fourth and the fifth as also the last six are mutilated. Leaf 135 is a restoration. Character Devanāgarī. Restorations are in S'āradā character. Lines in the pages vary from 19 to 23. Size 10″ X 8″. Has a country binding. Dateless. Aged about 70 years. Complete but incorrect. It ends:—

इति चारायणीयमन्त्रभाष्यं कृतिः श्रीमदाचार्यवर्य-स्वामिभट्टारकहरिपालपूज्यपादानाम् (?) । ॐतत्सत्परब्रह्मणे नमः ॥

MS. B.—Belongs to the late Pandit Sahaja Bhatta of Srinagar. Condition fresh. Incomplete towards the end. Incorrect. Bears no date. Contains 135 leaves. Lines per page 27 to 31. Written on local paper. Character S'āradā. Size 6″ X 8.″

Begins :—

ॐ श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ नमो नरहरिं घोरदंष्ट्रानखरदारुणम् । सन्मार्गोत्सादिदुर्दान्तदैत्यनिर्मूलनोद्यतम् ॥ &c; &c.

Abruptly ends with:—

रुद्राञ्जपेत् ॥ ततो रुद्राभिधानान्षडनुवाकाञ्जपेत् ॥ जीववत्सायाः पयस्विन्याः पुत्रमेकरूपं द्विरूपं वा यो वा यूथं च्छादयेत् । यूथे च तेजस्वितमः......।

Here and now I take the opportunity to thankfully acknowledge the help of Mr. R. L. Kanjilal, M. A., Vedāntatīrtha etc., Senior Professor of Sanskrit, S'ri Pratap College, Srinagar, who favoured me with the loan of his transcript of the Devapāla and to record my appreciation of the hard and intelligent work of, and the scholarly suggestions given ungrudgingly and with pleasure by, Mahes'vara Rājānaka and Raghunātha Zādoo, Pandits of the Department.

S'RINAGAR, KMR.
30th Nov. 1927.

MADHUSUDAN KAUL.

INTRODUCTION.

The Gṛhya-sūtras, or the ceremonial formulas, compiled by Laugākshi for the benefit of the followers of the Kāṭhaka School of the Black Yajurveda, which were once in wide currency among the Brahmanas of Kas'mir and around which sprang up a vast literature in Sanskrit and which even till today govern the life of a twice-born from before his conception to the time he joins the manes, are preserved, after escaping various ravages both human and natural, in the three ancient works. These are:—

(1) Vivaraṇa of the Laugākshi-gṛhya-sūtras by Āditya Dars'ana.

(2) Pañchikā, or Paddhati, of the same by Brāhmaṇabala, son of Mādhavādhvaryu.

(3) Bhāshyam of Devapāla on the Sūtras and the mantras connected with them.

VIVARAṆA

Among the works referred to above, the earliest is that of Āditya Dars'ana. It is a brief gloss of the Laugākshi-gṛhya-Sūtras and not that of the Pañchikā. He expressly mentions in his Vivaraṇa* that he undertakes the writing of a gloss on the gṛhya-sūtras. Pañchikā is later than Vivaraṇa and is, in my opinion, not a commentary but a manual, pure and simple, giving rules and regulations regarding rites and ceremonies of the

---

* प्रायेण मन्त्रविवृतौ विवृतं मयेदं गृह्यं तथापि बहुभिः शबलीकृतत्वात् ।
स्पष्टं सुयुक्ति लघुवाक्यविदामभीष्टमिष्टं चिकीर्षुरहमत्र पुनर्विविचिन्त्रम् ॥

Page 1, Departmental transcript, No. 90.

व्याख्यातमेतद्बहुभिः प्रगल्भैर्निर्युक्तिकं किञ्चिदबुद्धमस्ति ।
सुयुक्तिकं चापि सुबोधमेतद्व्याख्यातमस्माभिरतः क्षमध्वम् ॥

Page 131, ibid.

followers of the Kāṭhaka school. The name Pañchikā, as applied to the work in question, denotes nothing but a detailed treatise. As such, it supplements the information obtainable from the Laugākshi-gṛhya-Sūtras with additional instructions from the pertinent quotations from other gṛhya-sūtras of the Kṛshṇa Yajurveda and even goes for help to the Smṛtis, Purāṇas and what not. One would, if he were told to look upon the Pañchikā as a commentary, feel at a loss to understand what necessity Āditya Dars'ana felt for writing a Vivaraṇa which is a mere gloss when there was the Pañchikā already in use for the gṛhya-sūtras of Laugākshi and how the Pañchikā could refer to its own glossator.*

Date and parentage of Āditya Dars'ana.

The name of the father of Āditya Dars'ana was Veda Dars'ana.† He (Āditya Dars'ana) was a pupil to Mādhavarāta. As he happens to directly refer to the customs and rites of the Kas'mirian Brahmaṇas not infrequently, it is reasonable to hazard that Āditya Dars'ana was a Kas'mirian both by birth and actual residence. His date of birth cannot be far removed from the middle of the Mohamedan period of the Kas'mir history as his depiction of the sad tale of the contemporary Kas'mirian priests‡ cannot otherwise be

---

* Cf. प्र वां दंसांसीति मण्डपानाम् ॥ १४ ॥
ब्र० ।........................सेतुप्रतिष्ठायामिति आदित्यदर्शनभाष्यम् ॥
Page 284, Caland's Edition, Kāṭhaka Sūtras.

† यो वेददर्शन इति द्विजवर्गमुख्यः सत्यार्जवाशयविशुद्धगुणैः प्रसिद्धः ।
आस्तिक्यनिर्मलमतिर्विहितानि चक्रे चारायणीयचरणैकगुणः प्रदाता ॥
तस्यात्मजो विगतमत्सरमानसानां मन्त्रार्थतत्त्वविदुषां जयनिन्द्रियाणि ।
श्लाघ्यः श्रुताभिजनमाधवरातशिष्य आदित्यदर्शन इमां विवृतिं व्यधत्त ॥
Pākayajñavivṛti, Dept. MS. No. 96, leaf. 21.

‡ Cf. इहैते च्छान्दसाः प्रायः etc. etc., Page 8, Introduction.

acceptable. For, we know from the following quotations from the S'rîkanṭhacharita of Maṅkha Kavi (c. 1300 A. D.) and the Stuti-kusumānjali of Paṇḍita Jagaddhara Bhaṭṭa (c. 1500 A. D.) that even in the day of these writers the land of Kas'mir could boast of a number of Vedic scholars and experts in the Pūrva-mīmāṃsā school.

"S'rì Trailokya who was, as it were, the second Kumārila Bhaṭṭa, expert in subtle reasoning and yet well-versed in the art of poetry."*

"Lakshmî Deva who, by virtue of the right performance of the Vedic rituals, made the recitation and knowledge of the Vedas fruitful."§

"Gauradhara, whose clear exposition of the Yajurveda called Vedavilāsa, displays his wonderful and world-famous knowledge of the Scriptures."¶

Pañchikā.

The Pañchikākāra, Brāhmaṇabala, does not refer to Devapāla and, therefore, it is probable that he might have lived before him. Assertion of the name of the author of the Pañchikā is based on the manuscript

---

* दृढोऽपि तर्ककार्कश्ये प्रगल्भः कविकर्मणि।
यः श्रीतुतातितस्येव पुनर्जन्मान्तरग्रहः ॥ ६५ ॥
तं श्रीत्रैलोक्यं.......................... ।
....॥ ६६ ॥ canto 25.

§ धिन्वन् पवित्रचारित्रो विश्वामित्र इव त्रयीम् ।
पाठबोधावनुष्ठानसौष्ठवेन पुनाति यः ॥ ८९ ॥
.... ।
लक्ष्मीदेवः............................॥ ९१ ॥ ibid.

¶ ....।
.......................गौरधरः किलाग्रणीः ॥ १ ॥
....।
ऋजुर्यजुर्वेदपदार्थवर्णना व्यनक्ति यस्याद्भुतविश्रुतं श्रुतम् ॥ ३ ॥
39 Stotra.

evidence given by Dr. Caland in his edition of the Kāṭhaka-sūtras. The manuscript of the Departmental Library is entirely silent as to the name of the author. On comparison I have found that the Paddhati of Brāhmaṇabala is identical with the Pañchikā. Therefore, I also attribute the authorship of the Pañchikā to Brāhmaṇbala.

Adhyāya division of the Sūtras.

As I have had my attention confined chiefly to the Bhāshyam of Devapāla, such as is available in my manuscript of the said work, and as he says nothing with regard to the Adhyāya division of the sūtras, I could not give the division into Adhyāyas of the sūtras indicated by Brāhmaṇabala. Devapāla relates only this much that Laugākshi composed a work in the sūtra form of which the first thirty-nine Adhyāyas dealt with the Vaitānika or the S'rauta ceremonies and the rest with the gṛhya.*

Kāṇḍikā division.

The works that I could lay my hands upon do not furnish any direct clue as to the division of the sūtras by giving a colophon at the end of each Kāṇdikā or chapter. It is specially so with regard to the Bhāshyam of Devapāla. The MSS. of the Vivaraṇa and the Pañchikā give the chapter numbering here and there. By following the method of the Pañchikā, that invariably gives at the beginning of its manual of each ceremony all the sūtras in extenso governing that ceremony, and that of Devapāla who comments upon Mantras used in each chapter at its end, the way is found out to determine the Kāṇḍikā division of the sūtras. Devapāla refers to the name of the chapter by the word Kāṇḍikā more than once.†

---

* See Devapāla Bhāshyam, Vol. I, Page 1, line 14.

† See pages 83 and 277, Devapāla Bhāshyam.

Devapāla's Bhāshyam.

The Bhāshyam of Devapāla owes its origin to the need that the author felt for giving in one place, for the facility of the reader, an interpretation both of the sūtras and of the Mantras of which the application was required by the former. Although the MS. in my possession of his work, on account of various mistakes, presents him in very bad colours, yet an impartial study reveals that he was better acquainted with the Vedic literature and had more material at his disposal for doing the task, than other known Vedic commentators. While discussing the formation of the word Kṛchchhra* he quotes a sūtra from the Chārāyaṇi-sūtras, a grammatical work belonging to the class of Prātis'ākhyas, which are not extant now. He makes use of aphorisms from the Pūrvamīmāṃsā, showing forth thereby his wide familiarity with that school of the Indian philosophy. He criticises here and there the interpretations of the sūtras by his predecessors, referring to Āditya Dars'ana by name and others by the words 'kechit' and 'anye.'†

Birthplace and parentage of Devapāla.

One of the colophons‡ of the Bhāshyam indicates that Devapāla was a native of Jullundhar (either because of his own birth or because of the birth of his forefathers) and lived at the time of composing the present Bhāshyam in Jayapura.$ His father was called Haripāla and his grandfather Bhaṭṭa Upendra.|| While

* See Devapāla Bhāshyam, Page 101, line 17.

† See Devapāla Bhāshyam, pages 135, 139, 185, 195. etc.

‡ See Devapāla., page 302.

$ Does it stand for the present Zovur—a village towards the south-east of S'rīnagar, about 7 miles from the Rājgaṛh Palace?

|| See the colophon Page 302.

recording the tradition preserved in his family in connection with the Sacred Thread Ceremony he tells that Haripāla was proficient* in the Vedas.

Other works of Devapāla.

Devapāla, we learn from the Laugākshi-gṛhya-sūtra-Bhāshyam, composed also a commentary on the Yoga-sūtras of Patañjali† and a hymn in praise of Vishṇu.‡ These both are yet unavailable.

Laugākshi-sūtras variously named.

The Laugākshi-gṛhya-sūtras under edition are known by different names, *i. e.* Kāṭhaka-gṛhya-sūtras, Charaka-gṛhya-sūtras, Chārāyaṇīya-gṛhya-sūtras. It is so because the school of the Black Yajurveda to which the sūtras relate also bears the name of Kaṭha, Charaka and Chārāyaṇīya. There was, it seems, practically no difference between the readings, coming as they did from the same teacher, of the Black Yajurveda prevalent among these minor branches of the Charaka school founded by the pupils of the teacher Vais'ampāyana alias Charaka, born in Ālambi, one of the eastern countries of India.$ It is also on account of this close

---

* See page 51, Devapāla.

† See Dovapāla page 16.

‡ See page 60, ibid.

$ हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू ।
उलपेन चतुर्थेन कालापकमिहोच्यते ॥
आलम्बिश्चरकः प्राच्यां पलंगकमलावुभौ ।
ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे ॥
श्यामायन उदीच्येषु उक्तः कठकलापिनोः ।
चरक इति वैशम्पायनस्याख्या । तत्सम्बन्धेन सर्वे तदन्तेवासिनश्चरका इत्युच्यन्ते ॥
Kās'ikā, page 352 (Pūrvārdha, edi. Caukhambā Series).

तत्र आलम्बिर्नाम प्राच्यां देशः । तत्र उत्पन्नश्चरकः ॥

Kās'ikā Nyāsa, (edi. Gaudagranthamālā), page 1007, line 22.

affinity of these minor branches that Pāṇini refers in the singular number to Kaṭha and Charaka.*

Text and commentaries intermixed.

It is a very sad thing indeed not to find the sūtras in isolation from the expository texts. It, therefore, defies the attempt even of the most vigilant reader at distinguishing between each sūtra and its commentary. Quotations also, as often as not, run into the portions of the commentary in such an inextricable manner that it is difficult to say where the former ends and the latter begins. It is with the help of numerous reference books now available on the Vedic literature that I could rectify mistakes in the quotations by tracing them to their sources.

Negligence of the priests.

The regrettable condition in which the sūtras have for centuries been lying is partly due to the negligence shown by those custodians of the sacred literature, who officiated at sacrifices. For this breach of their duty, they have received a well-merited condemnation at the hands of Āditya Dars'ana. In his treatise of the food sacrifices called Pāka-yajña-vivṛti he opines:

"All the officiating priests are, as a rule, found devoted to the superficial reading of the Vedas. They never try to learn the meaning of a syllable from them. They think that their object of life is gained simply through the mere muttering of the Mantras, and are, like the autumnal clouds, fruitlessly uproarious in their hearth. They carry on their conversation with one another saying—'Why to bother ourselves with the meaning of the scriptural texts?' and cut jokes at those who take to the critical study of the Vedas in right earnest. Not knowing the meaning of the Mantras,

---

* कठचरकाल्लुक् । Ashtādhyāyi, (IV, 3, 107).

they undertake in a careless manner the religious performances, such as are only within the competence of the learned, leading to the undesirable consequences. Some of them after having a very imperfect knowledge of this or that Brāhmaṇa, pose for the learned and engage themselves eternally in the sacrificial performances."*

In his Bhāshyam of the Laugākshi-gṛhya-sūtras, Devapāla confirms the aforesaid opinion of Āditya Dars'ana saying that the thread of tradition regarding the structure and the meaning of the Mantras of the Yajurveda (S'atādhyayana)† was broken for long.‡

How the length of each sūtra was determined?

Even though the sūtras had a host of commentaries long before Devapāla thought of furnishing one of his own, inter-connexion of the individual sūtras and the determination of the length of each sūtra in the case of the present sūtras remained for a long time, as he says, a matter of controversy. Some commentators linked a particular sūtra with the preceding and some

---

* इहैते च्छान्दसाः प्रायः सर्वे वेदमधीयते ।
पदमप्येकमेतस्मान्न बुध्यन्ते कदाचन ॥
पाठमात्रेण वेदस्य मन्यमानाः कृतार्थताम् ।
गर्जन्ति श्रोत्रियाः गेहे निष्फलं शरदभ्रवत् ॥
अर्थेन किं नो वेदस्य वदन्ति इति ते मिथः ।
अर्थज्ञानसमासज्ज्ञानर्थज्ञान्विहसन्ति च ॥
अर्थमप्रतियन्तश्च प्रारभन्तेऽप्रदक्षिणम् ।
विद्वत्साध्यानि कर्माणि विपरीतार्थसिद्धये ॥
ब्राह्मणं किञ्चिदेवाथ ज्ञात्वा यादृशतादृशम् ।
अपरे पण्डितंमन्याः कुर्वते सततं क्रतुम् ॥" etc. etc.

Pākayajñavivṛti, Ms. No. 96 (of our Dept.) leaves, 21–22. See also page 2, Intro.

† "एकशतमध्वर्युशाखाः etc. etc."

Page, 65; Mahābhāshyam (Nirṇaya Sāgar edi.)

‡ See Page 251, Devapāla Bhāshyam.

with the following.* In constructing the text of each sūtra I have kept in view that the sense of each sūtra was complete in itself and only that portion of the textual words was taken as forming one individual sūtra which was accompanied with the Bhāshyam of Devapāla.

The author of the sūtras has adopted a device throughout of quoting the Mantras from the Kāṭhaka school by the initial words and those of other schools in toto. Only such readings of the Mantras have been retained in the edition as were commented upon by Devapāla.

The Sūtrakāra.

I have purposely given the name of the author, along with that of the S'ākhā, of the sūtras firstly because the tradition in Kas'mir associats them with Laugākshi as their author, secondly because Aparārka† and other lawgivers quote the sūtras under his authorship and lastly because the name of Laugākshi occurs in combination with authors of other gṛhyas such as Gobhila, etc.. in the S'lokatarpaṇa of Agastya‡ which is much in use in Kas'mir even now. Laugākshi is the Kas'mirised form of Laukākshi which figures in the

---

* See Devapāla Bhashyam, page 78, lines 2–4; also page 133, ibid.

† See Yājñavalkya Smṛti with commentary by Aparārka, (Edi. Anandas'rama Series), Vol. I. pages 28, 29 etc. etc.

Also see Pārās'ara Dharma Saṁhitā, (edi. Bombay Sanskrit Series No. XLVIII), vol. I, part II, pages 21, 26, 27 etc. etc.

‡ लौगाक्षिश्च तथा काण्वस्तथा भागुरिरेव च । एते मे० ।
गर्गगौतमगार्गीया गालवो गोभिलस्तथा । एते मे० । etc. etc.
MS. Yajurveda Tarpaṇa Khaṇḍa, leaf 5.

Kās'ikā* (650 A. D.) and the Nyāsa (700-750 A. D.). Both Vāmanajayāditya, the joint authors of the Kās'ikā, and Jinendrabuddhi of the Nyāsa mention him as a son of Lokāksha. He had a large number of pupils who were called Laukākshas.

Works.

Other works of Laugākshi known through the internal evidence are:—

1. S'rautasūtras of Kāṭhaka school.
2. Gṛhyapaddhati (a metrical work.)
3. Laugākshismṛti.

Modernity and kinship with other sūtras.

Some of the Laugākshi-gṛhya-sūtras are in a full-fledged s'loka form and assume more or less the tinge of modernity.† They are mostly akin to the Mānavagṛhyasūtras and the Vārāhagṛhyasūtras. Their mutual resemblance is so great that the identity in some cases is found not only in the sense but also in the verbal form used to express the sense. The following parallel passages are given from the above Gṛhyasūtras to illustrate their mutual kinship:—

* See Sūtra VI, 2, 37—"कार्तकौजपादयश्च" etc.

लोकाक्षेण प्रोक्तमधीयते लौकाक्षाः । लौकाक्षस्य वाऽपत्यं लौकाक्षिः । तस्य छात्रा लौकाक्षाः । Kâs'ikā (edi. Chaukhambā Series), Pages 174–176. Part II. Also see page, 347. (Kās'ikā Nyāsa, Vol. II, part II, Gauḍagranthamālā).

† See Devapāla Bhāshyam, sūtra 33, page 13, also pp. 102–105.

(1) LAUGĀKSHI.	(2) MĀNAVA.	(3) VĀRĀHA.
उपनयनप्रभृति व्रतचारी स्यात् ।		
मार्गवासाः etc. to सप्तमुञ्जां	same.	same.
मेखलां धारयेत् ॥५॥ न रथ-		
मारुहेत् ॥ १६ ॥ न मुषितां	same.	same.
प्रेक्षेत्	न मुषितां स्त्रियं प्रेक्षेत ।	nil.
छन्दस्यर्थान् बुद्ध्वा स्नास्यन्	छन्दस्य… …आचा-	छन्द……
गां कारयेदाचार्यमर्हयेत् ॥ १ ॥	र्यमर्हयेच्छ्रोत्रियः ॥	……अर्हयेत् ॥
श्रोत्रियोऽन्यो वेदाध्यायी ॥२॥	अन्यो वेदपाठी न तस्य	
न तस्य स्नानम् ॥ ३ ॥	स्नानम् ॥	षडर्घ्यार्हा
षडर्घ्यार्हा भवन्त्याचार्य ऋत्वि-	षडर्घ्या भवन्त्यृत्विगा-	भवन्त्यृत्वि०
ग्राजा विवाह्यः प्रियः स्नातक	चार्यो विवाह्यो राजा	…………
इति ।	स्नातकः । प्रियश्चेति ॥	…………
		प्रियश्चेति ॥
तस्मा असिपाणिर्गां प्राह ॥२५॥	असिपाणिर्गां प्राह । हतो	असिपाणिर्गां प्रा-
तां शास्ति ॥१६॥ मम चामु-	मे पाप्मा पाप्मानं मे	ह । हतो मे पाप्मा
ष्य च पाप्मानं जहि हतो मे	हत । ॐकुरुत इति प्रे-	पाप्मानं मे हत ।
पाप्मा पाप्मानं मे हत ॥ १७ ॥	ष्यति । चतुरो ब्राह्मणान्	ॐ कुरुतेति संप्रे-
ॐ कुरुतेति ॥ १८ ॥ चतुरो	नानागोत्रान् भोजयेत् ॥	ष्यति । चतुरवरा-
नानागोत्रान् ब्राह्मणान्भोज-		न्ब्राह्मणान् नाना-
येत् ॥		गोत्रान् etc.

The Gṛhya ceremonies, with which the first forty kāṇḍikās of the Laugākshi sūtras presented in this volume deal, are described in brief in Sanskrit in the list of contents. In the introduction to the volume II of the present Gṛhyasūtras which is in press, I will refer at length, it is hoped, to the domestic ceremonies which are even now performed in Kas'mir and which have fallen into disuse and are now only traceable in certain vernacular words of Kas'mir.

List of Abbreviations used in the Laugākshi-Gṛhya-Sūtras.

पात०	=	पातञ्जलयोगसूत्र
म० or मनु०	=	मनुस्मृति
दक्षस्मृ०	=	दक्षस्मृति
संवर्त०	=	संवर्तस्मृति
या० प्रा०	=	याज्ञवल्क्यस्मृति, प्रायश्चित्तभाग
लिंगपु०	=	लिंगपुराण
भ० गी०	=	भगवद्गीता
बृ० आ०	=	बृहदारण्यक
पा० वा०	=	पाणिनिसूत्र-वार्तिक
ऋ०	=	ऋग्वेद
क० शा०	=	कठशाखा
तै० आ०	=	तैत्तिरीय-आरण्यक
श्वेत०	=	श्वेताश्वतरोपनिषद्
मु०	=	मुण्डकोपनिषद्
तै०	=	तैत्तिरीयसंहिता
तैत्ति०	=	तैत्तिरीयोपनिषद्
पा० सू०	=	पाणिनिसूत्र
पू० मी०	=	पूर्वमीमांसा
का०	=	काण्डिका

Vol. I.

विषयसूची. (List of Contents.)

काण्डिका.	विषयः	पृष्ठ.
१	ब्रह्मचारिव्रतानि	१—६६
२	तस्याग्नीन्धनेतिकर्तव्यतादि	६७—७५
३	समावर्तनम्	७७—८६
४	चातुर्वैदिकव्रतप्रतिनिधिभूतसंवत्सरनिर्वर्त्यव्रतम्	८७—१००
५	कृच्छ्रम्	१०१—१०६
६	तप्तकृच्छ्रम्	१०७—१०८
७	सान्तपनम्	१०९—११०
८	व्रतोपायनम्	१११—१२८
९	उपाकरणम्	१२९—१५३
१०	उपनिषदर्हाः	१५४—१५५
११	वास्तुनिर्मापणम्	१५६—१६०
१२	वास्तुप्रवेशः	१६१—१६४
१३	पाकयज्ञाः	१६५—१६८
१४	कन्यावरणम्	१६९—१७२
१५	ब्राह्मविवाहः	१७३—१७७
१६	आसुरविवाहः	१७८—१७९
१७	कन्यासंस्कारः	१८०—१८३
१८	अलक्ष्मीनिर्णोदनम्	१८४—१८५
१९	हविष्यकल्पः	१८६—१८८
२०	हविष्यपुण्याहः	१८९—१९०
२१	विवाहपूर्वदिने महानिशायामग्न्यादिदेवतायजनम्	१९१—१९२
२२	ब्राह्मणभोजनमङ्गलगानपूर्वकमग्न्यादिदेवताय-जनम्	१९३—१९६

काण्डिका.	विषयः	पृष्ठ.
२३	वरस्य श्वशुरगृहप्राप्तये प्रास्थानिकं कर्म	१९७—२०१
२४	अर्घ्यदानम्	२०२—२१७
२५	विवाहः	२१८—२७७
२६	भर्तृगृहप्रस्थिताया रथचक्राद्यनुमन्त्रणरथारोहणे	२७८—२८६
२७	नदीतरणम्	२८७—२९०
२८	वधूवरयोर्गृहप्रवेशः	२९१—२९९
२९	तयोः सहाशनम्	३००—३०२
३०	गर्भाधानम्	३०३—३०७
३१	सीमन्तोन्नयनम्	३०७—३१३
३२	पुंसवनम्	३१३—३१६
३३	सुखप्रसवाय सोष्यन्तीसवनम्	३१७—३१८
३४	जातकर्म	३१८—३२७
३५	बालकसूतिकयोः रक्षार्थं होमाः	३२८—३२९
३६	नामकरणम्	३३०—३४३
३७	आदित्यदर्शनम्	३४४—३४८
३८	चन्द्रदर्शनम्	३४९—३५१
३९	अन्नप्राशनम्	३५२—३५४
४०	चूडाकरणम्	३५४—३६४

शुद्धिपत्रम् (Corrigenda.)

पृ०	पंक्ति	शुद्धम्	अशुद्धम्
१	५	काण्डिका	कण्डिका
७	१३	र्थं रथवाक्यं वर्णयन्ति	र्थं वर्णयन्ति
१४		Omit line २१	
१५		Omit lines १ & २	
१५	१७	जगती चेति विज्ञेयाश्छ	जगती जयदेवस्य च्छ
१५	१८	मानेन	माणेन
१५	१९	हिताश्च	हिताः
१७	१	देवपाल	देपवाल
२८	५	योग्यतं	योग्यतां
३४	१३	सारयितुं	सारितुं
३७	१७	निःसार	निसार
४२	१६	घृतश्चुतः	घृतश्वतः
४६	२२	स्मार्ते–	स्मार्तें
५२	१५	अपः	आपः
५३	५	आचामेदिति	आचमेदिति
६१	१	रविरसि	रविरपि
६२	२४	आपस्तम्बं	आपस्तम्भं
६४	६	शौनकं	शौनक
६४	२१	पर्वतेभ्यः	पवर्तेभ्यः
७७	४	बुद्ध्वा	बुद्धा
८७	१८	स्वर्थेष्वथ	स्वर्थेष्यथ
८९	८	व्यतिरेकेणा	व्यतिरेकेया
९३	३	येभ्यो वृक्षेभ्य	येम्यो वृक्षेम्य
९८	१४	मेधां	मेधा
१०७	१	कृच्छ्र	कृच्छ
१३१	११	यजुःषु	यजुषुः
१३१	१३	समाप्तिः	समाप्ति

पृ०	पंक्ति	शुद्धम्	अशुद्धम्
१३८	४	सुरभीणि	सुरभीनि
१३९	१४	दस्तमसि	धस्तमसि
१४१	१	अनुष्टुभो	अनुष्टभो
१७३	५	ब्राह्मेण	ब्राह्मेन
१७४	१६	प्रोदगग्रान्दर्भा	प्रोदग्रान्दभा
१७७	८	सन्नमयामः	सन्नयामः
१९४	२०	कृच्छ्रेषु	कृच्छेषु
१९७	३	स्थानिकं	स्थानिक
२२०	१	गृह्य	गृह्म
२२७	१३	बद्ध्वा	ब ा
२३१	१८	तानानां	तानां
२३२	९	षड्गाण्ये	षड्गान्ये
२५०	१५	कीदृशः सः	कीदृशः स
२६७	१३	दीर्घायुरस्तु	दीर्यायुरस्तु
२६९	३, ६	ज्ञाति	ज्ञान्ति
३०९	१५	दीर्घायुरस्या	दीर्यायुरस्या
३१८	१०	जातकर्म	नामकर्म
३२१	१४	सम्पधेमहि	सम्पधेमहे
३२४	११	मिश्रैरहोमिः	मिरश्रैहोमिः
३३८	२	देहि	धेहि
३४३	१	धिजायसे	भिजायसे
३४३	१६	ते अपि	तेऽपि
३४७	९	मर्त्यस्तव	मत्यस्तवं
३५७	१९	ताम—	ताम
३५८	१७	सूर्यस्य	सूयस्य

अथ

काठके चरकशाखायां

लौगाक्षिगृह्यसूत्राणि ।

देवपालकृतभाष्योपेतानि ।

प्रथमा कण्डिका ।

नमो नरहरिं घोरदंष्ट्रानखरदारुणम् ।
सन्मार्गोत्सादिदुर्दान्तदैत्यनिर्मूलनोद्यतम् ॥ १ ॥

अवावरीं धीतिमिरस्य पीवरीं
संसारसिन्धोः परमार्थद्दश्वरीम् ।
सुधीवरीं सत्पुरुषार्थसंपदां
नमामि भक्त्या परया सरस्वतीम् ॥ २ ॥

पितुः श्रीहरिपालस्य नुत्वा पादौ निबन्धनम् ।
समन्त्रकाठगृह्यस्य देवपालोऽभिधास्यते ॥ ३ ॥

एकोनचत्वारिंशताध्यायैर्वैतानिकानि कर्माणि प्रतिपादितानि । सांप्रतं गृह्याग्निसाध्यानि कथ्यन्ते । यद्यपि गृह्यानुष्ठानपूर्वाणि वैतानिकानि, तथापि प्रत्यक्षविधिमूलत्वात् सूत्रकृता पूर्वं प्रतिपादितानि । ततो विध्युद्देशवाक्यत्वेन निकटतरत्वादर्थवादानां तद्ग-

म्यं व्रताद्यं विधाय, मन्त्रवर्णगम्यान् संस्कारान् वक्ष्यति । तत्र त्रैवर्णिकानां कृतविवाहानां गृह्यकर्मण्यधिकारः । विवाहोऽप्यधीतवेदस्य

'वेदमधीत्य स्नात्वा भार्यामधिगच्छेत् ।'

इत्यादिस्मृतेः । अध्ययनमप्युपनीतस्य ब्रह्मचारिणः । तत्रोपनयनं वक्ष्यति । संस्कारव्रतानि तावदाह

उपनयनप्रभृति व्रतचारी स्यात् ॥ १ ॥

व्रतशब्दो यमनियमवाचकः । तत्र प्रसक्तिप्रतिषेधात्मका यमाः अमांसभक्षणादयः । नियमास्तु अप्राप्त्यङ्गपरिपूरका भैक्षवृत्त्यादिविषयाः ।

'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः' यमाः ।

(पात० २ पा० ३० सू०)

'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि' नियमाः ।

(पात० २ पा० ३२ सू०)

इति तु यमा नियमाश्च तैरुक्तास्तेऽपि यथासंभवमिह निर्धार्यन्ते । उपनयनादारभ्य आ वेदाध्ययनपरिसमाप्तेर्व्रतचरणशीलो भवेत् ॥१॥

मार्गवासाः ॥ २ ॥

स्यादित्यनुषङ्गः । उत्तरत्रापि योज्यमेवैतत् । मृगस्येदं मार्गं सामान्यशब्देनाप्यैणस्येति विशेषो वक्ष्यमाणत्वात् । वस्ते आच्छादयतीति वासः परिधानम् । तच्च मृगचर्म, मार्गं वासो यस्येति मार्गवासाः स्यात् ॥ २ ॥

संहृतकेशः ॥ ३ ॥

हन्तिर्हिंसाकर्मा । सम्यक् क्षुरेण नतु कर्तर्यादिना अपसारिताः केशा यस्य मुण्डितशिरा इत्यर्थः, तेन मुण्डनेन वक्ष्यमाणेन पौनरुक्त्यमित्याहुः । अथवा संहृता एकरूपाः केशा यस्य सः । एतदुक्तं भवति 'मुण्डो जटिलो शिखी वा' इति वक्ष्यति, तत्रैकस्य त्रैवर्णिकस्य ब्रह्मचारिणः कालभेदेन विकल्पनिवृत्त्यर्थं नियमाभिधानमेतत् एकरूपा एवैकैकेन केशाः कर्तव्याः, जटी चेन्न मुण्डी शिखी वेति । एवं मुण्डादिषु ॥ ३ ॥

भैक्षाचार्यवृत्तिः ॥ ४ ॥

भिक्षाणां समूहो भैक्षम् । आचार्यस्तु

'उपनीय तु यः शिष्यम्' (मनु० २ अ० १४० श्लो) इत्यादिलक्षणः । भैक्षेणैव ब्रह्मचारिणा शरीरं संधारणीयमिति नियमः । आचार्याधीना चास्य वृत्तिः स्थितिरूपा शरीरपोषणरूपा च स्यात् । आचार्यो हि प्रेर्य कांश्चिद्भिक्षां दापयतीत्याचार्येणापि तस्य शरीरपोषणलक्षणा वृत्तिरन्यचेष्टावदुपपद्यते, अन्यतो वा कदाचिद्भैक्षस्यालाभे आचार्य एव भोजनादिकं ददातीति ॥ ४ ॥

सशल्कदण्डः ॥ ५ ॥

इह सामान्याभिधानेऽपि दण्डः पालाशादिः यथायथं वक्ष्यमाणः । सह शल्केन त्वचा वर्तमानो दण्डो यस्य स सशल्कदण्डः स्यादित्यनुषङ्ग एव ॥ ५ ॥

सप्तमुञ्जां मेखलां धारयेत् ॥ ६ ॥

सप्तभिर्मुञ्जव्यक्तिभिस्त्रिवृत्त्यावृत्तीभवति तां मेखलां धारयेत् । अत्र मेहनसंबन्धिनः खस्य माला मेखलेति निर्वचनं कुर्वन्ति । मयूरव्यंसकादित्वात्साधु किल । मिह सेचने,

मिह्यते सिच्यते वीर्यादिकमनेनेति मेहन-मानन्देन्द्रियं तस्योपरि नाभेरधोभागे यत्स्वं तस्य माला ॥ ६ ॥

न मधुमांसे अश्नीयात् ॥ ७ ॥

माक्षिकं मांसं न भक्षयेदिति तृप्त्यर्थ-तया प्रसक्तस्य प्रतिषेधः । मधु मद्यमपि तत् क्षत्रियवैश्ययोर्निषिध्यते इत्युपाख्यान-मेकीयम् । तन्न, प्रसक्त्यभावात्

'तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ।'

इति त्रयाणामपि न निषेधः स्यात् ॥ ७ ॥

क्षारलवणवर्जी ॥ ८ ॥

क्षारं च तल्लवणमौषरं सामुद्रिकादि तद्वर्जी तद्वर्जनशीलः । सैन्धवसौवर्चलादिकं भक्षये-देव । क्षारद्रव्यं सर्वं च लवणं वर्जयेदिति केचित् ॥ ८ ॥

आचर्यस्याप्रतिकूलः ॥ ९ ॥

अनुकूल इत्यर्थः ॥ ९ ॥

सर्वकार्यास्वतन्त्रः ॥ १० ॥

आस्तामध्ययनादिकम्, क्रियामात्रमप्याचार्यानुज्ञया विना न कुर्यादित्यर्थः ॥ १० ॥

पूर्वोत्थायी जघन्यसंवेशी ॥ ११,१२ ॥

शयनादिकमाश्रिते गुरौ उत्थातुकामे प्रथममेवोत्तिष्ठेत्, शयनावस्थिते चाचार्ये तत्पादसंवाहनादिकं च कृत्वा पश्चात् शयनादिकं संविशेत् । जघन्यसंवेशीत्यस्यायमर्थः—यदाचार्यः खट्वायां तिष्ठति तदा ब्रह्मचारिणा खट्वायाः सकाशाद्यज्जघन्यमासनं पट्टतलशय्यादिकं तत्र संवेशनीयम् । एवं शय्यामासीने गुरौ ततो निम्न इत्याद्यनुमन्तव्यम् ॥ ११,१२ ॥

यदेनमुपेयात्तदस्मै दद्यात् ॥ १३ ॥

यत् सुवर्णादिकं किलैनमुपेयादागच्छेत् तत् ब्रह्मचारी अस्मै आचार्याय दद्यात् ॥ १३ ॥

बहूनां येन संयुक्तः ॥ १४ ॥

यद्यपि ब्रह्मचारी सकलवेदवेदाङ्गोपाङ्ग-

ज्ञानार्थं यथायोग्यं क्रमेण बहूनाचार्यानुपास्ते, तथापि यत् यस्य संनिधौ निवसँल्लभेत तत्तस्मै दद्यात्, नतु सर्वदा सर्वं सर्वेभ्यो विभज्येत्यर्थः ॥ १४ ॥

नास्य शय्यामाविशेत् ॥ १५ ॥

यस्यां शय्यायामाचार्यः स्थितस्तामपाटवादिदशायां कारुण्यात् स्नेहातिशयाद्वापाटवे वाचार्यानुज्ञातोऽपि नाधितिष्ठेदित्यर्थः । तेन जघन्यसंवेशीत्यनेन पौनरुक्त्याभावः ॥ १५ ॥

न रथमारुहेत् ॥ १६ ॥

अस्येत्यनुषङ्गः । अयमप्यनुज्ञातस्य प्रतिषेधः । अन्ये तु शय्याग्रहणमाचार्याधिष्ठितासनयानाद्युपलक्षणार्थं रथवाक्यं वर्णयन्ति, रथग्रहणं तु करितुरगाद्युपलक्षणार्थं वर्णयन्ति, 'न संवस्त्रयेत' इत्यत्र च स्थितेन द्वितीयेन नञा तन्त्रेणावृत्त्या वा संबन्धयन्ति रथं न समारोहेन्न किं तर्हि ग्रामादिकं गच्छन्नसमर्थो वाहनान्तरं च न लभते तदाचार्यानुज्ञातस्तेनाधिष्ठितमपि करितुरगं समारोहेदेवेत्यर्थः ॥१६॥

न संवस्त्रयेत ॥ १७ ॥

समानं वस्त्रं न कुर्यात्, आचार्यपरिहितं वस्त्रं न परिदधीत । नाप्याचार्यवस्त्रेण सह समाने करण्डादिभाण्डे स्ववस्त्रं संश्रितं कुर्यात् ॥ १७ ॥

सर्वाणि सांस्पर्शिकानि स्त्रीभिः सह वर्जयेत् ॥ १८ ॥

संस्पर्शनिमित्तानि यानि पाणिग्रहणाभ्यञ्जनादीनि कर्माणि तानि सर्वाण्येव सर्वाभिः स्त्रीभिः सह वर्जयेत् । 'गुराविव तत्पुत्रदारेषु वर्तनीयम्' इत्यस्याः स्मृतेरप्ययमपवादः पादसंवाहनादिविषयः ॥ १८ ॥

न मुषितां प्रेक्षेत् ॥ १९ ॥

मुषितामिव नग्नां न पश्येदित्यर्थः ॥ १९ ॥

न विहारार्थं जल्पेत् ॥ २० ॥

विहारः क्रीडा तदर्थं परिहासादिकं न वदेत् । अथवा 'सर्वकार्यास्वतन्त्रः' इत्यनेन सर्वक्रियास्वाचार्यानुज्ञाग्रहणपूर्विकायां प्रवृत्तौ स्थितायां विहारं मूत्रमलोत्सर्गमाह विहारार्थं न जल्पेदनुज्ञाग्रहणाय ॥ २० ॥

न रुच्यर्थं किंचन धारयेत् ॥ २१ ॥

रुचिर्दीप्तिः रतिः प्रीतिश्च । तदर्थं द्रव्यविशेषादिकं न संगृह्णीयात् अलङ्करणं क्रीडादिकम् ॥ २१ ॥

न स्नायात् ॥ २२ ॥

रुच्यर्थमित्यनुवर्तते ॥ २२ ॥

उदकं वाभ्युपेयात् ॥ २३ ॥

अयमर्थः—रुच्यर्थं स्नानं निषिद्धं, नित्यं तु कर्तव्यमेव

'नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।'
(मनु० २ अ० १७६ श्लो०)

इत्यादिना ब्रह्मचारिणोऽपि विधानात् । तत्र च विकल्पः स्नानं कदाचिन्मन्त्रसंस्कृतेनोदकेन प्रोक्षणं कदाचिन्मज्जनम् । तत्राद्यमनेनोक्तम् 'उदकं वाभ्युपेयात्' इति ॥ २३ ॥

मज्जनमधिकृत्याह

यदि स्नायाद्दण्ड इवाप्सु परिप्लवेत ॥ २४ ॥

यदिशब्दः प्रतिबद्धो विधायकोऽनुवादं

प्रार्थयते 'यदि शालिं भुञ्जीत तदा दध्युपसिञ्चेत्' 'यदि रथन्तरसामा सोमः स्यात् ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्' इत्यादिवत्। तेनायमर्थः यदा मज्जनरूपः स्नानपक्षस्तदा ब्रह्मचारिणा दण्डेनेवाप्सु परिप्लवमात्रं कर्तव्यम्। नतु कान्त्यादिसिद्धये मलापसारणादिना यतनीयम् ॥ २४ ॥

मुण्डो जटिलः शिखी वा ॥ २५ ॥

मुण्डः शिखारहितः ॥ २५ ॥

सायं प्रातः सन्ध्यामुपासीत ॥ २६ ॥

सकलादित्योपलक्षितः कालो दिवसः। आदित्यशून्यकालो रात्रिः। अर्धोदितेनार्धास्तंगतेन चादित्येनोपलक्षितः कालः सन्धिः। सन्धौ भवा सन्ध्या। तामुभयीमपि प्रत्यहमुपासीत। उपासनं सेवा ॥ २६ ॥

कथमुपासीतेत्याह

तिष्ठेत्पूर्वाम् ॥ २७ ॥

पूर्वाह्णभागगतां तिष्ठेत् निवृत्तगतिः पूर्वां प्राङ्मुखो जपन्नवतिष्ठेत सनक्षत्रकालादारभ्य आ सूर्यज्योतिर्दर्शनात् ॥ २७ ॥

आसीतोत्तराम् ॥ २८ ॥

अपराह्णसंनिहितामुपविष्टः प्रत्यङ्मुखः सभास्करकालादारभ्य जपन्नासीत आ तारकज्योतिर्दर्शनात् आसीतोत्तरां संध्याकालस्यातिसूक्ष्मत्वादेवं तदुपासनमिष्टम् ॥ २८ ॥

ओं भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह ॥ २९ ॥

दिङ्मात्रदर्शनमेतत् । ब्राह्मे मुहूर्तेऽभ्युत्थायानुष्ठितशरीरधर्मः,

'अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवत्येष दिवा रात्रौ प्रातःस्नानं विशोधनम् ॥'
(दक्षस्मृ० २ अ० ७ श्लो०)

इति स्मरणात् मुख्यं गौणं वा स्नानं विधाय,

'त्रिराचम्य द्विरुन्मृज्य खान्युपस्पृश्य प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति'

इति स्मरणात् त्रीन्प्राणायामान् पञ्चदशमात्रापरिमाणान्स्मार्तोक्तान्कृत्वा प्रतिप्रणवयुक्तव्याहृतिसप्तकान्वितसशिरस्कसावित्र्या त्रिरभ्यासेन परिच्छिन्नांस्त्रीन्प्राणायामान्कृत्वा अघमर्ष-

णादिसूर्योपस्थानान्तं भूर्भुवःस्वरिति महाव्याहृतित्रययुक्तां तत्सवितुरिति सावित्रीमभ्यस्तां जपेत् । सावित्रीमन्वाहेत्यनुशब्दोऽभ्यासार्थः । तत्सवितुरिति प्रतीकः सवितृदेवताकत्वेऽपि 'आकृष्णेन रजसा' इत्यादीनां सावित्रान्तराणां निवृत्त्यर्थः ॥ २९ ॥

प्रागस्तमयान्निष्क्रम्य समिध आहरेद्धरिणीर्ब्रह्मवर्चसकाम इति श्रुतेः ॥ ३० ॥

अनस्तंगते भानौ ग्रामान्निष्क्रम्याष्टौ समिधो अग्निसमिन्धनार्थं हरितवर्णा आर्द्रा आहरेद्यो वेदाध्ययनतदर्थानुष्ठानादिसमृद्धिलक्षणं कामयते । एतद्धि श्रुत्यावेदितं श्रुतिमूलत्वात्स्मृतेः ॥ ३० ॥

सायंप्रातः संध्यानिःसरणं भैक्षाचरणमग्नीन्धनम् ॥ ३१ ॥

सायंप्रातः संध्योपासनार्थं ग्रामाद्बहिर्निःसरणं कर्तव्यम् । सायंप्रातश्च भैक्षाचरणं कर्तव्यम् । उभयकालं हि भोजनमाम्नातम्

'सायंप्रातर्मनुष्याणामशनं देवनिर्मितम् ।'

(संवर्त० १ अ० १२ श्लो०

इति । एवमग्निसमिन्धनं कालद्वयेऽपि कर्त-
व्यम् । चतस्रः प्रातः चतस्रः सायं समिधो
होतव्याः । एवमन्यकालविशेषविधानार्थान्ये-
तानि त्रीणि वाक्यानि । पूर्वश्च मध्याह्नात्
प्रातःकालः उत्तरश्च सायंकालः ॥ ३१ ॥

सायमेवाग्निमिन्धीतेत्येके ॥ ३२ ॥

'सायमेवाग्निसमिन्धनम्' इत्येकेषां वेद-
विदां मतम् । अत्र च पक्षे चतस्रः समिध
आहर्तव्याः ॥ ३२ ॥

भैक्षस्याचरणे दोषः
पावकस्यासमिन्धने ।
सप्तरात्रमकृत्वैत-
दवकीर्णिव्रतं चरेत् ॥ ३३ ॥

उपलक्षणमेतत् । भैक्षस्याचरणे अग्नेश्चास-
मिन्धने संध्यालोपादिके च दोषः प्रत्यवायो
भवति विहितातिक्रमणात् । यथोक्तम्

'नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम् ।
स शूद्रवद्बहिःकार्यः सर्वस्माद्द्विजकर्मणः ॥'
(मनु० २ अ० १०३ श्लो०)

इति । अथ संध्योपासनभ्रंशे भैक्षार्थमचरणे अनटने अग्नेश्चासमिन्धने सति यत्पापं भवति तस्य विनाशाय अवकीर्णिव्रतं प्रायश्चित्तमाचरेत् । अवकरणमवकीर्णोऽविधानोत्सर्गः कामतो ब्रह्मचारिणो रेतस उत्सर्गः । अवकीर्णं विद्यते यस्य सोऽवकीर्णी । तस्य व्रतमाम्नातम् ।

'सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्तयन् ।
तेभ्यो लब्धेन भैक्षेण वर्तयेदेककालिकम् ॥
उपस्पृशंस्त्रिषवणमब्देन स विशुद्ध्यति ।'

इति । एतत्सन्ध्योपासनादिकमकृत्वा अवकीर्णिव्रतमाचरेत् । किं परिपूर्णमाब्दिकमेव ? नेत्याह सप्तरात्रमिति । अन्ये तु व्याचक्षते संध्योपासनादिकं सप्तरात्रमकृत्वा अवकीर्णिव्रतं चरेत् परिपूर्णमेवेति । सप्तरात्रान्न्यूनाधिके वा अवकरणं न्यूनमधिकं चेति । याज्ञवल्क्य आह

'भैक्षाग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः ।
कामावकीर्ण इत्याभ्यां हुत्वा चाज्याहुतिद्वयम् ॥
नैर्ऋतं गर्दभं वैतत्संवत्सरव्रतं चरेत् ।' (या०प्रा०२८१श्लो०)

इति । अत्रापि पूर्ववद्योजना ॥ २२ ॥

इति प्रथमा कण्डिका ॥ १ ॥

अथ

द्वितीया कण्डिका ।

अधुना सन्ध्योपासनोपयोगिन ओं भूर्भुवः स्वरित्यादीन्मन्त्रान् व्याख्यास्यामः । तत्र सर्वमन्त्रेषु देवता ऋषिश्छन्द इत्येतत्त्रयं श्रुतिराबोधयति अज्ञाननिन्दामुखेन ज्ञानसंस्तवात्

'यो ह वानधिगतर्षिच्छन्दोदेवतो ब्राह्मणेन मन्त्रेण वा याजयति वाध्यापयति स स्थाणुं वर्च्छेति ।'

इति । तत्र सर्गादावभ्रष्टसंस्काराः पुण्यकर्माणो विदितसकलवेदितव्याः सुप्तप्रबुद्धात्मान ऋषयो याज्ञवल्क्याद्याः । हिरण्यगर्भादिपरम्परया च नित्या वेदाः । तथा च श्रूयते

'तत एव परमेष्ठी प्राजापत्यो यज्ञमपश्यद्दार्शपौर्णमासौ ।'

इत्यादि । मन्त्राभिधेया देवताः ।

गायत्र्युष्णिगनुष्टुभो बृहतीपंक्तित्रिष्टुभः ।
जगती जयदेवस्य च्छन्दसां सप्त जातयः ॥

मन्त्रार्थं च सम्यग्बुभुत्समाणेन उपसर्गाणां 'छन्दसि परेऽपि व्यवहिताः' इत्यादिलक्षणमनुसर्तव्यम् । 'वर्णागम' इत्यादि निरुक्तम् ।

व्यत्ययश्च सप्तजातीनाम् । एवमादि प्रतिमन्त्रं नाम्नाभिधीयमानं ग्रन्थगौरवमातनोतीत्यर्थप्रदर्शनमेव करिष्यते । ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम्,—इति सप्त महाव्याहृतयः सप्रणवाः सप्तलोकनामानि । तत्राद्यास्तिस्रो महाव्याहृतयः महतोऽर्थस्याभिधानात् । महःप्रभृतयस्तु न महत्त्वेन विशेष्यन्ते स्वर्गैकदेशाभिधानात् ।

'भुवनानां समस्तानामधस्तान्निबिडं तमः ।
लक्षपञ्चाशीत्यधिककोटियोजनसंमितम् ॥
अवीचिर्नाम नरकस्तस्य चोपरि वर्तते ।
अवीचिनरकादूर्ध्वं मेरुपृष्ठपरावधिः ॥
भूर्लोको भाषितः सर्वैः पुराणेषु महर्षिभिः ।'

सैषा सप्तद्वीपा मेदिनी । तानि पुनरुक्तानि पौराणिकैः

'जम्बुः शाकः कुशः क्रौञ्चः शाल्मलिश्च तथापरः ।
गोमेदः पुष्करश्चेति सप्तद्वीपगणो मतः ॥'
(लिंगपु० ४६ अ० २ श्लो०)

इति । एषां विभागः पातञ्जले योगशास्त्रे दर्शितोऽस्माभिर्विभूतिपादे

'भुवनज्ञानं सूर्ये संयमात्' (३।२६)

इत्यत्र सूत्रे । तारानक्षत्रविचित्रस्त्वन्तरिक्ष-लोको भुवोलोको मेरुशिखरादारभ्य ध्रुवा-वधिः। ततः परस्तात्स्वर्गलोकः। स च पञ्चविध इति सप्त लोका भवन्ति । पञ्चविधत्वं च स्वर्गस्य—माहेन्द्र एकः महेन्द्रस्वामिकत्वात् । एवं प्राजापत्यो द्वितीयः, अस्य मह इति नाम । ब्रह्मलोकस्त्रिविधः जनस्तपः सत्यमिति । पञ्चा-नामप्येषां स्वर्गशब्दः साधारणः । अतो व्या-हृतिमन्त्राणामभिधेयानि भुवनानि देवताः । एतासां प्राणायामे विनियोगस्तैत्तिरीये दृश्यते । स्मृतावपि

'प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु ।
त्रिपदायां च सावित्र्यां न भयं विद्यते क्वचित् ॥'

इति ।

'पृथिव्यादिलोकदेवता वीर्यभूताः ।'

इति ब्राह्मणात् । ऋषयस्तासां निदर्शिताः शौनकेन तावत्

'व्याहृतीनां तु सर्वासामृषिराद्यः प्रजापतिः ।
व्यस्तानां च समस्तानां ब्राह्ममक्षरमोमिति ॥'

इति । अन्येनापि

> 'विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
> ऋषिरत्रिर्वसिष्ठश्च कश्यपश्च यथाक्रमम् ॥'

इति ।

> अग्निवायू रविश्चैव वाक्पतिर्वरुणस्तथा ।
> इन्द्रो विश्वे व्याहृतीनां दैवतानि यथाक्रमम् ॥
> अग्निः सोमस्तथा सूर्यो वाक्पतिर्वरुणस्तथा ।
> कचिदिन्द्रस्तथादित्यो व्याहृतीनां यथाक्रमम् ॥

अन्यो बभाण

> 'सत्यसंकल्पेन प्रजापतिना लोकनिवासिनां भोगाय सप्त लोकान् सिसृक्षुणा एवं व्याहृतं सप्त लोका भविष्यन्ति ।'

इति । तेन प्रजापतिरेवासां ऋषिः व्याहृतित्वं च । तथाच पुराणम्

> 'चतुर्दशविधं सर्गं सृष्ट्वेदं व्याहृतं स्वयम् ।
> सप्त लोका भविष्यन्ति तस्माद्व्याहृतयः स्मृताः ॥'

युज्यन्ते चैकत्रानेके द्रष्टारः कालभेदेन युगपच्च ॥

> ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
> धियो यो नः प्रचोदयात् ओम् ॥

गायत्रं छन्दः, प्रजापतिर्ऋषिः, सविता

देवता, जपोपनयनहोमादिषु विनियोगः । तथाच द्वैपायनः

'विश्वामित्र ऋषिश्छन्दो गायत्रं सविता तथा ।
देवतोपनये जप्ये विनियोगो हुते तथा ॥'

इति । सर्वमित्रो विश्वामित्रः प्रजापतिरेव विवक्षितः । अभिधेयत्वाच्चात्र सवितुर्देवतारूपत्वम् । जपमन्त्राणामपि प्रतीयमानत्वाद्दुरपह्नवोऽर्थः, यद्यपि जपमन्त्रः प्रतीतस्तथापि जपिता जपमन्त्रेण तदर्थं ध्यायति । युक्तियुक्तमेतत् जल्पतिजपत्योर्व्यक्तायां वाचि वृत्तेः । एतदेव व्यक्तत्वं यदर्थप्रतिपादनयोग्यत्वं, विपर्यये तु अव्यक्तत्वं कुक्कुटादिवाचाम् । नच प्रतीयमानोऽप्यविवक्षित इत्यभिधेयो न भवतीति भणितुं प्रभवति कश्चित् । नहि चक्षुरादिना प्रतीयमानो जलादिरजलार्थिनो नेन्द्रियविषयः । नचाविवक्षायाः सवितुः कारणमस्ति ध्यानेन तदर्थजपोपगृहीतेनाराधितस्य परापरपुरुषार्थसिद्धिहेतुत्वात् 'य एवं विद्वान् जपति' इति जपमन्त्रेष्वपि विद्वत्ताया अपेक्षणात् । किंच सर्वोपनिषत्सु

प्रणवगायत्रीरूपत्वं ब्रह्मणोऽभिधीयते, सर्व-भावात्मकत्वं च गायत्रीप्रणवयोः । तथाच च्छान्दोग्योपनिषदि पठ्यते

'गायत्री वा इदं सर्वं यदिदं किंच, वाग्वै गायत्री, वाग्वा इदं सर्वं भूतं, गायति च त्रायते च या सा गायत्रीयं वाव सा येयं पृथिवी, अस्यां हीदं सर्वं प्रतिष्ठितम् ।' (३।१२)

इत्यादि । सामान्यवाच्यपि गायत्रीशब्दः प्रकृ-तायामिह सावित्र्यां वर्तते । अत एव गायन्तं त्रायते इति गायत्रीति तत्र तत्र निर्वचनम् । त्राणं च पालनमुपद्रवनिवारणमुपकाराधानं च । एतां च सन्ध्यादौ जपतोऽनाद्यविद्यावा-सनोपप्लवोपप्लुतजीवेन्द्रियाद्युपद्रवविद्रवे सति अखिलप्रपञ्चविहीनचैतन्यसुखस्वभावमयपरब्र-ह्मलक्षणमोक्षप्राप्तिर्भवति । कामिनां च स्वर्गा-दिप्राप्तिरुपात्तदुरितविद्रवणं च । आदावन्ते च वेदवाचां प्रपञ्चस्यापि ओंकारात्मके ब्रह्म-ण्यवस्थितिं दर्शयितुमादावन्ते च ओंकारो-च्चारणमिष्यते

'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोंकृतं पूर्वं पुरस्ताच्च विशीर्यते ॥'

इति । तथाच स्मृतावपि

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।'
(भ० गी० १७।२३)

इत्युक्तम् । योगशास्त्रे च

'तस्य वाचकः प्रणवः ।' (१।२७)
'तज्जपस्तदर्थभावनम् ।' (१।२८)

इति । तस्येश्वरस्य

ईश्वरप्रणिधानाद्वा । (१।२३)

इत्यनन्तरोक्तस्य । ईश्वरस्य च प्रजापतिर्विष्णुरित्यादि पर्यायमात्रम् । ब्रह्मात्मिकैव गायत्री सर्वभावात्मनापदेशेन व्यवस्थितेति । वाजसनेयब्राह्मणेऽपि श्रूयते

'भूमिरन्तरिक्षं द्यौरित्यष्टाक्षराणि, अष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हास्या एतत्स यावदेतेषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥

ऋचो यजूंषि सामानि इत्यष्टाक्षराणि, अष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥

प्राणापानोदानव्याना इत्यष्टाक्षराणि, अष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ ३ ॥

अथ एतदेव तुरीयं दर्शितं पदं परोरजा य एष तपति इति, यद्वै चतुर्थं तत्तुरीयं, दर्शितं पदमिति ददृश इव ह्येष, परोरजा इति सर्वमु ह्येष रज उपर्युपरि तपत्येवं हैव एष श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ४ ॥

सैषा गायत्री एतस्मिंस्तुरीये दर्शिते पदे परोरजसि प्रतिष्ठिता, तद्वै तत्सत्ये प्रतिष्ठितं, चक्षुर्वै सत्यं, चक्षुर्हि वै सत्यं, तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमद्राक्षमहमश्रौषमिति य एवं ब्रूयादहमद्राक्षमिति तस्मादेव श्रद्धाम तद्वै तत्सत्यं बले प्रतिष्ठितं, प्राणो वै बलं, तत्प्राणे प्रतिष्ठितं, तस्मादाहुर्बलं सत्यादोघीय इत्येवम्वेषा गायत्र्यध्यात्मं प्रतिष्ठिता, सा वैषा गायांस्तत्रे, प्राणा वै गायास्तांस्तत्रे यत्तस्माद्गायत्री नाम, स यामेवामूमन्वाहैषैव सा, स यस्मा अन्वाह तस्य प्राणांस्त्रायते ॥ ५ ॥

तां हैके सावित्रीमेवानुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति न तथा विद्याद्गायत्रीमेव सावित्रीमनुब्रूयात् यदि ह वा अप्येवं विद्बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकंचन पदं प्रति ॥ ६ ॥

स य इमांस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात् सोऽस्या एतत्प्रथमं पदमाप्नुयात्, अथ यावतीयं त्रयीविद्या यस्तावत्प्रतिगृह्णीयात् सोऽस्या एतद्द्वितीयं पदमाप्नुयात्, अथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात् सोऽस्या एतत्तृतीयं पदमाप्नुयात्, अथास्या एतदेव तुरीयं दर्शितं पदं परोरजा य एष तपतीति, नैव केनचनाप्यं, कुत एव तावत्प्रतिगृह्णीयात् ॥ ७ ॥

तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पदी अपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शिताय पदाय परोरजसेऽसावदो माप्रापदिति यं द्विष्यादसावस्मै कामो मा समर्द्धीयेति वा न हैवास्मै स कामः समृद्ध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ८ ॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वितराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथा अथ कथं हस्तीभूतो वहसीति मुखं ह्यस्याः सम्राट् न विदांचकारेति होवाच तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्यादधाति सर्वमेवैतत्संदहत्येवं हैवैवंविद्यद्यपि बह्विव पापं करोति सर्वमेतत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ९ ॥' (बृ० आ० ५।१४)

इति। अस्यामुपनिषदि 'भूमिरन्तरिक्षं द्यौरित्यष्टाक्षराणि' इत्यादिकस्यायं तात्पर्यार्थः—ब्रह्मात्मिकाया गायत्र्यास्त्रैलोक्यं विवर्तः परिणामो वा, अतस्तत्रानेकशक्तिकत्वात् भूम्यादिशक्तियोगित्वमस्तीति । 'ऋचो यजूंषि सामानि' इत्यादिकस्यापि, यद्यपि त्रय्याः प्रमाणान्तरानवगतार्थप्रकाशकत्वं विद्यते तद्गायत्र्यां ब्रह्मात्मिकायां यच्चैतन्यं तदेव विवृत्तं परिणतं वा प्रथितमिति । 'प्राणापानोदानव्यानाः' इत्यादिकस्यापि, अनन्तरपादप्रतिपादितवाच्यवाचकभावापन्नलोकत्रयीगतस्य जगत्सूत्राख्यस्य

वायोः प्राणरूपस्य या चेष्टा लक्ष्यते सा ब्रह्मा-ख्यायाः सवितुर्गायत्र्या एव शक्तिः तद्वशेनैव तथा परिणामाद्विवर्तनाद्वा । 'एतदेव तुरीयं दर्शितं पदम्' इत्यादिना तु वेदविदा निखिल-लोकावलोक्यमानविरजस्कपदगततमस्कविग-लिताखिलकल्लोलालोलजलनिधिनिभपरब्रह्म-निकटविवर्तरूपे सवितरि वाच्यैकभावेन व्य-वस्थिते पादत्रयस्य पर्यवसानं प्रतिपादितम् । य एव ह्यत्र शब्दानन्तरमर्थः प्रतीयते स एव हि वाक्यार्थः। तेन सवितुरेव देवतात्वमभिधेय-त्वेनेह युक्तमवभासते । एतदुक्तं भवति—पर-मार्थतो ब्रह्म प्रणवगायत्रीशब्दाभिलाप्यतत्त्वा-तिरिक्तमद्वैतवादे तत्त्वं नास्ति । कल्पनया त्वेकत्रैव वाच्यवाचकादिव्यवहारः समाप्यते । तत्र पादत्रयात्मकेन कल्पितेन रूपेण वाच-कत्वं, सवित्रात्मना तु वाच्यत्वम् । तुरीयपाद-वाचोयुक्तिरपि सवितरि कल्पनया पादत्रय-वत्क्रियते पारमार्थिकतत्त्वैकप्रतिपादनायेत्यल-मतिरसरभसवशप्रसारितरहस्यस्वधास्वादप्रमो-

दानुभवविभवप्रविततविपिनगहनवेदान्तोद्या-
नावगाहननैपुण्यचापल्येन । अस्मिन्नवसरे
स्थितमेतत्—जपविनियुक्तायामप्यस्यामृचि स-
विता देवतेति ।

अयं च पदार्थः—यत्तदिति सामान्यशब्दः,
सामान्यं च सर्वभेदानुगतं ब्रह्मरूपं यथार्थम् ।
यथोक्तम्

'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।'
(भ० गी० १७।२३)

इति । एतदपि हि सामान्यवचनमेवाविचारि-
तसिद्ध्यर्थत्वेन प्रयुज्यमानत्वात् । यत्किलावि-
चारितमेव गृह्यते तत्र ओमिति प्रयुज्यते । अवि-
चारितसिद्धता चासंदेहवस्तुनि उपपद्यते । संदे-
हश्च भेदनिष्ठानेककोट्यवलेहित्वात् । तस्माद्ब्रह्म-
ण्येवाद्वैतेऽविचारितसिद्धत्वमुपपद्यते । अतो
यत्तदिति ब्रह्मविधेयौ शब्दौ । य इत्यपि लिङ्ग-
व्यत्ययः । धीशब्दश्च कर्मनामसु पठ्यते । तेन
धीशब्देन ज्ञानवत्कर्माण्यप्युच्यन्ते । ते च
सर्वलोका वयं चेति वयम् । त्यदादिषु परशेषः ।

४

तेषां नोऽस्माकमस्मद्युक्तानामित्यर्थः । धीमहीति 'ध्यै चिन्तायाम्', छान्दसं संप्रसारणम्, व्यत्ययेन लडर्थे लिङ्, ध्यायामश्चिन्तयामो भावयाम उपास्महे इत्यर्थः । एवं प्रचोदयादित्यत्रापि । अथवा प्रचोदयादिति संभावनायां लिङ् । भर्ग इति दीप्तिरुच्यते भासनप्रकाशादिपर्यायः । 'भा दीप्तौ' इत्यस्य औणादिको गप्रत्ययः, छान्दसौ च वर्णागमविकारौ, भाति दीप्यते प्रकाशते नित्यानन्दचैतन्यात्मकतयेति भर्गः । 'भ्राजृ दीप्तौ' इत्यस्य वा भ्राजत इति भर्गः । 'भ्रस्ज पाके' इत्यस्य वा भ्रस्जति पचत्यौषधादिकमिति भर्गः । सर्वं हि सस्यादिकं ब्रह्म आदित्यरूपेण पचति संपादयति । जलपवनावपि हि रविरूपौ । तथा च निरुक्तकारः

'पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पचन्ति ।' २।२२

इति । तथारण्यके पर्वणि युधिष्ठिरस्य धौम्येन दिवाकराराधनसमयेऽभिहितम्

'यथोत्तरायणे सूर्यः पृथिव्या रश्मभी रसान् ।
उद्धृत्यान्नमोषधीः षड्रसांश्च सृजति···· ॥'

दक्षिणायने चन्द्रतेजोभिरन्वितो दिवस्तेज उद्धृत्य वारिणान्नादिकं जनयतीत्युक्त्वोक्तम्

'एवं भानुमयं ह्यन्नं लोकानां प्राणधारणम् ।' (३।९)

इति । 'डुभृञ् धारणपोषणयोः' इत्यस्य वा बिभर्ति धारयति पुष्णाति वा लोकानिति भर्गः । 'गल्भ धार्ष्ट्ये' इत्यस्य वा वर्णविकारविपर्ययाभ्यां, प्रगल्भते शक्नोति धार्ष्ट्यं भजते जगदुदयस्थितिविलयतत्प्रकाशनादाविति भर्गः सामर्थ्यम् । 'वृजी वर्जने' इत्यस्य वा वर्जयति अविद्यानिबन्धनभेदप्रपञ्चदुःखमिति भर्गः । तदनेनाध्यात्ममधिदैवतं वा सवितुर्भर्गो रूपमुक्तम् । तथाच श्रुतिः

'स एष वै सविता य एष तपति ।'

इति । 'वृञ् वरणे' छान्दसः केन्यप्रत्ययः, वरणार्हं वरेण्यं ध्येयतया ध्यानफलकमुक्तिरूपप्राप्यतया चाभिलषणीयमित्यर्थः । दीव्यति क्रीडति जगन्निर्माणावस्थापनविलापनैर्विजिगीषते व्यवहरति स्तौति चार्थवादादिभिर्विवर्तात्मना गच्छति च विवर्तसंवर्तरूप-

मिति देवः, तस्य । सूते सस्यादीनीति सविता, तस्य । एष पदार्थः उक्तः ।

अथ वाक्यार्थः—सवितुर्देवस्य संबन्धि वरेण्यं भर्गो धीमहि । तद्धि यत्तद्रूपं सामान्यस्वभावब्रह्मात्मकं यथायोग्यतां कर्माणि ज्ञानानि च लोकस्य प्रकर्षेण चोदयति प्रवर्तयति प्रचोदयात् प्रवर्तयेदिति वा संभाव्यते । एषा तावदेका पदघटना । यद्वा तदिति षष्ठ्याः 'सुपां सुलुक्' (७।१।३९) इति लुक् । य इति यथाश्रुतमेव । तस्य देवस्य सवितुर्वरेण्यं भर्गो धीमहि । कस्य सवितुः । यः सवितास्माकं कर्माणि ज्ञानानि च प्रकर्षेण चोदयति ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥

गायत्रं छन्दः । अब्दैवतं सूक्तम् । त्वाष्ट्रस्त्रिशिरा अपश्यदम्बरीषो वा सिन्धुद्वीपः । मार्जनादौ विनियोगः ।

मय इति सुखनाम । ऊर्गित्यन्ननाम । तेनेह सकलं भोग्यं लक्ष्यम् । हे आपः, हि-

र्यस्मादर्थे, यस्माद्यूयं मयोभुवः सुखस्य भावयित्र्यः स्थ भवथ, तस्मात्ता एवंविशिष्टा भवत्यः कर्मभूतान्नोऽस्मान् दधातन धारयत 'तप्तनप्तनथनाश्च' (७।१।४५) इति तनादेशः । किमर्थं दधातन । ऊर्जे अन्नाद्युपभोगाय । एवं भोगार्थमभ्यर्थ्य अपवर्गार्थमर्थयते—महे रणाय चक्षसे । महे महते । परब्रह्मणोऽन्यस्य महत्त्वमापेक्षिकं ब्रह्मण एव तु तात्त्विकं परममहत्त्वमिति ब्रह्मैव महच्छब्देनोच्यते । दधातनेत्यनुषङ्गः । कीदृशाय महते । रणाय रमणीयाय नित्यानन्दचैतन्यरूपाय, तथा चक्षसे दर्शनीयाय योगिनां ध्यानजप्रत्यक्षविषयायेत्यर्थः ।

तेन दर्शनयोग्याय नित्यानन्दचैतन्यस्वभावाय महते ब्रह्मणे ब्रह्मप्राप्तये अस्मान् धारयतेति वाक्यार्थः ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः ॥

अपामाधारभेदेन शिव—शिवतर—शिवतमा रसाः सन्ति । अथवा अपां रसः परब्रह्मरूपः

शिवतमः सुखतमो मतः । स यथायोग्यं त्रैवर्णिकैरभ्यर्थ्यते—हे आपः, युष्माकं यः सुखतमो रसस्तमस्मान् भाजयत भोजयत प्रापयत वा । नः अस्माकम् द्वितीयार्थे च व्यत्ययेन षष्ठी अंशापेक्षिणी वा । यथावयविसंबन्धे शिवतमरसांशभागिनोऽस्मान्विधत्तेत्यर्थः । भोगार्थिनां क्षीरादिरसाप्तयेऽभ्यर्थना, मुमुक्षूणां तु परब्रह्मस्वरूपलाभाय । किंवद्भाजयतेत्याह उशतीरिव मातरः 'वश कान्तौ' यथा मातरो बालापत्यकानां वृद्धिं कामयमाना वात्सल्यातिशयात् स्तनपानादिदानेन स्वापत्यकान् शिवतमं क्षीरादिरसं भोजयन्ति तद्वत् ॥

तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥

यस्येति व्यत्ययेन कर्मणि षष्ठी । हे आपः, यं रसं प्राणिषु जिन्वथ । 'जि जये' । लट् । व्यत्ययेन श्नुः । ततः शप् बाहुलकात् क्वचिद्द्विविकरणादिता 'हुश्नुवोः सार्वधातुके' (६।४।८७) इति यणादेशः । अनेकार्था धातवः । तेनायमर्थः—जयथोपचिनुथ वा । किमर्थम् । क्षयाय ।

'क्षि निवासगत्योः' भूतानां निवासाय स्थितये गमनाय च नानारूपकर्मोपभोगार्थचेष्टायै ज्ञानाय च । तस्मै अरङ्गमाम वः । 'गत्यर्थकर्मणि' (२।३।१२) इति कर्मणि चतुर्थी । तं युष्माकं संबन्धिनं रसं तूर्णमलं पर्याप्तं वा कृत्वा गच्छेम जीवनार्थमासादयामाशास्महे इति भोगासक्तैरब्ध आशास्यते ।

मुमुक्ष्वभिप्रायेण त्वित्थं योजना—हे आपः, यस्य परमात्मनः क्षयाय नित्यानन्दद्वारेणानुज्ञानाय जिन्वथ यतध्वम्, तं युष्माकमेव संबन्धिनं परं स्वभावं वयं युष्मत्प्रसादात्पूर्णं पर्याप्तं वा कृत्वा गच्छेम जानीयाम प्राप्नुयाम च, मोक्षप्राप्तिरस्माकमस्त्वित्याशास्महे इत्यर्थः। आपो जनयथा च नः । यस्माद्युष्मत्प्रसादादेवमाशास्महे तस्मादस्मान् मोक्षप्राप्तियोग्यान् जनयध्वं कुरुध्वम् । महानुभावत्वादेकैव च सर्वत्र देवता ब्रह्मरूपा आदित्यरूपा वा श्रूयते । गमामेति यद्यप्याशीर्लिङो 'लिङाशिषि' (३।४।११६) इत्यार्धधातुकत्वं, तथापि

'छन्दस्युभयथा' (३।४।११७) इति सार्व-धातुकत्वमप्यस्तीति शपः संबन्धः। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पा० वा०) इति छत्वाभावः। एवमन्यत्रापि अनुसर्तव्यम्॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये।
शं य्योरभिस्रवन्तु नः॥

अब्दैवत्या। गायत्री। सिन्धुद्वीपस्याम्बरी-षस्य वार्षम्।

दानादिगुणयुक्ता देव्यः आपः नोऽस्माकं शं भवन्तु। शमिति सुखनाम सुखरूपाः सुखकारिण्यो वा भवन्तु, तादर्थ्यं वा ज्ञेयं सुखाय भवन्त्वित्यर्थः। किंच अभिष्टये शं भवन्तु। इष्यत इतीष्टिः स्वर्गादिफलाभि-मुख्येनेष्टिरभीष्टिः। छान्दस एवादेशवर्णवि-कारः अभीष्टिरिति प्राप्ते। इष्यमाणान्नादि-प्राप्तये आपोऽस्माकं भवन्तु। आपो हि अन्ना-दिरूपेण परिणमन्ति। तथाच ब्राह्मणम्

'आपश्च पृथिवी चान्नम्।'

इति

'एतन्मयानि ह्यन्नानि भवन्ति।'

इति च । तथा पीतये भवन्तु, पानमुपलक्षणं भुक्तपीतसुखपरिणामकारिण्यो भवन्त्वित्यर्थः । अथवा अभियजनमभीष्टिः, पीतिः सोमपानं, ज्योतिष्टोमादियागाय सोमपानाय चास्माकमापो भवन्त्वित्यर्थः । अधिष्ठात्री देवतेत्थं समभ्यर्थ्यते—शं य्योरभिस्रवन्तु नः । 'यु मिश्रणे' यौति मिश्रीभवतीति युर्व्याधिः संसारो ज्वरादिश्च । शमिति लक्षणया दुःखाभावमत्राह । आपोऽस्माकमभिस्रवन्तु कुर्वन्त्वित्यर्थः । तेनैष वाक्यार्थः—योर्व्याधेः संबन्धिनं दुःखाभावमापोऽस्माकं कुर्वन्त्विति । अथवा यौति शरीरादिभिर्मिश्रीभवति इति युशब्देनात्मोच्यते । योरात्मनो यत् शं नित्यसुखं, तदस्माकमभिस्रवन्तु व्यञ्जयन्त्वित्यर्थः ॥

शन्न आपो धन्वन्याः शन्नः सन्त्वनूप्याः ।
शन्नः समुद्रिया आपः शमु नः सन्तु कूप्याः ॥

अब्दैवत्या । अनुष्टुप् । सोमपुत्रस्याध्वरस्यार्षम् ।

धन्वनि मरौ जङ्गले भवा धन्वन्याः । एवमनूपे जलस्राविणि देशे भवा अनूप्याः । तथा समुद्रे भवा समुद्रियाः । कूपे भवाः

कूप्याः । ताः सर्वा नोऽस्माकं सुखाय भवन्त्वित्यर्थः । शमु न इत्यत्रोकारो निपातः पादपूरणार्थः ॥

आपो अस्मान्मातरः सूदयन्तु घृतेन मा घृतप्वः पुनन्तु ।
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एमि ॥

त्रिष्टुप् । ऋषिरनन्तरोक्तः । एषैव देवता च । आपो मातरः जगतां निर्मात्र्यः । अस्मानिति षष्ठ्यर्थे द्वितीया । अस्माकं रिप्रं पापं घृतेन सारेण सूदयन्तु नाशयन्तु । रिप्रनाशनेन च मां घृतेन पुनन्तु पवित्रीकुर्वन्तु अस्माकं पापं नाशयन्त्विति । एतत्कियद्वा चित्रं यतो विश्वं सर्वं जगत्त्रयगतमपि पापं प्रवहन्ति प्रवाहयन्ति अपसारितुं शक्नुवन्ति । ता हि देवीः देव्यो दानद्योतनादिगुणयुक्ताः । उदिदाभ्यः शुचिरापूत एमि इति । इदिति पादपूरणार्थे निपातः । उदिति एमीत्यनेन संबध्यते । आभ्य अद्भ्य आपूतः पवित्रीभूत एव शुचिरुदेमि आगच्छामि स्वर्गापवर्गमाप्नुवानीत्यर्थः ॥

इदमापः प्रवहत यत्किंचिद्दुरितं मयि ।
यद्वाहमभि दुद्रोह यद्वा शेप उतानृतम् ॥

ऋषिः पूर्ववत् । अनुष्टुप् । हे आपः यत्किंचिन्मयि दुरितं दुश्चेष्टितं पापरूपं कर्म तत्प्रवहतापसारयत । यद्वाहमभिदुद्रोह यत् द्रुग्धं हिंसितं किंचिन्मया, यच्चानृतमलीकं निष्कारणमेवाहं किंचनाभिशेप आक्रुष्टवान् तत्सर्वं प्रवहत । दुरितपदेन सामान्याभिधानेऽपि द्रोहाभिशापयोः पुनर्वचनमतिशयार्थम् ॥

द्रुपदादिवेन्मुमुचानः स्विन्नः स्नात्वी मलादिव ।
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥

अनुष्टुप् । ऋषिः कोकिलराजपुत्रः । आपो मामेनसः पापाच्छुन्धन्तु मोचयन्तु सुगतियोग्यं कुर्वन्तु । कः कस्मान्मुक्तो यथा यथेष्टविहारी भवति, द्रुपदादिवेन्मुमुचानः । द्रुपदाः पादुकाः, तथाच मन्त्रवर्णः 'कनीनकेव विद्रधे नवे द्रुपदे (ऋ० ४।३२।२३) इति । यद्वा द्रुतं पदं यत्र स द्रुपदो दस्यूपहतो देशः, द्रुमयं वा पदं द्रुपदं बन्धनकाष्ठम् । इच्छब्दः पादपूरणः । 'मुच्लृ मोचने' व्यत्ययेन लडर्थे लिट् कानच् । यथा-द्रुपदात्पादुकासभयदेशबन्धनकाष्ठलक्षणान्मुच्यमानो नरः स्वैरविहारी भवति । स्विन्नः स्नात्वी मलादिव । स्विन्नः प्रस्वेदयुक्तो निदा-

घादौ । 'स्नात्व्यादयश्च' (७।१।४९) इति स्नात्वी-शब्दो निपातितः । यथा प्रस्वेदेन व्याप्तगात्रः स्नानं कृत्वा मलाद्विमुक्तो निर्वृतो भवति, यथा वा दर्भपवित्रेण पूतमाज्यं निर्मलं भवति तितउना सक्तव इव, तथा मामापो निर्मलं निष्पापं संपादयन्त्वित्यर्थः ॥

अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयमस्मभ्यमसुर प्रचेतो राजन्नेनांसि शिश्रथः कृतानि ॥

त्रिष्टुप् । शुनःशेपस्यार्षं देवासुराणां वा । वरुणो देवता । अवेत्युपसर्गः ईमहे इत्यनेन संबध्यते 'व्यवहिताश्च' (१।४।८२) इति स्मृतेः । हे वरुण ते तव हेळः क्रोधमवेमहेऽपनयामः । कैः । नमोभिः स्तोत्रैः, यज्ञेभिः पञ्चमहायज्ञा-दिकैः, हविर्भिः पुरोडाशादिकैः । अतस्त्वमप-सारितकोपः प्रसन्नचित्तः सन् अस्मभ्यं क्षयं निवासमन्नं वा प्रयच्छ । तथाच यान्यस्माभिरे-नांसि निषिद्धसेवनादीनि कृतानि तानि शिश्रथः शिथिलीकुरु नाशयेत्यर्थः । हे असुर, हे प्रचेतः, हे राजन् इत्यामन्त्रणत्रयं वरुणविशेषणम् । असुः प्राणः शक्तिविशेषः स विद्यते यस्य

सोऽसुरः, हे बलवन् । प्रकृष्टं चेतो ज्ञानं मनो वा यस्य तस्य संबोधनं हे प्रचेतः । राजन् दीप्यमान ॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥

अनन्तरवत् छन्दोदेवतावगतिः । उत्तरत्राप्येवम् । शुनःशेपस्त्रिभिः पाशैर्यूपे मूलमध्यप्रान्तदेशेषु बद्धो मुक्तये वरुणस्तुतिं चकार । उदित्युपसर्गः श्रथायेत्यनेन संबध्यते । हे वरुण उत्तमं पाशमस्मत्सकाशादुच्छ्रथाय ऊर्ध्वं शिथिलीकुरु शिथिलं कृत्वा ऊर्ध्वसारणेन प्रान्तपाशमपसारयेत्यर्थः । अवाधमम्, अधमं मूलप्रदेशस्थमवश्रथाय शिथिलं कृत्वाधोनयनेन मूलपाशमपसारयेत्यर्थः। वि मध्यमं, मध्यमं विश्रथाय मध्यप्रदेशस्थं पाशं विविधरूपेण श्रथय शिथिलं कृत्वा मूलेन प्रान्तेन मध्यमं पाशं यूपान्निसारयेत्यर्थः । अथ पाशत्रयविमुक्त्यनन्तरं हे आदित्य अदितेः पुत्र तव व्रते कर्मणि वर्तमाना वयमनागसो निष्पापाः स्याम । किमर्थम् । अदितये अदैन्याय दैन्यस्य पापनिबन्धनत्वात् ॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥

हे वरुण यद्यजमानो हविर्भिः पुरोडाशसोमप्रभृतिभिराशास्ते तदहं त्वा यामि त्वां याचे । किं कुर्वाणः । ब्रह्मणा मन्त्ररूपेण वेदेन वन्दमानः स्तुवन् । तदिह याचनं स्तवनं च बोधि बुध्यस्व । अहेळमानः 'हेडृ अनादरे' अनादरमकुर्वन् । शंसनं शंसः उरुभिर्बहुभिः शंसो यस्य स उरुशंसस्तस्य संबोधनं हे उरुशंस बहुस्तुत । मा न आयुः प्रमोषीः, अस्माकमायुर्विलोपं मा कार्षीः ॥

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं श्रथ ।
अवाधमानि जीवसे ॥

वारुणी । गायत्री । ऋषिः शुनःशेप एव । पाशविमोचनमभ्यर्थ्याजरामरणमभ्यर्थयते । उदित्युपसर्गो मुमुग्धीत्यनेन संबध्यते । अस्माकमुत्तमं पाशमुन्मुमुग्धि ऊर्ध्वं मोचय । वि पाशं मध्यमं श्रथ, मध्यमं पाशं विश्रथ । अधमानि च बन्धनानि अवश्रथ अधोभागे विमुच्यापसारय । किमर्थम् । जीवसे 'जीव

प्राणधारणे' जीवनाय पाशमोचनं कृत्वा अस्मभ्यमायुर्देहि इत्यर्थः । अथवा जीवनमिह कैवल्यम् । बन्धनानि देवर्षिपितॄणामृणानि उत्तमाधममध्यमानि यथासंख्यं, तद्विमोचनेन मोक्षः प्रार्थ्यते । यथोक्तम्

'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।'
(मनु० ६।३५)

इति ॥

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥

अब्दैवत्या । त्रिष्टुप् । हिरण्यस्येव शुद्धो निर्मलो वर्णो यासां ता हिरण्यवर्णाः । शुचयः पवित्रभूताः । अत एव पावकाः पवित्रताया आपादिकाः । यासु कश्यपप्रभृतय ऋषयो जाता इन्द्रप्रभृतयश्च देवाः । का गणनान्येषाम् । तथाच मनुः

'अप एव ससर्जादौ तासु वीर्यमथासृजत् ।
तदण्डमभवद्धैमं सहस्रार्कसमद्युति ॥' (मनु० १।९)

इत्यादि । याश्च विविधरूपा गगनसागरादिव्यवस्थिता अपि अग्निं वैद्युतवडवामुखादिकं गर्भं दधिरे । तथाच मन्त्रवर्णः

'आपो ह यन्महतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।'
(क० शा० ४०।१)

इति । ता आपो नोऽस्माकं शंस्योनाः सुखतमा भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्ष्यं या अन्तरिक्षे बहुधा भवन्ति । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥

यासामपां त्रैवर्णिकदत्तानां देवाः पितृप्रभृतयो दिवि स्वर्गे भक्षणं कुर्वन्ति, भक्षितेन बलेन हविष्यरूपेणापि परिणतानां देवोपयोगित्वं प्रतीयते । तथाच श्रुतिः

'ततः प्रजनं देवा उपजीवन्ति ।'

इति । तत एव मनुष्येभ्य एवोपजीवन्ति नतु विद्यमानमपि स्वयं गृह्णन्ति मेघादावित्यर्थः । याश्चान्तरिक्षे बहुप्रकारा हिमकरकपानीयरूपा भवन्ति । शेषं व्याख्यातम् ॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥

यासामपां मध्ये राजमानो वरुणो याति । किं कुर्वन् जनानां सत्यानृते धर्माधर्मौ पश्यन् ॥

शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । मधुश्चुतः शुचयो याः पावकास्ता न आपः शंस्योना भवन्तु ॥

गतार्थम् ॥

हिरण्यवर्णाः शुचयः पावका विचक्रमुर्हित्वावद्यमापः ।
शतं पवित्रा विततान्यासां ताभिर्मा देवः सविता पुनातु ॥

हिरण्यवर्णाः, शुद्धाः, शुचित्वात्पवित्रत्वापादिकाः, आपः अवद्यमवदानार्हं खण्डनयोग्यं पापं त्यक्त्वा विचक्रमुः विविधं क्रान्ता भूर्लोकमागताः । शतग्रहणमतिबहुत्वोपलक्षणम् । पवित्रा इति लिङ्गव्यत्ययः । अतिविततानि सुभूयांसि च पवित्रीकरणानि रूपाणि आसां यस्मात्तस्मादासामधिपतिः सविता ताभिरद्भिर्मां पुनातु ॥

एता हिरण्यवर्णाःसमाख्याता ऋचः । इत ऊर्ध्वं पावमानीः समाख्याताः षडृचो भविष्यन्ति । तासामृषिः पवमानः । सोमो देवता अर्धाश्रिताधिष्ठातृरूपेण । अनुष्टुप् छन्दः

यः पावमानीरध्येति ऋषिभिः संभृतं रसम् ।
सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥

य: पावमानीरध्येति पवित्रीकरणीरपाम् ।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥

पवित्रीकरणीरपां वाचिका इति कृत्वा ऋच एव पावमान्यः । ऋषिभिर्ज्ञानिभिरेवात्र संभृतो ढौकितो यो रसस्तत्स्वभावाः पावमानीः ऋचो यः पठति, स सर्वमेवान्नादिरसमुत्तममश्नाति भुङ्क्ते स्वभावपवित्रेण वायुनाप्यास्वादितं शोधितं पावितम् । तथा सरस्वती वाक् दुहे दुग्धे पूरयति क्षीरं शुद्धत्वादुपचाराद्धर्मम् । सर्पिरिति स्निग्धत्वसामान्यात् स्वर्गादिकं कामम् । मध्विति नित्यानन्दात्मकमपवर्गं मधुरैकरसत्वात् । उदकमिति क्षीरादिकमुदकप्रभवमित्यर्थः,—इति केचिदन्ये तु उदकशब्देन संतानभावात्मको दुःखाभावो लक्ष्यते इत्याहुः ॥

'पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः ।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हि तत् ॥

पावमान्यः पावयित्र्यः । स्वस्त्ययनीः स्वस्ति अविनाशः अविनाशकारिण्यः आयुष्प्रदा इत्यर्थः । सुदुघाः सुदोहनाः । घृतश्चुतो घृतस्राविण्यः । ऋषिभिर्मन्त्रसारवेदिभिरयं संभृत

एवात्र राशीकृतो रसो या एताः पावमान्यः—यतो ब्राह्मणेषु तदमृतम्, अमरणकारी आयुष्प्रदो भोगासक्तानां, मुमुक्षूणां तु मोक्षदोऽयं रस इत्यर्थः ॥

पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नन्दनम् ।
पुण्यांश्च भक्ष्यान्भक्षयत्यमृतत्वं च गच्छति ॥

तथा पावमान्यः स्वस्त्ययन्यः, याभिरधीताभिर्नरो नन्दनं वनं देवोद्यानं गच्छति प्राप्नोति, तथा भक्ष्यांश्च पुण्यफलभूतान् स्वर्गादिकान् भुङ्क्ते अमृतत्वं च मोक्षलक्षणं लभते ॥

पावमानीर्दिशन्तु न इमं लोकमथो अमुम् ।
कामान् समर्धयन्तु नो देवैर्देवीः समाहृताः ॥

एवं चैताः पावमान्योऽस्माकमिमं पृथिवीलोकममुं च स्वर्गलोकं दिशन्तु दर्शयन्तु, कामांश्च काम्यमानान् सर्वानर्थानस्माकं सम्यग्वर्धयन्तु देवैर्द्योतनैर्ऋषिभिः समाहृता एकीकृताः सत्यः ॥

येन देवाः पवित्रेण आत्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु नः ॥

येन पवित्रीकरणेन उदकविशेषात्मना देवा आत्मानं पवित्रीकुर्वन्ति, तेनानन्तधारेणास्मान् पावमान्यः पुनन्तु ॥

मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥

आथर्वणस्य भिषज आर्षम् । अनुष्टुप् । आप उच्यन्ते ऋषिणा । शपथ्याच्छपथप्रभवात् पड्वीशात्पाशात् किल्बिषाच्च । तथा वरुण्याद्वरुणपाशनिमित्तात् येन पापेन सता वरुणः पाशैर्बध्नाति तस्मात् किल्बिषात् तन्निमित्ताच्च पाशात् । उतेति समुच्चये । तथा यमस्य च संबन्धिनः पाशात्पापाच्चापो विमुञ्चन्तु माम् । येन पापेन सता यमः प्रभवति तद्यमस्य पाशः । किंच सर्वस्माद्देवकिल्बिषात्, अवश्यकर्तव्यं यद्देवानां यागहोमादिकं तदकरणाद्यत्पापमुपजायते तद्देवकिल्बिषम्, तस्मात्समग्रात्पापादापो मां मुञ्चन्तु ॥

यज्जाग्रद्यत्सुप्तः पापमभिजगाम ।
सर्वस्मान्मा तस्मादेनसः प्रमुञ्चतु ॥

गायत्री । आप उच्यन्ते । यत्पापं जाग्रदहमभिजगाम आभिमुख्येन कृत्वा कृतवान्, यच्च

सुप्तः सुप्त इव सुप्तः अज्ञानात् तस्मात्सर्वस्मा-देनसो मामापः प्रमुञ्चतु विमुञ्चन्त्वित्यर्थः ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥

विष्णोर्व्यापकस्य परमं ब्रह्मरूपं पदं मोक्ष-लक्षणं प्राप्नुयामेत्याशास्महे ।

संमार्जनमन्त्रा व्याख्याताः । संमार्जनादन-न्तरं 'ऋतं च सत्यम्' इत्यादिकमघमर्षणसूक्तं जपेत् सृष्टिस्थितिसंहारकारिणं सूक्ताभिधेयं प्रजापतिं ध्यायन् । सूक्ताभिधेयाश्च सृष्टि-स्थितिप्रलयाः प्रजापत्यधीना इत्येतदुपनिषत्सु तत्र तत्र प्रतिपादितम् । प्रजापतिर्हि अनेक-शक्तिखचितः संकल्पमात्रेण त्रैलोक्यं स्वतनो-रेव सृजति, संहारसमये च स्वात्मन्येव पुनः शक्तिरूपेणोपसंहरति । तथाच श्रुतिः

'हिरण्यगर्भः समवर्तताग्रे ।' (ऋ० १०।१२१।१)

इति ।

'असद्वा इदमग्र आसीत्ततो वै सदजायत ।
तदात्मानं स्वयमकुरुत ।' (तै० आ० ८।७।१)

इति । ब्राह्मणमपि

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥
(श्वेत० ६।१८)

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥'
(मु० २।१।३)

इति । तदेतत्सृष्टिकर्तृकत्वापन्नप्रजापतिप्रकाशकं सूक्तं व्याचक्षते ॥

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्रिरजायत ततः समुद्रो अर्णवः ॥
समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥

ऋषिरघमर्षणः । अनुष्टुप् छन्दः । प्रजापतिर्देवता जगत्स्रष्टृत्वेन सूक्तजपसमये ध्यातव्यः । तपो ज्ञानं 'सम्यग्ज्ञानमयं तपः ।' इति श्रुतेः । तस्मादभीद्धात्स्रष्टव्यपदार्थसांमुख्येन दीप्ताद्वर्तमानात् ऋतं च सत्यं चाजायत । जगत्सूत्रभूतः प्राणः सत्यं 'प्राणो वै सत्यम्' इति श्रुतेः । ऋतमपि प्राणस्वरूपमेव गतिमत्त्वात् । ऋतमिति हि गत्यर्थस्यार्तें रूपम् । मनोऽपि ऋतं सत्यं च सत्यसंक-

रूपत्वात् विद्युद्वत्सुवेगगामित्वाच्च । संकल्पमात्रात् मनःसहितः प्राणः प्रजापतिना निर्मित इत्यर्थः । ततः प्राणोत्पत्त्यनन्तरं तत एव संकल्पमात्रात्प्राजापत्याद्रात्रिरजायत । अञ्जनपुञ्जवर्णसाम्याद्रात्रिशब्द आकाशे वर्तते। प्राणोत्पत्त्यनन्तरं तत्र तत्राकाशोत्पत्तिश्रुतिरुपनिषत्सु । तत आकाशोत्पत्त्यनन्तरं समुद्रो अर्णवः जलमर्णवरूपं गतियुक्तं पोप्लूयमानं जलं जातमित्यर्थः । समुद्रग्रहणं भूतत्रयस्यान्यस्याप्युत्पत्तिं लक्षयति । तथाच श्रुतिः 'आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी' (तै० २।१) इति । क्रमानियमं च तत्र तत्र दर्शयन्नृषिरविद्यानिर्मितत्वेन भेदविवर्तस्याद्वैते क्रमस्यापारमार्थिकतामाह—समुद्रादर्णवात् संवत्सरः सम्राद् 'अधिरीश्वरे' (१।४।९७) 'यस्मादधिकम्' (२।३।९) इति समुद्रशब्दात्सप्तम्यां जातायां व्यत्ययेन पञ्चमी । समुद्रग्रहणं च भूतपञ्चकोपलक्षणम् । अधिभूतेषु सम्राद् जातः भूतस्वामी भूत इत्यर्थः । किं कुर्वाणः सम्राडजायत । अहोरात्राणि तत्परिच्छेदकारिणौ सूर्याचन्द्रमसौ विदधत् जनयन् । कथं

विराड् जनयति, विनियुङ्क्ते चादित्यादिकं कार्यशेषेषु इति चेत् तत्राह यतोऽसौ मिषतो निमेषोन्मेषवतो विश्वस्य समस्तभुवनस्य धाता निर्मातातो विदधाति, तस्य च वशीतिकृत्वा यथायोग्यत्वं युङ्क्ते । कथं विदधत् । यथापूर्वं पूर्वकल्पानतिक्रमेण अनादिरेतदीयः सर्गप्रलय इत्यर्थः । अथवा यथापूर्वं पूर्वकर्मानुसारेण, तेन न मुक्तान् शरीरादिना योजयति । यद्वा यथापूर्वं यथाक्रमं, न सर्वान् तुल्यान् निर्मितवान् उपभोगाभावप्रसङ्गात् किं तर्हि उच्चावचान् अकल्पयत् कल्पितवान् । अथवा पृथिवीमन्तरिक्षं च स्वश्च स्वर्गमिति लोकत्रयं यथाक्रममकल्पयदिति संबन्धः । पृथिव्या उपर्यन्तरिक्षं नक्षत्रादिलोकं, ततः पञ्चविधं पूर्वप्रदर्शितं स्वर्गमिति । किं तस्य जगन्निर्माणे प्रयोजनमिति चेदत आह दिवमिति 'दिवु क्रीडायाम्' क्रीडयेत्यर्थः ।

एवं 'संमार्जनानन्तरभूतमृतं च सत्यं चेत्येतद्ध्यानयुक्त आवर्तयेत्' इति काठकश्रुतेः अघमर्षणसूक्तजपः कर्तव्यः । तदनन्तरं प्राणसंयमः । तथाच याज्ञवल्क्येन

'मार्जनं प्राणसंयमः' । (१।२२)

इति मार्जनोत्तरकालेऽपि प्राणसंयमश्चोदितः। किंच स्नानादावप्यस्योपयोगोऽस्ति । तथा च वसिष्ठेन प्रायश्चित्तार्थत्वमस्य पापक्षयहेतुत्वेनोक्तम्

'आवर्तयेत्सदा युक्तः प्राणायामान्पुनः पुनः ।
आलोमाग्रान्नखाग्राच्च तपस्तप्स्यन्ननुत्तमम् ॥
प्राणायामान्धारयेत्रीन्यथाशास्त्रमतन्द्रितः ।
अहोरात्रकृतं पापं तत्क्षणादेव नश्यति ॥'

इति । तथाच

'अहोरात्रं च याञ्जन्तून्हिनस्त्यज्ञानतो द्विजः ।
ततः स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥'

इति । योगशास्त्रेषूपनिषत्सु च प्राणायामैरेव पवनजये सति भूतेन्द्रियजयः प्राधान्येन प्रतिपादितः। तेनास्य प्रयत्नतरेण लक्षणमभिधेयम् । तच्च तथैव याज्ञवल्क्यादिभिः प्रतिपादितम् ।

'गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम् ।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥' (या० १।२३)

इति । वसिष्ठोऽपि

'व्याहृतिप्रणवैर्युक्तां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥'

इति । तत्र कुम्भकेनैव प्राणापानवृत्तेर्निरोध-मिच्छन्ति सन्ध्योपासनप्रायश्चित्तादिषु, समाधौ कुम्भकेन रेचकेन च । कुम्भको बाह्यवायोराचमने क्रियमाणे उदरस्य कुम्भवत्पूरणाद्भवति, रेचकस्त्वान्तरवायोर्निःसारणादुदरस्य रिक्ततापादनात् । तत्रायं क्रमः-ओं भूः ओं भुवः ओं स्वः ओं महः । केचित्तु तकारान्तं महच्छब्दं पठन्ति ओं महदिति । तथाच पातञ्जलभाष्ये

'ब्राह्मस्त्रिभूमिको लोकः प्राजापत्यस्ततो महान् ।
माहेन्द्रश्च स्वरित्युक्तो दिवि तारा भुवि प्रजाः ॥'(३।२६)

इति । ओं जनः ओं तपः ओं सत्यम् । ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओं आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

एतद्यावता कालेन त्रिः पठ्यते तावन्तं कालं प्राणनिरोधः प्राणायामः सोऽभ्यसनीयः । एतं च प्राणायाममुपक्रमेऽपि सन्ध्योपासनस्येच्छन्ति । इयांस्तु विशेषः

'त्रयः प्राणायामाः पञ्चदशमात्रापरिमाणाः'

इत्ययं गौतमोक्तः प्रथममनुष्ठेयः, पश्चादयं गौतमीयव्यतिरेकेणात्राधिकारात् । यथोक्तं

'प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।'

एवमेव चास्माकं वृद्धेभ्य आगमः—उपक्रम इव सन्ध्योपासनस्य वयमुपनयनकाल एव द्विविधमपि प्राणायामं यत्नेनानुष्ठापिता वेदार्थविदुत्तमैः पितृपादैः । तत्र व्याहृतीनां सावित्र्याश्चार्थो व्याख्यातो ब्रह्मरूपः । लोकसप्तकमपि हि ब्रह्मणो रूपमोंकारसावित्रीवाच्यस्योक्तम् । आपो ज्योतिरित्यस्यापि सर्वाङ्गोपरिस्थितत्वात् प्राधान्याच्च साक्षाद्ब्रह्मशब्दवत्तया शिरःशब्दवाच्यस्य ब्रह्मरूपमेवाभिधेयं ब्रह्माद्वैते ज्ञानकाण्डार्थं, द्वैतेऽपि कर्मकाण्डार्थम् । तत्र ब्रह्मेति विशेष्यपदम् । आप इत्यादीनि चत्वारि विशेषणपदानि । 'आप्लृ व्याप्तौ' इत्यस्यापः, व्यापकः सर्वकार्यानुबन्धित्वादतो ब्रह्मण एव व्यापकत्वमुक्तम् । ज्योतिरिति ज्ञानप्रकाशकत्वमुक्तम् । रस इति सारत्वम् । अमृतमिति नित्यानन्दात्मकत्वं परमविनाशित्वं च । भूर्भुवःस्वरिति लोकत्रयात्मकत्वम् । अस्य च शिरसः प्रभावोऽप्युक्तः

'षोडशाक्षरकं ब्रह्म गायत्र्यास्तु शिरः स्मृतम् ।
सकृदावर्तयन्विप्रः संसारादाशु मुच्यते ॥'

छन्दः शिरसो नास्ति यजुष्ट्वात् । ऋषिस्तु प्रजापतिः । देवतास्त्वग्निब्रह्मवायुसूर्याः । तथाच पाराशर्यः

'गायत्र्यास्तु शिरः प्रोक्तमापो ज्योती रसोऽमृतम् ।
तत्र प्रजापतेरार्षं छन्दोहीनं यजुः स्मृतम् ॥
ब्रह्माग्निवायुसूर्याश्च देवतास्तस्य कीर्तिताः ।'

इति । प्राणायामादनन्तरं समन्त्रकमाचमनं कुर्यात् । यथाह शङ्खः

'एवं संमार्जनं कृत्वा प्रणायामांश्च धर्मवित् ।
उपस्पृशेत्ततः पश्चान्मन्त्रेणानेन सन्ध्ययोः ॥
आपश्चरसि भूतेषु गुहायां सर्वमूर्तिषु ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् ॥'

इति । ब्रह्मोच्यते तद्रूपा आपः स्तोतुम् । त्वमेव सर्वभूतेषु चरसि । तथाहि त्वमेवापः । त्वमेव गुहायां हृदयाकाशे मन इत्यर्थः । सर्वेन्द्रियोपलक्षणं चैतत् । सर्वासु च मूर्तिषु ये स्थिता जीवात्मानस्तेऽपि त्वमेव । त्वं यज्ञस्त्वं वषट्कारस्त्वमेव साध्यसाधकरूप इत्यर्थः । त्वं ज्योतिस्त्वं रसस्त्वममृतं, यश्च त्वं ता आप

इति । द्वितीयमब्ग्रहणमाचम्यमानास्वप्सु ब्रह्म-रूपोपसंहारार्थम् । गौतमोऽप्याह

'अहश्च मादित्यश्च पुनातु' इति सायम् ।
'रात्रिश्च मा चन्द्रमाश्च पुनातु' इति प्रातः ।

आचमेदिति शेषः । प्राणायामादनन्तरं

'सूर्यस्य चाप्युपस्थानं..................।'

इति दर्शनात्

'उदु त्यं जातवेदसं चित्रं देवेत्यृचौ पठन् ।
द्विजः प्रदद्याद्विधिवद्भास्कराय जलाञ्जलिम् ॥'

इति वचनात्

'उदु त्यं जातवेदसमृषिः प्रस्कण्व उच्यते ।
गायत्रं छन्द आख्यातं देवता सूर्य उच्यते ॥
चित्रन्देवेत्यत्र त्रितः कुत्सो वा कीर्त्यते ऋषिः ।
त्रिष्टुप् छन्दो दैवतं च सूर्योऽस्याः परिकीर्तितः ॥'
'अतिरात्रेऽश्विने शस्त्रे नियोगोऽस्यास्तथा जपे ।'

इति स्मरणात् 'उदु त्यं' 'चित्रन्देवानाम्' इति द्वाभ्यामादित्यमुपतिष्ठेत जलाञ्जलिमादाय ॥

उदुत्यं जातवेदसं देवं वहन्ति केतवः
दृशे विश्वाय सूर्यम् ॥

त्यद् शब्दः सर्वनाम । उशब्दो निपातः पाद-पूरणार्थः । उदित्युपसर्गो वहन्तीत्यनेन संब-ध्यते । त्यं तं, जातवेदसं जातप्रज्ञानं जातधनं

वा, देवं दानादिगुणयुक्तं, सूर्यं विक्रान्तिमन्तं केतवो रश्मयोऽश्वा वा वहन्ति । किमर्थं वहन्ति । दृशे दर्शनाय । कस्य । विश्वाय षष्ठ्यर्थे चतुर्थी विश्वस्य सर्वस्य जगत्त्रयस्य ॥

चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥

आदित्यो ब्रह्म । स चात्र परापररूपेण स्थितः स्तूयते । तत्रापररूपेण तावदुदयकालादारभ्य स्तुतिमाह । चित्रमिति क्रियाविशेषणम् । यश्चित्रमाश्चर्यभूतमुदगादुदगमत् शार्वरं तमोऽपहृत्य अग्न्यादितेजश्चापहृत्य, देवानां च द्योतमानानां रश्मीनामनीकं मुखमादाय समूहं वा । कः । सूर्यः । कीदृशः । जगतो जङ्गमस्य चक्षुः । किंवा सामान्येनोच्यते, मित्रावरुणाग्निप्रभृतीनामपि नेत्रम् । यश्च द्यावापृथिव्यौ आप्रा आ समन्तात् अप्राः पूरितवान् अन्तरिक्षं च । पररूपेण स्तौति—आत्मा जगतो जङ्गमस्य, तस्थुषः स्थावरस्य । सूर्याद्वैतमनेनोक्तं ब्रह्मादित्यरूपेण भावनीयम् । तथाच श्रुतिः

'ये वै तमादित्यं पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिः स ब्रह्म ।'

इति ॥

'उपतिष्ठेत चादित्यं मन्त्रैस्तद्दैवतैर्द्विजः ।'

इति वचनादन्यैरप्यादित्यदेवताकैर्मन्त्रैरादित्यः स्तोतव्य इति प्रयुज्यमाना अन्येऽपि व्याख्यायन्ते ।

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

छन्दो जगती । ऋषिर्वामदेवः । परमात्मरूपेण स्तूयमानः सूर्यो देवता । हन्ति ध्वान्तं, गच्छति चाध्वानमधिदैवरूपेण वाविद्यामिति हंसः । तथाचोक्तं

'हंसो नारायणः प्रोक्तो हंस आत्मेति निश्चितः ।
स एवात्मा स भगवान्विष्णुस्तद्ब्रह्म सर्वगम् ॥'

इति । शुचयो दीप्तयो रश्मयः, स्वर्गो वा शुचिः, नित्यज्ञानसुखं वा तत्र सीदति शुचिषत् । तथा वासयति जगत् वृष्ट्यादिद्वारेण विवर्तपरिणतिमुखेन अध्यात्मरूपेणेति वसुरादित्यः । अन्तरिक्षे सीदति वाय्वादिरूपेणेत्यन्तरिक्षसत्, अध्यात्मरूपेण वा सर्वजीवात्मनामन्तरिक्षे हृदयाकाश अन्तर्यामिरूपेण सीदतीत्यन्तरिक्षसत् । होतेति ह्वञो रूपम् । सच

प्राणिनां रात्रौ प्रसुप्तानां व्यापारसिद्धिषु सांमु-
ख्यापादनादाहूतेर्वाधिदैवरूपेणाध्यात्मरूपेण
आह्वयति स्पर्धयते जुहोतीति वा अविद्या-
मधिक्षिपतीत्यर्थः। वेद्यां सीदत्यग्निरूपेणे-
ति—वेदिषत्। अध्यात्मरूपेणापि 'विद ज्ञाने'
वेद्यां नित्यज्ञानरूपायां सीदतीति वेदिषत्,
अतिथिः सन् दुरोणे गृहे जीवात्मनिवासे सर्व-
शरीरे वा सीदति। यद्वा द्रोणकलशे सो-
मरसाधानेऽग्न्यादिदेवताभावेनेत्यतिथिर्दुरोण-
सत्। अथच ब्रह्माण्डस्थस्य सर्वशरीरगस्य
चानित्यत्वादतिथिः, अतिथिरप्यनित्यः यतो
गृहाद्गृहान्तरं याति। नृषु मनुष्येषु अन्तर्या-
मित्वेन प्राणादिभावेन च सीदतीति नृषत्।
नृग्रहणं चेतनोपलक्षणार्थम्। अधिदैवेऽपि
नृषु सर्वचेतनेषु सीदति प्रकाशकत्वेन नयन-
सहकारितयेति नृषत्। वरे द्युस्थाने सीदत्य-
धिदैवात्मनेति वरसत्। तथाच ब्राह्मणम्

'वरं वा एतत्सदनं यस्मिन्नेष आसन्नस्तपति।'

इति। अथवा वरेषूत्कृष्टेषु स्थानेषु नन्दनवन-
महदादिलोकप्रभृतिषु सीदति क्रीडति इन्द्रा-

द्भिावेनेति वरसत् । अध्यात्मपक्षे ऋते सत्ये नित्यचैतन्यात्मके तिष्ठतीति ऋतसत् । अधिदैवपक्षे वा ऋते यज्ञे सौर्यादिके सीदति देवतात्वेनेत्यृतसत् । व्योम्न्यन्तरिक्षे हृदयाकाशे वा सीदतीति व्योमसत् । स्तुतौ पौनरुक्त्ये न दोषः । यथोक्तं

'वक्ता हर्षभयादिभिराकृष्टमनास्तथा स्तुवन्निन्दन् ।
यत्पदमसकृद्ब्रूयात्तत्पुनरुक्तं न दोषाय ॥'

इति । इहापि वेदात्मा वक्ता । तथाच श्रुतिः

'यं सर्वे वेदा न विदुर्यस्य सर्वे वेदाः शरीरं सोऽन्तर्याम्यमृतः ।'

इति । अथवा पौनरुक्त्योच्चारणेनेदं बोधयति यदुत सर्वः पदग्रामो ब्रह्माभिधायितयैवंप्राय इति । अप्सु जायते इत्यब्जाः

'अप एव ससर्जादौ...............।' (१।८)

इत्यादिमानवशास्त्रानुसारेणादित्योऽब्जाः । अथवा समुद्रतीरस्थदृष्ट्या अब्जाः । तथाच श्रुतिः

'अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति ।'

इति । वैद्युताग्निरूपो वडवाग्न्यात्मकः सूर्यस्य स्वभावोऽब्जाः । गवि स्वर्गे इन्द्रादिरूपेण, अ-

न्तरिक्षे वा भानुस्वभावेन, पृथिव्यां वा अन्नौषध्यादिरूपेण जायत इति गोजाः । ऋते सत्यज्ञाने जायते तिष्ठतीति ऋतजाः । तथा च श्रुतिः

'सत्यं ज्ञानमनन्तं ब्रह्म ।' (तैत्ति० २।१)

इति । एवमद्रौ मेरौ जायते उदयसमये उपलभ्यते इत्यद्रिजाः । किंवा बहूच्यते ऋतमादित्य एव ऋतं सर्वगतं परब्रह्मरूपं यत् स सूर्य इति । तत्परमं ब्रह्म प्राप्नुयामेति वाक्यं पूरयितव्यम् । बृहद्व्यापकम् ॥

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् ।
देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥

अनुष्टुप् छन्दः । सूर्यो देवता । उदित्युपसर्गः अगन्मेत्यनेन संबध्यते । वयमुत्तमं ब्रह्मलक्षणं ज्योतिरुदगन्म । आशीर्लिङोऽर्थे व्यत्ययेन लुङ् उदगन्मेत्याशास्महे ऊर्ध्वं गम्यास्म इत्यर्थः । किं कुर्वन्तः । दीपादिज्योतिरन्तरापेक्षया उत्तरमुत्कृष्टमुपरिवर्ति वा ज्योतिः सूर्यं पश्यन्तो ध्यायन्तः अनेन सूर्यध्यानेनेत्यर्थः । अन्यच्च कीदृशं सूर्यं पश्यन्तः । तमसस्परि तमस

उपरि वर्तमानं तमसोऽन्धकारस्याविद्यारूपस्य च नाशकमित्यर्थः। अन्यच्च कीदृशम्। देवं दानादिगुणयुक्तं द्योतमानं वा। तथा देवत्रा देवानां त्रिदशब्राह्मणलक्षणानां त्राणात्। 'त्रैङ् पालने' 'आतोऽनुपसर्गे कः' (३।२।३) आकारो वर्णागमः 'सुपां सुलुक्' (७।१।३९) इति द्वितीयालुक्। नतु देव एव देवत्रा 'देवपुरुषमनुष्येभ्यस्त्रा' (५।४।५६) इति तद्धितस्त्राप्रत्ययः देवमित्यनेनैव गतार्थत्वात्॥

मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि ।
द्युम्नं चित्रश्रवस्तमम् ॥

गायत्री

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्।
मित्रः कृष्टीरनिमिषाभिचष्ट मित्राय हव्यं घृतवद्विधेम ॥

इयं त्रिष्टुप्। द्वयोरपि मित्रादित्यौ देवते। अनयोः क्रमेण भाष्यम्। मित्रस्यादित्यस्याकारणस्निग्धस्य श्रवो माहात्म्यं ध्यायामेत्यध्याहारः। श्रूयत इति श्रवः उपनिषत्प्रसिद्धं परब्रह्मरूपमित्यर्थः। कीदृशं श्रवः। द्युम्नं द्योतमानम्। तथा सानसि समुच्छ्रितम्, चित्रश्रवस्तमं चित्रतममाश्चर्यतमं श्रवस्तमं च प्रसिद्धतमं सर्वजीवा-

त्मभिरन्तर्यामितयाधिदैवरूपेण चेत्यमानत्वात्। सर्वोऽपि हि मन्यते—केनाप्यहं प्रेरितः कर्म करोमीति । यथोक्तं

'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेच्छ्वभ्रं वा स्वर्गमेव वा ॥'

इति । कीदृशस्य । चर्षणीधृतः चर्षणयो मनुष्यास्तान्धारयति वृष्ट्यादिद्वारेण अधिदैवरूपेण, अध्यात्मरूपेण तु चैतन्यविवर्तपरिणाम्मात्मना ॥

अथोत्तरा मित्रो जनानीति । जनानीति लिङ्गव्यत्ययः, जायन्त इति जनास्ताना-तयति विस्तारयति क्रियासु प्रवर्तयतीत्यर्थः । किं कुर्वाणः । न परान् प्रकाशयन्नेव क्रियाः कारयति यावता वेदादिरूपेण ब्रुवाणोऽपि विदधत् निषेधंश्च । मित्रः पृथिवीं द्यां च दाधार व्यत्ययेन लिट् धारयते वृष्ट्यादिद्वारेण । तथा कृष्टीर्मनुष्यान् मित्र एवानिमिषमनिमीलितं कृत्वा अभिचष्टे आभिमुख्येन पश्यति—कः सुकृतं करोति दुष्कृतं वा यथोक्तमस्माभिर्विष्णुस्तोत्रे

'रविरपि सकलानां कर्मणां साक्षिभूतः ।'

इत्यादि । किंच न परं वयं मित्रं ध्यायामो यावतास्मै मित्राय सूर्यायाग्निरूपाय वयं सायं प्रातश्च प्रतिदिनं हव्यं हवनीयं घृतसहितं हविर्विधेम दद्म इत्यर्थः ॥

इत ऊर्ध्वमुदकतर्पणमृषिविहितमवश्यं कर्तव्यम् । तत् मतभेदेन प्रदर्श्यते । तत्र बौधायनस्तावदाह

'अतोऽनन्तरं देवतास्तर्पयति । अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः सर्प इत्येतानि प्राग्द्वाराणि सदैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि वसूंश्च तर्पयामि ।

तपनोऽर्यमा भगः सविता त्वष्टा वायुरिन्द्राग्नी इत्येतानि दक्षिणद्वाराणि सदैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि रुद्रांश्च तर्पयामि ।

मित्र इन्द्रो निर्ऋतिः पूषा आपो विश्वे देवा ब्रह्मा विष्णुरित्येतानि प्रत्यग्द्वाराणि सदैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि आदित्यांश्च तर्पयामि ।

वसवो वरुणोऽजैकपादहिर्बुध्न्यः पूषाश्विनौ यम इत्येतानि उदग्द्वाराणि सदैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि साध्यांश्च तर्पयामि ।

ब्रह्माणं तर्पयामि, प्रजापतिं चतुर्मुखं तर्प० परमेष्ठिनं तर्प० ब्रह्मपार्षदान् तर्प० ब्रह्मपार्षदीश्च तर्प० । ओं भूः पुरुषं तर्प० ओं

भुवः पुरुषं त० ओं स्वःपुरुषं त० ओं भूर्भुवःस्वःपुरुषं त० । ओं भूस्त० ओं भुवस्त० ओं स्वस्तर्पयामि ओं महस्त० ओं जनस्त० ओं तपस्त० ओं सत्यं त० । ओं भवं देवं त० ओं शर्वं देवं त० ओं ईशानं देवं त० ओं पशुपतिं देवं त० ओं रुद्रं देवं त० ओं उग्रं देवं त० ओं भीमं देवं त० ओं महादेवं त० । ओं भवस्य देवस्य पत्नीं त० ओं शर्वस्य देवस्य पत्नीं त० ओं ईशानस्य देवस्य पत्नीं त० ओं पशुपतेर्देवस्य पत्नीं त० ओं रुद्रस्य देवस्य पत्नीं त० ओं उग्रस्य देवस्य पत्नीं त० ओं भीमस्य देवस्य पत्नीं त० ओं महादेवस्य पत्नीं त० । ओं भवस्य देवस्य सुतं त० ओं शर्वस्य देवस्य सुतं त० ओं ईशानस्य देवस्य सुतं त० ओं पशुपतेर्देवस्य सुतं त० ओं रुद्रस्य देवस्य सुतं त० ओं उग्रस्य देवस्य सुतं त० ओं भीमस्य देवस्य सुतं त० ओं महादेवस्य सुतं त० ओं रुद्रपार्षदान् रुद्रपार्षदीश्च । ओं स्कन्दं सनत्कुमारं षष्ठीं विशाखं स्कन्दपार्षदान् स्कन्दपार्षदीश्च तर्पयामि । विघ्नांस्तर्प० वीरं त० शीलं त० वीरदन्तं त० हस्तिमुखं त० विघ्नपार्षदान् विघ्नपार्षदीश्च । विष्णुं त० नारायणं श्रियं देवीं सरस्वतीं पुष्टिं विष्णुपार्षदान् विष्णुपार्षदीश्च । यमं त० कालं वैवस्वतं चित्रगुप्तं वैवस्वतपार्षदान् वैवस्वतपार्षदीश्च । भरद्वाजं त० विद्यां धन्वन्तरिं धन्वन्तरिपार्षदान् धन्वन्तरिपार्षदीश्च ॥

अथ ऋषयः । ऋषींस्तर्पयामि महर्षींस्त० परमर्षींस्त० देवर्षींस्त० ब्रह्मर्षींस्त० श्रुतर्षींस्त० तापसर्षीन् सप्तर्षीन् कण्वर्षीन् ऋषिकान् ऋषिपत्नीः ऋषिपुत्रकान् काण्वं बौधायनं आपस्तम्भं सूत्रकारं सत्याषाढं हिरण्यकेशं व्यासं प्रणवं गायत्रीं सावित्रीं सरस्वतीं छन्दांसि ऋग्वेदं यजुर्वेदं सामवेदं अथर्ववेदं

अथर्वाङ्गिरसं इतिहासपुराणान् सर्ववेदगणान् सर्वभूतानित-र्पयामि ।'

इति ॥

याज्ञवल्कीययोगशास्त्रात्

'सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥
एते ब्रह्मसुताः सप्त मनुष्याः परिकीर्तिताः ।'

कात्यायनः

'मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ॥'

अथ पुराणम्

'तर्पणं देवतानां च ऋषीणां च ततः पुनः ।
कृत्वाधिकारी भवति पितॄणां तर्पणे सदा ॥'

एवमेव च स्नानकाले देवतानां तर्पणमवश्यं कर्तव्यमिति । अथाश्वलायनोक्तम्

'देवतास्तृप्यन्तु अग्निस्तृप्यतु वायुस्तृप्यतु सूर्यः प्रजापतिः ब्रह्मा वेदाः ऋषयः ओङ्कारो वषट्कारो व्याहृतयः गायत्री सावित्री सरस्वती यज्ञाः । द्यावापृथिव्यौ तृप्यताम् । अन्त-रिक्षं नक्षत्राणि सांख्याः सिद्धाः साध्याः नद्यः गिरयः क्षे-त्रौषधिवनस्पतयः गन्धर्वाः अप्सरसः विप्राः वयांसि गावः यक्षाः रक्षांसि भूतान्येवमन्तानि तृप्यन्तु ॥

अथ ऋषयः । शतर्चिनः माध्यमाः गृत्समदः विश्वा-मित्रः वामदेवः भरद्वाजः वसिष्ठः प्रगाथाः पावमान्यः क्षुद्र-

सूक्ता महासूक्तास्तृप्यन्तु । वैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यन्तु । जानकिबाहविगार्ग्यगालवगौतमशौनकशाण्डिल्यबाभ्रव्यमाण्डूकेयास्तृप्यन्तु । गार्गी वाचक्नवी तृप्यतु । वडवा प्रातिथेयी सुलभा मैत्रेयी तृप्यतु । कहोडं कौषीतकं महाकौषीतकं आश्वलायनं ऐतरेयं महैतरेयं पैङ्ग्यं वाष्कलं अजातवक्रं औदवाहिं महौदवाहिं सौजामिं शौनक तर्पयामि । ये चान्ये आचार्यास्ते सर्वे तृप्यन्तु प्रतिपुरुषं पितॄंस्तर्पयित्वा ॥'

अथेतिहासः 'ब्रह्मणे नमः विष्णवे नमः महेश्वराय नमः वह्नये सूर्याय सोमाय वरुणाय वायवे यमाय कुबेराय इन्द्राय पृथिव्यै अद्भ्यः तेजसे वायवे आकाशाय अग्नये आदित्याय वरुणाय चन्द्रमसे कुमाराय भौमाय विष्णवे बुधाय इन्द्राय बृहस्पतये सरस्वत्यै शुक्राय प्रजापतये शनैश्चराय गणपतये राहवे रुद्राय केतवे ब्रह्मणे ध्रुवाय अनन्ताय अगस्त्याय ध्रुवाय कालाय विश्वकर्मणे प्रजापतिभ्यः वसुभ्यः रुद्रेभ्यः आदित्येभ्यः मरुद्भ्यः साध्येभ्यः ऋषिभ्यः देवर्षिभ्यः ब्रह्मर्षिभ्यः राजर्षिभ्यः सिद्धेभ्यः विद्याधरेभ्यः गन्धर्वेभ्यः नागेभ्यः वैनतेयेभ्यः अप्सरोभ्यः समुद्रेभ्यः पर्वतेभ्यः नक्षत्रेभ्यः नक्षत्रदेवताभ्यः

देवमातृभ्यः देवपत्नीभ्यः देवकन्याभ्यः वेदेभ्यः वेदाङ्गेभ्यः यज्ञाङ्गेभ्यः धर्मार्थकाममोक्षेभ्यः सप्तप्रणेतृभ्यः सत्त्वेभ्यः दिग्भ्यः विदिग्भ्यः दिक्पतिभ्यः तीर्थेभ्यः नदीभ्यः सप्तभ्यो लोकेभ्यः सप्तभ्यः पातालेभ्यः विश्वेभ्यो-देवेभ्यः श्रियै सरस्वत्यै दिवाचरेभ्यो भूतेभ्यो नमः नक्तञ्चरेभ्यो भूतेभ्यो नमः ॥'

अथ बौधायनः

'दर्भेष्वासीनो दर्भान्धारयमाणः प्राङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेत् शतकृत्वो वापरिमितकृत्वो वा'

इति । प्रणवव्याहृतियुक्तां गायत्रीं च जपेत् ।

'ततोऽक्षसूत्रमादाय तेनैव गणयेज्जपम् ।
नीचैर्जपं बुधः कुर्यात्सावित्र्यास्तु विशेषतः ॥
सावित्रीं जपमानस्तु स्वर्गं गच्छति मानवः ।
शान्त्यर्थं मानसं जप्यमुपांशु स्याच्च पौष्टिकम् ॥
अभिचारे सशब्दं तु ह्युदक्प्राग्दक्षिणामुखम् ।
ध्यायेत मनसा मन्त्रं जिह्वौष्ठं नच चालयेत् ॥
न कम्पयेच्छिरोग्रीवं दन्तान्नैव प्रदर्शयेत् ।
पिण्डीकृत्येन्द्रियग्रामं मन्त्रार्थधृतमानसः ॥
स्वरवर्णपदवाक्यैः शुद्धमावर्तयेज्जपम् ।
दशभिर्जन्मचरितं शतेन च पुराकृतम् ॥
त्रियुगोत्थं सहस्रेण गायत्री हन्ति किल्बिषम् ।
विना दर्भैश्च यत्स्नानं यच्च दानं विनोदकम् ॥

असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत् ।
हिरण्यदन्तमणिभिर्जप्यं शतगुणं भवेत् ॥
सहस्रगुणमिन्द्राक्षै रुद्राक्षैरयुतं भवेत् ।
नियुतं प्रयुतं वा स्यात्पद्माक्षैस्तु न संशयः ॥
पुत्रजीवकजप्यस्य परिसंख्या न विद्यते ।'

'स एष एतामेवाहरहरहोरात्रं सन्धिषूपतिष्ठमानो ब्रह्मपुत्रो ब्राह्मणः शास्त्रमनुवर्तमानो ब्रह्मलोकमभिजयति य एवं वेद ॥'

यं ध्यायन्ति चिदात्मानं सततं जप्यपूर्वकम् ।
सोऽस्तु वः श्रेयसे नित्यं जगदादिरजोऽव्ययः ॥

इति प्रथमा काण्डिका ॥ १ ॥

अथ

द्वितीया कण्डिका ।

ब्रह्मचारिणोऽग्नीन्धनमुक्तम् । तत्रेतिकर्तव्यतामाह

विभूरसीत्यनुवाकेनाग्निमुपस्थाय एधोसीति समिधमादधाति, समिदिति द्वितीयाम्, इदमहमिति तृतीयाम्-इदमहमग्नौ समिधमभ्यादधाम्यग्ने सर्वव्रतो भवामि, इदमहमग्नौ समिधमाहार्षं बृहते जातवेदसे स मे श्रद्धां च मेधां च दीर्घं चायुर्जातवेदाः प्रयच्छत्विति चतुर्थीम्॥१

समिदिति द्वितीयामित्यादौ सर्वत्र समिधमादधातीति संबन्धः। एधोऽसीति प्रतीकेन एधिषीमहीत्यन्तस्य ग्रहणम्, एवं समिदसीत्यनेन समेधिषीमहीत्यन्तस्य, इदमहमित्यनेन भवामीत्यन्तस्य । चतुर्थः सकलः पठितः ॥

तेजोऽसीत्यग्निं, तेजो मयि धेहीत्यात्मानम् ॥ २ ॥

अत्र योग्यत्वादनुमन्त्रयेदित्यध्याहारोऽग्निमात्मानमिति कर्मनिर्देशात् । तथाचान्यत्र

परिभाषा दृश्यते 'कर्मणि निर्दिष्टो मन्त्रोऽनु- मन्त्रणे ।' इति । इह च न समिदाधानमन्त्रा- न्तर्गतयोस्तेजोऽसि तेजो मयि धेहीत्येतयो- र्ग्रहणं समिदाधान एव चरितार्थत्वात् किं तर्हि, समिन्मन्त्रपरत्वेन स्थितयोः ॥

शेषेणोपतिष्ठते ॥ ३ ॥

अपो अद्यान्वचारिषमित्यनेनाग्निमुपतिष्ठते इत्यर्थः ॥ ३ ॥

ततः प्रातः प्रागुदयात् ॥ ४ ॥

अग्निसमिन्धनं कुर्यादिति शेषः । सायं प्रातश्चाग्निसमिन्धनमेकीयमतेन द्योतितम् । तत्र कालावधिप्रतिपादनार्थमेतत्—प्रातर्यदग्नि- समिन्धनं कर्तव्यं, तदादित्योदयात्प्राक् साय- मप्यस्तमयात्पूर्वमग्नीन्धनमवगम्यते यत इ- त्यनुषङ्गः । विभूरसीति प्रतीकेनोत्तरवाक्यस्यापि कदाचित्पर्यायेणोपस्थाने विनियोगः शक्यते इत्यनुवाकग्रहणम् । मा मा हिंसीरित्यन्तेन सक- लेनानुवाकेनान्यस्याभावाल्लौकिकस्याग्नेरुपस्था- नं प्राञ्जलि मन्त्रपाठलक्षणं कृत्वा समिधमाद- धामीति अनुषङ्गः ॥ ४ ॥

द्वादश चतुर्विंशतिं षट्त्रिंशतमष्टाचत्वारिंशतं वा वर्षाणि यो ब्रह्मचर्यं चरति मलज्जुरबलः कृशः सर्वं स विन्दते स्नात्वा यत्किंचिन्मनसेच्छत्येतेनैव धर्मेण साध्वधीते ॥ ५ ॥

यस्त्रैवर्णिक एतेनैव धर्मेण पूर्वोक्तधर्मकलापेनोपलक्षितः सन् स साधु यथास्थानकरणवर्णस्वरमधीते विपर्यये दोषश्रवणात् 'मन्त्रो हीनः स्वरतो वर्णतो वा' इत्यादौ । स स्नात्वा स्नातकधर्मान्निर्वर्त्यावबुद्धवेदार्थः कृतदारसंग्रहो जातपुत्रः कृष्णकेशः कृताग्न्याधानो यत्किंचन कामयते स्वर्गपशुपुत्रादिकं फलं, तत्सर्वं सम्यगवबुध्य स्मार्तकर्मानुष्ठानद्वारेण विन्दते लभते । अन्यथा त्वविदुषोऽपरिपूर्णं काम्यकर्मानुष्ठानं निष्फलं काम्यानां सदानुष्ठानशक्त्या स्वाभीष्टत्वात् । यथोक्तं

'स सर्वं विन्दते स्नात्वा'

इति । नैष्ठिकापेक्षया त्वेतेनैव धर्मेण साध्वधीत इत्यधीत एव न स्नायादित्यर्थः । परि-

शिष्टं यथासंभवं योज्यम्। कियन्तं काल-मधीते। शक्तिप्रज्ञाऽध्यवसायादिकमपेक्ष्य प्रति-वेदं द्वादश वर्षाणि ब्रह्मचर्यं चरन्। तेनैकत्र वेदे द्वादश वर्षाणि परिश्रमः कर्तव्यः, द्वयो-श्चतुर्विंशतिम्, त्रिषु षट्त्रिंशतम्, चतुर्ष्वष्टा-चत्वारिंशतम्। नैष्ठिकब्रह्मचर्यापेक्षं चात्राष्टा-चत्वारिंशद्वर्षं वेदचतुष्टयस्याध्ययनं बोद्धव्यं कर्मानुष्ठानानधिकृतपङ्ग्वादिविषयं च। अध्य-यनस्य च दृष्टार्थत्वादविशेषेण विधाने हि जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यादि नोपप-द्येत वेदाध्ययनव्याकरणाद्यवगममूलतदर्थाव-बोधव्यग्रत्वेनैव पुरुषायुषपर्यवसानेनाश्रमान्त-राणामनवकाशप्रसङ्गात्। तस्मादिदं तात्प-र्यम्—आश्रमान्तरार्थिना सर्वथा प्रज्ञाद्यनुसा-रेण वेदान् वेदौ वेदं वेदैकदेशं वाधीत्या-धिगम्य च सहधर्मचारिणीपरिग्रहपूर्वकगृह-स्थाश्रमादिकमनुष्ठातव्यमिति। कीदृशस्त्रैव-र्णिकः। मलज्जुर्मलिनजानुरस्नानात्, अबलश्च भैक्षभोजनात्, कृशश्च शुश्रूषादिपरिश्रमात्॥

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोऽसि प्रचे-तास्तुथोऽसि विश्ववेदा उशिगसि कविरङ्घारिरसि बम्भारिर-

वस्यूरसि दुवस्वाञ्छुन्ध्युरसि मार्जालीयः सम्राडसि कृशानुः परिषद्योऽस्यास्तव्यो नभोऽसि प्रतक्वासंमृष्टोऽसि हव्य-सूदन ऋतधामासि स्वर्ज्योतिः समुद्रोऽसि विश्वव्यचा अजो-ऽस्येकपाद्हिरसि बुध्न्यः कव्योऽसि कव्यवाहनो रौद्रेणानीकेन पाहि माग्ने पिपृहि माग्ने नमस्ते अस्तु मा मा हिंसीः ॥

धिष्ण्यानामङ्गिरसामग्निगणानां चार्षम् ।

अग्निरुच्यते । हे अग्ने असि त्वं विभूः विशेषेण सर्वकार्याणां मध्ये भवसीति विभू-र्विशिष्टकार्यरूपस्त्वमित्यर्थः, यद्वा विभवसि प्रभवसीति विभूः । डुरत्र न भवति सर्ववि-धीनां छन्दसि विकल्पनात् । प्रवाहणः प्रकर्षेण वाहयसि प्रापयसि दृष्टादृष्टपुरुषार्थान् इति प्रवाहणः । वह्निः वोढा हविषां, स्वयं हविषां भोक्ता इत्यर्थः । हव्यं वाहयसि प्रापयसि देवेभ्यो हव्यवाहनः । श्वात्रः आशु आ सम-न्तात् त्रायसे इति श्वात्रः, छान्दसो वर्णलोपः । प्रचेताः प्रकृष्टचित्तः । स्तुतः सर्वत्रैवर्णिकैः । वेद इति धननाम विश्ववेदाः सर्वधनः, अथवा वेत्तीति वेदाः ज्ञः विश्वस्य सर्वस्य वेदितृत्वात् सर्वज्ञ इत्यर्थः । उशिक् 'वश कान्तौ' कान्तिमानित्यर्थः । कविः क्रान्तदर्शनः ।

अंहः इति पापनाम अंहसः अरिः अङ्घारिः पापस्य नाशकः, वर्णलोपविकारौ च्छान्दसौ। बिभर्तीति बम्भारिः धारकः पोषकश्च जगताम्। अवतीति अवस्युः रक्षकः, अव इति अन्ननामसु पठ्यते अव इच्छतीति अवस्युः 'सुप आत्मनः क्यच्' (पा० सू० ३।१।८) 'क्याच्छन्दसि' (पा० सू० ३।२।१७०) इत्युप्रत्ययः, त्वमात्मनोऽन्नमिच्छसि, अतः समिधाद्यन्नं ते दास्यामीत्यर्थः। दुव इति हविर्नाम दुवस्वान् हविष्मान्। शुन्ध्युः शोधनः पवित्रीकारकः। अत एव मार्जालीयः मृजेरालीयच् प्रत्ययः, मार्जनेन कांस्यादिपात्राणां शोधकः। सम्यग्राजते सम्राट्। कर्षयति हवींषीति कृशानुः। यजमानादिसमूहात्मिकायां परिषदि साधुः, तस्यै वा हितः परिषद्यः। आस्तवनीयः अवश्यमास्तव्यः, 'ओरावश्यके' (पा०सू०३।१।१२५) इति ण्यत्। नभ इव सर्वोपकारित्वात्, अथवा अविदुषां न भाति सम्यक् इति नभः। प्रतनोति कर्माणि इति प्रतक्वा। असंमृष्टः स्वभावशुद्धत्वात्, न पात्रादिवत्संमार्जनमर्हसीत्यर्थः। हव्यं सूदयतीति

हव्यसूदनः । ऋतस्य यज्ञस्य धाम स्थानमृतधाम । स्वर्ज्योतिः स्वर्गस्य प्रकाशकः प्रापकः । अस्यानुवाकस्य अन्यत्राहवनीयोपस्थाने विनियुक्तत्वादाहवनीयाभेदोपचारेण लौकिकाग्नेरपि स्तुतिरुचिता । सम्यगुत्कर्षेण राति हवींषीति समुद्रः । विश्वव्यचा विश्वसंभवः । न जायते इति अजः अधिष्ठातृदेवतारूपेण । एक एव पद्यते चेष्टते कर्माण्युत्कर्षेण संपादयतीति एकपात्, एक एव पादः प्राप्तिहेतुराधारात्मको यस्य स गार्हपत्यो वा एकपात् । न जहाति कर्मसाधनशक्तिमिति अहिः । बुध्ने भूलोकेऽन्तरिक्षे वा भवो बुध्न्यः, यद्वा उपरि प्रक्षिप्यमाणस्य हविषो बुध्नेऽधोभागे भवो बुध्न्यः । यस्माच्च कवये क्रान्तदर्शनाय यजमानाय हितत्वात् कव्यशब्दवाच्यः, तस्मात् कव्यं पित्रर्थं हविर्वहतीति कव्यवाहनः । रौद्रेण घोरेण रुद्रसंबन्धिना वा अनीकेन समूहेन सेनारूपेण मां हे अग्ने मा हिंसीः, किं तर्हि, मां पाहि गोपाय, पिप्रीहि संतर्पय । एतदर्थं च ते तुभ्यं नमोऽस्तु नमस्कारो भवतु ॥

एधोऽस्येधिषीमहि समिदसि समेधिषीमहि ॥

हे अग्ने यतस्त्वमेधो दीप्तः समृद्धो वा भवसि, अतस्त्वां वयमेधिषीमहि व्यत्ययेन लिङ् दीपयामः । यतश्च समिदसि, समिद्योग्यत्वात् तत्प्रवणत्वाद्वा उपचारात् अग्निः समिदुच्यते, अतस्त्वां वयं समेधिषीमहि सम्यग्दीपयाम इत्यर्थः ॥

इदमहमग्नौ समिधमभ्यादधाम्यग्ने सर्वव्रतो भवामि ॥

इदमिति लिङ्गव्यत्ययः । अहमिमां समिधमग्नावाभिमुख्येनादधामि प्रक्षिपामि । अतो हे अग्ने तव प्रसादादहमपि सर्वव्रतो भूयासम् । भवामीति तिङ्व्यत्ययः ॥

इदमहमग्नौ समिधमाहार्षं बृहते जातवेदसे स मे श्रद्धां च मेधां च दीर्घं चायुर्जातवेदाः प्रयच्छतु ॥

आहार्षमाहरामि प्रक्षिपाम्यग्नौ समिधं इमाम् । कीदृशेऽग्नौ । बृहते महति महाप्रभावे, जातवेदसे जातप्रज्ञाने संपन्नधने वा । स च समित्प्रक्षेपेण तुष्टोऽग्निर्मह्यं श्रद्धां वेदपाठतदर्थज्ञानानुष्ठानादिविषयां मेधां चायुश्च दीर्घं प्रयच्छतु ॥

तेजोऽसि तेजो मयि धेहि । अपो अद्यान्वचारिषं रसेन समगन्महि । पयस्वानग्न आगमं तं मा संसृज वर्चसा ॥ सं माग्ने वर्चसा सृज प्रजया च धनेन च । विद्युर्मे अस्य देवा इन्द्रो विद्यान्महर्षिभिः ॥

विहव्यस्याङ्गिरसस्यार्षम् । तेजोऽसीत्यग्निमनुमन्त्रयते, तेजो मयि धेहीत्यात्मानम् । अपो अद्य इत्यादिनाग्निमुपतिष्ठते ।

हे अग्ने अहमप उदकमन्वचारिषं प्राप्तोऽस्म्युदकं, स्नातोऽहमित्यर्थः । अतस्तासामपां रसेन सारेणाहं समगन्महि संगतः संबद्धः त्वदाराधनयोग्यः संपन्नः । किंच पयस्वानेवाहमागममागतो मातुः संबन्धिना क्षीरेण युक्तो बालो विकारहीन इत्यर्थः, अथवा पयस्वान् जलयुक्तः आर्द्रगात्र इत्यर्थः । तमेवंभूतं मां वर्चसा तेजसा विद्यातिशयलक्षणेन संसृज । अस्य व्रतपरस्य मे मम देवा विद्युर्जानन्तु इन्द्रश्च महर्षिभिः सहितो मां विद्यात्, ते देवेन्द्रमहर्षयो ज्ञात्वा व्रतं निर्वाहयन्त्वित्यर्थः ॥

इति द्वितीया काण्डिका ॥ २ ॥

अथ

तृतीया काण्डिका ।

ब्रह्मचर्यव्रतस्याचार्यपूजाविधिद्वारेणावधिमाह

छन्दस्यर्थान् बुद्ध्वा स्नास्यन् गां कारयेदाचार्यमर्हयेत् ॥ १ ॥

छन्दसि वेदे ऋग्यजुःसामलक्षणे मन्त्रब्राह्मणार्थवादनामधेयभेदयुक्ते ये व्यवस्थिता अर्था द्वादशाध्यायनिर्णेयास्तान् बुद्ध्वा तद्योग्यत्वात्, स्नास्यन् दारपरिग्रहार्थं स्नातकधर्मान् ग्रहीतुमिच्छन् आचार्यमधीष्य गां मधुपर्कार्थं कारयेत् स्वधनं दत्त्वा अर्हयेत् । सा मधुपर्कोपयोगिनी सती गुरवे दास्यते । आचार्यो हि शिष्याय सिष्णासवे मधुपर्कं ददाति, शिष्यश्चाचार्याय दक्षिणामिति केचित् । अन्ये तु गोप्रभवो मधुपर्को गोशब्देन विवक्षित इति व्याचक्षते । तेनाचार्यमधीष्य मधुपर्को मे दीयतामिति मधुपर्कं कारयेदित्यर्थः । गृही-

तमधुपर्कश्च ब्रह्मचारी आचार्यमर्हयेद्दक्षिणादिना यथाशक्त्या पूजयेत्। अपरे तु सूत्रभेदेन व्याचक्षते—छन्दस्यर्थान् बुद्ध्वा स्नास्यन् गां कारयेदित्येकम्, आचार्यमर्हयेदिति द्वितीयम् । आचार्यमधीष्यादावात्मने गां मधुपर्कं च दापयेदित्याद्यस्यार्थः । आचार्येण च पूजितो गृहीतदक्षिणः सन् ब्रह्मचारी पश्चादाचार्यमर्हयेत् दक्षिणादानादिना । ब्रह्मचारिणं हि सम्यगधीतावबुद्धवेदमाचार्यः पूर्वं पूजयतीति । तथाच स्मृतिः

'तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः ।
स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा ॥' (मनु० ३।३)

इति । तं ब्रह्मचारिणं, स्वधर्मेण शिष्यधर्मेण, प्रतीतमभिमुखमागतम्,आचार्यस्य ब्रह्महरं पितुर्दायहरं, स्रग्विणं मालाधारिणं, तल्पे खट्वायामासीनमुपविष्टं गवा पूजयेदाचार्यः। तस्माद्गृहीतविद्यो गुरुणानुज्ञातः स्नायात्, स्नात्वा च भार्यामधिगच्छेत् । अनुत्सृष्टस्तु वीर्यं हित्वा उपावर्तते । तथाच श्रुतिः

'इन्द्रो वै प्रजापतौ ब्रह्मचर्यमुवास स वा अनुत्सृष्टो वीर्यं हित्वोपावर्तत ॥'

इति ।

'आचार्यो ब्रह्मचारिणः प्रजापतिः ।'

इति च ॥ १ ॥

द्विविधो ब्रह्मचारी—उपकुर्वाणो यो ब्रह्मचर्यं चरित्वा स्नानदारपरिग्रहादिकं संश्रयते, नैष्ठिको यो ब्रह्मचर्येण निष्ठां गमयति । तत्रोपकुर्वाणकस्य सावधिकं ब्रह्मचर्यमिति तदपेक्षयोक्तं 'छन्दस्यर्थान्' इत्यादि । नैष्ठिकापेक्षया त्विदमुच्यते

श्रोत्रियोऽन्यो वेदाध्यायी ॥ २ ॥

अन्यो नैष्ठिको ब्रह्मचारी । श्रोत्रियो वेदाध्यायी । 'श्रोत्रियंश्छन्दोऽधीते'(पा० सू० ५।२।८४) इति श्रोत्रियशब्दो वेदाध्यायिनि निपातितः । वेदाध्यायीति पुनर्वचनमवधारणार्थं वेदाध्याय्येव, न स्नानाद्याचरति, निधनावधिकमस्य ब्रह्मचर्यव्रतमित्यर्थः ॥ २ ॥

अत एव स्पष्टार्थमाह

न तस्य स्नानम् ॥ ३ ॥

तस्यानन्तरोक्तस्य नैष्ठिकस्य स्नानं नास्तीत्यर्थः ॥ ३ ॥

यस्य तूपकुर्वाणकस्य स्नानादिकमस्ति, तस्य स्नानकर्तव्यतामाह

अथास्य स्नानं व्रजपरिहितं प्रपाद्य जटाश्मश्रुलोमनखमभिसंहार्य आपो हि ष्ठेति तिसृभिः स्नायात् हिरण्यवर्णा इति च द्वाभ्यां, शं न इति च द्वाभ्याम् ॥ ४ ॥

गोसमूहो व्रजः, तेन परिहितमधिष्ठितं देशं प्रपाद्य प्रवेश्य प्रयोजककर्तुराचार्यस्यायं निर्देशः । यथासंभवं जटिलपक्षे जटानां वापनम्, शिखिपक्षे केशानाम् । तेन जटादिकमभिसंहार्यापसार्य वापयित्वा आपो हि ष्ठेत्यादिभिस्तिसृभिः संमार्जनं कुर्वन्तं स्नायात् स्नापयेत् मज्जयेत् । हिरण्यवर्णा इति द्वाभ्यां द्वितीयं मज्जनं कुर्यात्, 'शं न आप' इति द्वाभ्यां तृतीयम् । अत्र च श्मश्रुग्रहणेनौष्ठोपरिगतकेशानामपि ग्रहणम् । लोमग्रहणेन गुप्तस्थानगतानां ग्रहणं नतु भ्र्वादिवृत्तीनामार्यप्रसिद्धिविरोधात् ॥ ४ ॥

ततस्त्रिः स्नातः पवित्रीभूत इदमिदं कुर्यादित्याह

द्यौस्ते पृष्ठमिति च्छत्रं धारयेत ॥५॥ इममग्न इति हिरण्यम् ॥ ६ ॥ प्रतिष्ठे स्थो देवते मा मा हिंसिष्टमिति वाराह्योपानहौ प्रतिमुञ्चते ॥ ७ ॥ द्विवस्त्रोऽत ऊर्ध्वं तस्माच्छोभनं वासो भर्तव्यमिति श्रुतिः ॥ ८ ॥ वैणवदण्डधारी नित्यम् ॥ ९ ॥ छत्रधारी ॥ १० ॥ अपन्थदायी ॥ ११ ॥ अदत्तहरणं प्रतिषिद्धम् ॥ १२ ॥ अपरया द्वारा निःसरणम् ॥ १३ ॥ मलवद्वाससा सह संभाषा ॥ १४ ॥ रजोवाससा सह शय्या ॥ १५ ॥ गुरोर्दुरुक्तवचनम् ॥ १६ ॥ अस्थाने स्मयनम् ॥ १७ ॥ सरणम् ॥ १८ ॥ गायनम् ॥ १९ ॥ नर्तनम् ॥ २० ॥ तस्य चेक्षणम् ॥ २१ ॥

अत्र सूत्रगणे पाठक्रमादर्थक्रमस्य बलीयस्त्वात् उक्तानुक्तपदार्थानामर्थवशेन क्रमविशेषयोजना कर्तव्या । तथाहि त्रिःस्नातस्य जलाशयान्नद्यादेरुत्तीर्णस्य चरणप्रक्षालनाद-

योऽनुक्ताः, सूत्रिताश्च धौतवस्त्रपरिधानादयो यथाक्रमेण ज्ञेयाः । द्यौस्ते पृष्ठमित्यादि-मन्त्रेण च्छत्रं धारयेत, यथाविभवानुसारेण इममग्न इत्यादिना कटककुण्डलादि हिर-ण्यम् । प्रतिष्ठे स्थ इत्यादिना वाराह्योपानहौ प्रतिमुञ्चते परिधत्ते । वराहशब्दो वराह-चर्मणि वर्तते । वराहचर्मणा निर्वृत्त इत्यण्, तस्य 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' (४।१।७८) इति ष्यङ्, 'यङश्चाप्' (४।१।७४) वाराह्ये च ते उपानहौ वारा-ह्योपानहौ । वराहः सूकरः । वराहोपानहौ च राजसूयादावर्थवादादिकादवगम्येते । अन्ये तु वाराह्यशब्दं संनिवेशविशिष्टोपानद्वाचकं व्याचक्षते चतुष्कच्छादितवत् । अपरे लक्ष-णया चर्ममात्रमयत्वं वर्णयन्ति, नहि कश्चिदा-चार्यः सूकरचर्ममय्यावुपानहौ परिदधदृश्यते । केचित्तु पठन्ति वाराह्युपानहाविति । तत्र वा-राही उपानहौ इति द्वे पदे । 'छन्दोवत्सूत्राणि भवन्ति' इति प्रथमपदद्विवचनस्य लुक् पूर्व-सवर्णादेशो वा 'सुपां सुलुक् पूर्वसवर्ण' (७।

१।३९) इत्यादिना । द्विवस्त्रोऽत ऊर्ध्वम्, अतो ब्रह्मचर्यादूर्ध्वं द्विवस्त्रः । ब्रह्मचारी ह्येकवस्त्र आसीत्, मृगाजिनं हि तेनोपरि धारितम्, नच तत्र लोके वस्त्रशब्दप्रयोगोऽस्ति । ततश्च वस्त्रद्वयं विभवानुसारेणोत्कृष्टं भर्तव्यम् । तथाच श्रुतिः 'तस्माच्छोभनं वासो भर्तव्यम्' इति । वेणोः संबन्धिनं च दण्डं धारयते तच्छीलो वैणवदण्डधारी । नित्यमिति नत्ववष्टम्भनाद्यर्थितयैव कदाचिदेवेति । एवं छत्रधारी । अपन्थदायी नान्यस्मै पन्थानं दद्यात् दृष्टप्रयोजनव्यतिरेकेण । अपथदायीति तु युक्तः पाठः । यतः 'राज्ञा तु श्रोत्रियाय पन्था देयः' इति गौतमादिभिरुक्तमतः कथमयं श्रोत्रियविशेषः सन्नन्यस्मै प्राणिमात्राय पन्थानं दद्यात् । अदत्तहरणं प्रतिषिद्धं—परकीयं यद्द्रव्यं, तत्परेणादत्तं न गृह्णीयात् 'न परस्वमपहरेत्' इति श्रुत्यादिनिषिद्धत्वात् । अपरया द्वारा निःसरणम् । प्रतिषिद्धमिति काण्डिकान्तं यावदनुषङ्गः । प्रसिद्धमविगर्हितं यद्द्वारं, ततोऽन्यया द्वारा अप्रसिद्धया गुप्तान्तः-

पुरादिनिःसरणप्रवेशाय परिकल्पितया निःसरणं प्रवेशनं च प्रतिषिद्धम् । मलवद्वासाः श्वपचादिः, तेन सह संभाषणं प्रतिषिद्धम् । तथा रजोवाससा रजस्वलया उदक्यापरपर्यायया सह शयनं प्रतिषिद्धं, स्नानस्य विवाहोपक्रमत्वादेवमुच्यते, इतिकर्तव्यतया हि स्नानस्य विवाहमृते नास्ति प्रसक्तिः । गुरोर्मान्यस्य

'वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥'(म० २।१३६)

इत्यादिकस्य, दुष्टं परुषादि वचनं प्रतिषिद्धम् । अस्थाने गुरुस्त्रीजनादौ स्मयनं हसनं प्रतिषिद्धम् । एवं सरणं गमनमस्थाने रहस्यगुरुजनाधिष्ठिते । एवं गायनं गीतं नर्तनं चास्थाने प्रतिषिद्धम्, नतूत्सवादौ समानशीलमध्यगतस्य गुप्तस्थाने । तथाच महाव्रते गीतवाद्यनर्तनकर्तव्यतावचनम् ।

'तमुद्गाता वाचयित्वा प्रस्तोत्रे प्रयच्छति प्रस्तोताध्वर्यवेऽध्वर्युरन्यस्मै ब्राह्मणाय ।'

इत्यादिवीणावादनवचनं श्रूयते । याज्ञवल्क्यश्चाह

'वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन योगमार्गं निगच्छति ॥' (३।११५)

इति। तस्य च नृत्तगीतादेरस्थानेऽवेक्षणं प्रतिषिद्धं नतूत्सवादौ ॥

'आपो हि ष्ठा' इत्यादयो व्याख्याताः। हिरण्यवर्णा इति शाखान्तरीयत्वात् समस्ताः सूत्रकृता पठिताः ॥

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षं समुद्रो योनिः। विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः ॥

बृहती। अश्वस्तुतौ विनियुक्ता। इह च्छत्रस्तुतावपि तुल्या। तव द्यौः स्वर्गलोकः पृष्ठं पृष्ठे उपरि। पृथिवी सधस्थं समानस्थानम्। आत्मान्तरिक्षं छत्रावयविनो महत्त्वस्तुतिः। समुद्र उदकं योनिः कारणम् 'अप्सुजोऽश्वः' इति संस्तवात् अश्वयोनिः सर्वस्योदकप्रभवत्वान्नेत्रवस्त्रादेश्छत्रमपि तथा। एवं चेन्महाप्रभावस्त्वमतश्चक्षुषा विख्याय निरीक्ष्याभितिष्ठ आक्राम अभिभव। कान्। पृतन्यतः पृतना सेना तामिच्छन्ति ये ते पृतन्यन्तः, तान् पृतन्यतः ॥

इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥

हे अग्ने इमं सुवर्णालङ्कारमायुषे चिरजीवनाय, वर्चसे च दीप्तये कृधि कुरु । हे वरुण त्वमपि ओजो बलं तिग्मं तीव्रं सम्यक् संपादय । हे अदिते देवमातः अस्मै स्नातकाय शर्म सुखं यच्छ प्रयच्छ मातेव जननीव । हे विश्वे देवाः सर्वदिवौकसः जरदष्टिर्जराव्याप्तिर्यथा येन प्रकारेण असद्भवति, तथा कुरुत जराजर्जरितशरीरा यथा संपद्यामहे तथा कुरुतेत्यर्थः ॥

प्रतिष्ठे स्थो देवते मा मा हिंसिष्टम् ॥

हे देवते उपानहौ सुप्रतिष्ठे स्थः शोभनप्रस्थाने भवतम् । मा मा हिंसिष्टं मम हिंसां मा कार्ष्टम् ॥

इति तृतीया काण्डका ॥ ३ ॥

अथ

चतुर्थी काण्डिका ।

अथातोऽष्टाचत्वारिंशत्संमितम् ॥ १ ॥

व्याख्यास्याम इत्यध्याहारः । व्रतमिति च प्रस्तावाद्गम्यते । चतुर्षु वेदेषु यदष्टाचत्वारिंशत्संवत्सरैः संमितं परिच्छिन्नं व्रतमुक्तं, तस्य प्रतिनिधिभूतं संवत्सरनिर्वर्त्यं व्याख्यास्यामः । यस्य वेदमधीयानस्य यथाकालविहितं व्रतं न संपन्नं, तेन चैतत्कर्तव्यमधीतवेदचतुष्टयेन च । अत एव त्रैविद्यकव्रतमिदमुच्यते । स्नानादनन्तरं चास्याभिधाने प्रयोजनं—स्नातकभूतेनाप्येतत्कर्तव्यं प्राग्विवाहादिति । अन्ये तु यथाकालविहितव्रतसंपत्तावपि एतद्वार्षिकं व्रतं तपोऽतिशयसिद्ध्यर्थं कर्तव्यतया अनेन विधीयते इति व्याचक्षते । अथशब्दो व्रतपूरणार्थः । यथोक्तम्

'मङ्गले पूरणे हेतावानन्तर्याधिकारयोः ।
षट्स्वर्थेष्वथशब्दोऽयं स्मृतः प्राक्प्रस्तुतेऽपि च ॥'

अन्योऽपिचार्थो यथासंभवं योज्यः । अतः

शब्दो हेत्वर्थः। यतोऽध्ययनकाले यथाविहित-व्रतासंपत्तिः कस्यचित्संभाव्यते, अतो हेतोः प्रतिनिधिभूतं व्रतान्तरं वक्ष्याम इति ॥ १ ॥

तत्र विधिविशेषः ॥ २ ॥

उच्यत इति शेषः ॥ २ ॥

नियमेष्वाचार्यप्रधानः स्यात् ॥ ३ ॥

स्थानासनादिकान् वक्ष्यमाणान्नियमान् आचार्यमादाय कुर्यात्। आचार्यप्राधान्येन च वेदगुणनार्थाभ्यासावनुवर्तेते ॥ ३ ॥

निलयार्थी यूनबद्धं न प्रविशेत् ॥ ४ ॥

शीतातपभीतो निलयार्थी भूत्वा यूनबद्धं मिश्रवेणुवीरणकाण्डादिनिबद्धं कुटीशालापर्णादिकवासविशेषं न प्रविशेत्॥ ४ ॥

अनिलयः स्यात् ॥ ५ ॥

न केवलं परनिर्मितमाश्रयविशेषं न प्रविशेत्, यावता स्वयं निलयमात्रमपि न कुर्वीतेत्यर्थः ॥ ५ ॥

यद्येवं, वात्याकरकवृष्ट्याद्युपप्लवाद्देहभङ्गः स्यादित्याशङ्क्याह

अन्यत्र वृक्षाद्वल्मीकाद्वा ॥ ६ ॥

वृक्षादिकमाश्रयेदित्यर्थः । वल्मीकं वल्मीकभूम्यादि ॥ ६ ॥

निस्तान्तवमित्येके ॥ ७ ॥

तन्तुर्वेणुरिति केचित्, शीताद्युपहतो वंशनिर्मितव्यतिरेकेयाश्रयान्तरं विशेत् । रज्जुस्तन्तुरित्यन्ये, रज्ज्वादिबन्धैर्यन्निर्वृत्तं शालादि, तत्तान्तवम् ॥ ७ ॥

यथोक्तमेकं तु वासः शाणी कुतपं वा ॥८॥

यत्पूर्वमुक्तमेकं वासः, तदेवात्रापि । इयांस्तु विशेषः—इह शाणी कुतपं वा । शाणी वरासिः, न पुनः क्षौमी प्रसिद्धा, क्लिन्नकुट्टितदर्भनिर्मितेति त्वन्ये । अजलोमनिर्मितं कुतपम् ॥ ८ ॥

अस्य वाससः परिमाणमाह

परिमितमुरःप्रमाणमुपरिजानु ॥ ९ ॥

उरस आरभ्य जानुनोरुपरिभागं यावद्व्याप्नोति, तावत्परिमितमेतत्कर्तव्यमेकमेव त्रै-

विद्येन । अध्ययनकाले तु अधोभागे पटोलिका त्वासीदुपरि तु मार्गं चर्म, तच्च वास इति नोच्यते लोके इत्युक्तम् ॥ ९ ॥

चतुर्थकालपानभक्षः ॥ १० ॥

'सायं प्रातर्मनुष्याणामशनं देवनिर्मितम् ।' (संवर्त०) इति भोजनकालः । तत्र प्रथमदिनस्य सायंप्रातर्लक्षणं कालद्वयं, द्वितीयदिनस्य च प्रातःकालं वर्जयित्वा सायं चतुर्थे काले भोजनपाने कुर्यादित्येके । एकदिनऽव्यवधानेन एककालं भुञ्जीतेत्यर्थः । अन्ये त्वाहुः— पीयते इति पानं क्षीरतक्रादि तदेव चतुर्थकाले पश्चिमप्रहरे भक्षोऽस्येति, क्षीरादिपानीये भक्षशब्दो दृष्टः 'अब्भक्षो वायुभक्षः' इति ॥

असंचयवान् ॥ ११ ॥

हिरण्यादिसंचयं न कुर्वीतेत्यर्थः ॥ ११ ॥

अहरहर्वा भैक्षमश्नीयात् ॥ १२ ॥

भिक्षाणां समूहो भैक्षम् । पूर्वेण भिक्षाणामपि संचयस्य प्रतिषेधे प्राप्ते प्रतिप्रसवोऽनेन क्रियते । प्रतिदिनं भैक्षमश्नीयात् । शरीरा-

पाटवे तु कदाचिदेकामपि भिक्षामश्नीयात्, अ-टितुमशक्तः सक्तुकणिकादिकं वा । तावन्मात्रं संचिनुयादित्यनेनाभिप्रायेण वाशब्दः ॥ १२ ॥

अहस्तिष्ठेद्रात्रावासीत ॥ १३ ॥

कालाध्वनोरत्यन्तसंयोगे अहःशब्दाद्द्वितीया । अहनि तिष्ठेदेव ऊर्ध्व एवासीतेत्यर्थः । रात्रावासीतोपविशेत् । अतिश्रान्तः स्वप्यादपि कदाचिदन्तरा मनाक् । अत्यन्तसंयोगाभावात् द्वितीयाविरहः ॥ १३ ॥

उभयं मुनिव्रतः स्यात् ॥ १४ ॥

उभयमहोरात्रं वाक्संयमं कुर्यात् । मुनीनां व्रतमेतत् ॥ १४ ॥

स्त्रीशूद्रपतितरभसरजस्वलैर्वा न संभाषयेतेति च्यवनो भृगुः ॥ १५ ॥

भार्गवस्तु च्यवनो मन्यते स्त्र्यादिभिरेव न संभाषेत, नतु सर्वैः । संभाषयेतेति स्वार्थे णिच् 'रामो राज्यमकारयत्' इतिवत् । पतितास्त्रैवर्णिका अपि । रभसा अपृष्टवक्तारो भण्डवन्दिप्रभृतयः । रजस्वलास्तु ये रक्तेन शरीरमवलिप्य भोजनादिकं दापयन्ति ॥ १५ ॥

द्वादशरात्रं वोभयतोऽमावस्यां पौर्णमासीं च ॥ १६ ॥

असमर्थापेक्षमेतत् । संवत्सरस्योभयोरारम्भसमाप्तिलक्षणयोः पार्श्वयोर्द्वादशरात्रमेतत्स्थानासनवाग्यमप्रभृतिकं कुर्यात् पौर्णमासीममावस्यां च । तेन संवत्सरमध्ये अष्टाचत्वारिंशद्दिनानि भवन्ति । उपक्रमोपसंहारयोर्द्वादशरात्रद्वयं, द्वादश पौर्णमास्यः, द्वादशामावस्याः ॥ १६ ॥

पालाश्यः समिधो नित्याः परिधिवृक्षाणां वा ॥ १७ ॥

या ब्रह्मचारिणो नित्याः समिधः, ता इह पालाश्यः । पलाशालाभे प्रतिनिधिः, प्रतिनिधाने च परिधिवृक्षाणां वा, परिधिवृक्षाणां संबन्धिन्यो ग्राह्याः । परिधिवृक्षाश्च यूप्याः बिल्वखदिरपलाशरोहीतकोदुम्बरबधिरप्रभृतयः । तथाच ब्राह्मणं श्रुतिश्च

'वैल्वो वा खादिरो वा पालाशो वा रौहीतको वा सौम्यस्याध्वरस्य यूपः स्यात् । औदुम्बरो यूपो भवति ॥' 'खादिरे बध्नाति पालाशे बध्नाति रौहीतके बध्नाति ॥'

इति । यज्ञिया वा सर्वे परिधिवृक्षाः । श्रूयते हि परिधिब्राह्मणम्

'तस्येन्द्रः परिधीन्यज्ञियेभ्यो वृक्षेभ्य आजहार'

इति । परिधिवृक्षत्वादेव पालाशीनां सिद्धेः पृथग्ग्रहणं तासां नित्यत्वार्थं तथाचेह नित्यग्रहणम् । ननु मूलप्रकृतावेव कस्मान्नोक्तम् । साधूच्यते भवता किंतु ज्ञापकार्थं भविष्यति यथा साद्यस्क एवमुक्तं मध्यमायां संस्थितायां यूपकर्मेति, प्रकृतौ चोक्तमुपसत्सु यूपकर्मेति । तत्र कालाकाङ्क्षायां सत्यां विकृतिरपि प्रकृतिं गृह्णाति इत्येतमर्थमवबोधयितुमेवं सूत्रितवानाचार्यो विरोधाभावात् । एवमन्यत्रापि तुल्यन्यायत्वाद्योज्यम् । तेनांहोमुग्भिः समिद्दानेऽप्येवं जानीयादेव

'तस्येन्द्रो यज्ञियेभ्यो वृक्षेभ्यः परिधीनाजहार ।'

इति ॥ १७ ॥

मेधां मह्यमिति पाणिना मार्गं दत्त्वा त्रिषवणमहोरात्रमुदकोपस्पर्शनम् ॥१८॥

कुर्यादिति शेषः । मेधां मह्यमङ्गिरस इत्या-

दिभिर्मंत्रैः द्वाभ्यां नाभेरारभ्योर्ध्वं ब्रह्मद्वारपर्यन्तं मार्जनं निघर्षणात्मकं कृत्वा

'नाभेरूर्ध्वमेव पाणिना उन्मार्ष्टि'

इति स्मृतेः प्रातःसवने मध्यन्दिनसवने तृतीयसवने इति सवनत्रयेऽपि रात्रिभागत्रयेऽप्येवमुदकोपस्पर्शनं कुर्यात् । उपस्पर्शनमिह स्नानम् । उपस्पर्शनशब्दो ह्याचमनस्पर्शनस्नानेषु दृष्टः, 'उपस्पृश्य स्वस्त्ययनं भवति' इत्यादावाचमने, न कुल्याद्यन्तरागमननिमित्तप्रायश्चित्तभूते सदाचारादिसिद्धेः; 'उपस्पृश्य सोममालभेरन्' इत्यत्र स्पर्शे; 'आलभ्य चोपस्पृशेयुः' इत्यत्राप्युदकाचमनमात्रे; 'रथ्यादावुपस्पृशेत्' इत्यादौ स्नाने । तत्र प्रकरणवशाद्विशेषव्यवस्था । यथा सैन्धवशब्दादेरश्वलवणमनुष्येषु ।

दिवा वातार्कसंयोगाद्रात्रौ नक्षत्रमारुतैः ।
सन्ध्ययोरग्निवाताभ्यां पवित्रं सर्वदा जलम् ॥

तत्र चाग्निं प्रतिष्ठाप्य सुवर्णं संनिधायेति वदन्ति । अस्तमिते वसतीवरीग्रहणवत् 'अग्निर्वै वाक्' इत्यभेदात् अग्न्यभावेऽपि वागुच्चार्या एवं रात्रावाचमनाद्यपि कुर्यात् ॥ १८ ॥

एवं स्नात्वा

नमो ह्माय मोह्मायेति चानुसवनमग्नये वैश्वानराय तपाय तापसाय तपन्ताय विन्दवे विन्दाय वसुविन्दाय सर्वविन्दाय, नमः पाराय सुपाराय पारयन्ताय शान्ताय, नम ऊर्म्याय सूर्म्याय, नमः च्यवनाय भार्गवाय इत्येता एव देवतास्तर्पयन्नुदकेन ॥ १९ ॥

एता एव देवतास्तर्पयन्नुदकेन तर्पयन्नमःशब्दावच्छिन्नैर्मन्त्रैश्चतुर्भिरुपस्पर्शनं कुर्यादिति संबन्धः । आदित्य एवोपाध्यवच्छिन्नोऽत्रानेकदेवतारूपोऽभिमतः । तथाच ह्म आदित्यो गन्तृत्वेन स्तूयते । 'ह्मह्म्ममीम्गतौ' इति ह्म्मेः रूपं ह्म इति । 'मीञ् हिंसायाम्' इत्यस्य त्वप्रत्यये रूपं छान्दसम्, मोह्मायेति अन्धकारापसारकायेत्यर्थः । तपतीति तपः । तपश्चचारेति तापसः आदित्य एव प्रजापतिरूपेण स्तुतः । तप्यते इति तपः ब्रह्माण्डादिसर्गः, तं तनोति उत्पादयतीति तपन्तः 'सर्वे विधयश्छ-

न्दसि विकल्प्यन्ते' इति सुपो लुक्। विन्दते चेतयते इति विन्दुः, विन्द्यते चेत्यते इति विन्दः चेत्यचेतयितृरूपः प्रजापतिस्तस्मै नमः। वसु विन्दते वसुविन्दः, एवं सर्वविन्दः' तयोर्विशेषणसमासः। 'पारतीरकर्मसमाप्तौ, पारयतीति पारः। पारयन्तं तनोति पारयन्तः। ऊर्मींत्ररश्मिकल्लोलानर्हतीति ऊर्म्यः। एवं सूर्म्यः। च्यावयतीति च्यवनः। भृज्जति पाचयति भूतानीति भृगुः, तस्यापत्यं भार्गवः भानुरेवात्र ॥ १९ ॥

एष संवत्सरं चरित्वा विमलो विपापो भवति ॥ २० ॥

एष ब्रह्मचारी स्नातको वा प्रकृतः संवत्सरमुक्तं व्रतं चरित्वा, विमलो रागादिमलशून्यो विगतपापश्च भवति ॥ २० ॥

पापाभावप्रदर्शनेनाध्ययनाङ्गत्वविहिताध्ययनकालव्रताकरणनिमित्तप्रायश्चित्ततामस्य संवत्सरव्रतस्य दर्शयति

सर्वेषां वेदानां चरितब्रह्मचर्यो यदि नान्यत्कुरुते ॥ २१ ॥

यद्यन्यद्व्रतं वेदाध्ययनकाले न कुरुते, तदास्मिंस्तत्प्रतिनिधिभूते संवत्सरव्रते कृते सति चतुर्णामपि वेदानामधीतानां चरितब्रह्मचर्यः संपद्यते व्रतपरिपूर्णं वेदचतुष्टयाध्ययनमस्य संपद्यत इत्यर्थः। ये तु स्वतन्त्रमेवेदं संवत्सरव्रतं त्रैविद्यकस्य तपोतिशयार्थं वर्णयन्ति, त एवं व्याचक्षते—पूर्वेण सहास्यैकवाक्यता, एष संवत्सरव्रतं चरित्वा सर्वेषां वेदानां चरितव्रतः सन् विमलो विपापश्च भवति, यदि तन्मध्येऽन्यन्निषिद्धाचरणं न कुरुते ॥ २१ ॥

स तु खलु चरितब्रह्मचर्यो दश दश पुरुषान्पुनाति पूर्वापरान् आत्मानं चैकविंशम् ॥ २२ ॥

तुशब्दः फलान्तरसमुच्चये। खलुर्निश्चये॥२२

वैदिकत्वप्रसिद्धिद्योतनाय च फलान्तरमाह

पङ्क्तिं च यावदनुपश्यति यस्यामुपविशति ॥ २३ ॥

पुनातीत्यनुषङ्गः । यान्पश्यति तानपङ्क्तिपाव-

नानपि पङ्क्तिपावनान्करोति तपोबलात् , यांश्चै-
कपङ्क्त्युपविष्टान्न पश्यत्यपि, तानपि पावयति २३

समाप्त एतासामेव देवतानामन्नस्य जुहोति । धेनुर्दक्षिणा ॥ २४ ॥

एतस्मिन्व्रते समाप्ते, पूर्वोक्तदेवताभ्योऽन्नं जुहोति तण्डुललक्षणं स्थालीपाकं वा । 'छन्दोवत्सूत्राणि भवन्ति' इति सुब्व्यत्ययः । अन्नशब्दो हि कृतेऽकृते विपक्के च दृष्टः 'हेषिभिर्निधनं कुर्यादन्नकामाय' इत्यकृतवचनः, 'अन्नं प्रयौति घृतं मधु तण्डुलान्' इत्यादौ कृतवचनः, 'योऽन्नमश्नीयात्' इत्यादौ विपक्ववचनः । त्रिविधमपि व्रीहितण्डुलस्थालीपाकरूपं पर्यायेण यथास्वं निर्वाह्यम् ॥

मेधा मह्यमङ्गिरसो मेधां सप्तर्षयो दधुः ।
मेधामग्निश्च वायुश्च मेधां धाता दधातु मे ॥ १ ॥
मेधां मे वरुणो राजा मेधामग्निर्दधातु मे ।
मेधामिंद्रश्च सूर्यश्च मेधां देवी सरस्वती ॥ २ ॥
या मेधा अप्सरस्सु गन्धर्वेषु च यन्मनः ।
दैवी मनुष्ये या मेधा सा मामाविशतादिह ॥ ३ ॥

शरीरं मे विचक्षणं वाङ्मे मधुमद्दुहे ।
निशामितं निशामये मयि श्रुतम् ॥ ४ ॥
यन्मेऽनूक्तं तद्रमतां शकेयं यदनुब्रुवे ।
प्रियाः श्रुतस्य भूयास्म मेधया संविधीमहि ॥ ५ ॥
नमो हमाय मोहमाय ॥

सयजुष्कः पंचर्चः । अङ्गिरसो देवाः मह्यं मेधां बुद्धिं दधुर्दधतु मदर्थं कुर्वन्तु ददतु वा मह्यम् । कश्यपादयश्च सप्तर्षयो मेधां दधतु । तथाग्निर्वायुः धाता प्रजापतिर्मेधां मे दधातु । एवं राजा वरुणोऽग्निरिन्द्रश्च सूर्यश्च मह्यं मेधां दधातु देवी च सरस्वती । तथाप्सरःसु च या मेधा स्थिता, गन्धर्वेषु च यत् मनः स्थितं, तदुभयमिहैव मानुषशरीरे सति मामाविशतात्प्रविशतु । या च मनुष्यविशेषे दैवी अमानुषी मेधा, सापि मामाविशतात् । मम च शरीरं विचक्षणं विपश्चित् सकलकलाकोविदमस्तु । वाक् सरस्वती त्रयीरूपा मे मम मधुमत् मधुरविपाकं स्वर्गापवर्गादिकं फलं दुहे दोग्धु । यच्च मयि श्रुतं जातं, निशामितं चावबुद्धं मयासीत्, तत् निशामये निशामयेय स्मरणशक्तिस्तत्र ममास्त्वित्यर्थः । यच्च ममानूक्तं गुरुणा निगदितं,

तद्द्रुमतां शतशाखं शिष्यप्रशिष्यादीन् प्रसरतु फलपर्यवसायि सत् । यच्चानुब्रुवे निगदितुमिच्छामि, तच्छक्नुयाम् । तथा वयं श्रुतस्य प्रियाः भूयास्म श्रुतमस्माकं फलदानप्रसादपरमस्तु । मेधया च संविधीमहि सम्बध्येमहि वयम् । यजुर्व्याख्यातम् ॥ २४ ॥

इति चतुर्थी काण्डिका ॥ ४ ॥

अथ

पञ्चमी काण्डिका ।

येनाधीयानेन यथाविहितव्रतानि नानुष्ठितानि, नापि संवत्सरव्रतं पश्चात्, तं प्रति प्रायश्चित्तान्तरं स्वतन्त्रं वा तपोऽन्तरं पूर्ववत्कृच्छ्रादिकमाह

अथ कृच्छ्रविधिं व्याख्यास्यामः ॥१॥

कृतमकुशलं विहिताकरणप्रतिषिद्धसेवनलक्षणं कर्म च्छृदति इति कृच्छ्रः । तथानन्तरमेव वक्ष्यति 'सर्वाकुशलमोक्षाय' इति । गौतमोऽप्याह

'अथैतांस्त्रीन्कृच्छ्रांश्चरित्वा सर्ववेदेषु स्नातो भवति, सर्वेषु तीर्थेषु स्नातो भवति ।'

इति । त्रीनिति कृच्छ्रमहाकृच्छ्रतप्तकृच्छ्रान् । कृतस्य पापस्य च्छृदनं वा कृच्छ्रमिति निर्वचनम् । वर्णलोपश्छान्दसत्वात् कृच्छ्रशब्दस्य । तथाच चारायणिसूत्रम् 'पुरुकृते च्छच्छ्रयोः' इति पुरुशब्दः कृतशब्दश्च लुप्यते यथासंख्यं

छे छ्रे परतः । पुरु च्छदनं पुच्छम्, कृतस्य च्छ्रदनं विनाशनं कृच्छ्रमिति ।

दुस्तरं गहनं कृच्छ्रं कष्टं दुष्करमित्यपि ।
लोकप्रसिद्धपर्याये लिप्याप्यर्थोऽस्य गम्यते ॥

कृच्छ्रस्य विधिः प्रभाव इतिकर्तव्यता कृच्छ्रविधिः, तं व्याख्यास्याम इति शिष्यबुद्धिसमाधानार्थमिदं वाक्यम् । एवमन्यत्राप्यनुसर्तव्यम् ॥ १ ॥

स्तुत्यर्थमात्मार्थं चास्य व्रतस्य पुराकल्पार्थवादमाह

देवासो यथाचरन्वसवो रुद्रा आदित्या मरुदङ्गिरसः पुरा ॥ २ ॥

देवादीनामेवात्र व्रते आर्षम् । प्रशस्तं चैतद्देवादिभिः पापविमोक्षायानुष्ठितत्वादिति तात्पर्यार्थः । देवा एव देवासः 'आज्जसेरसुक्' (७।१।५०)। येन प्रकारेण देवादय आचरन्, तं प्रकारं वक्ष्याम इत्यन्वयः ॥ २ ॥

स्त्रीशूद्रं नाभिभाषेत ॥ ३ ॥

स्त्रीमात्रं शूद्रमात्रं च न संवादयेत्कृच्छ्रं चरन् ॥ ३ ॥

नक्तमासीत संश्रितः ॥ ४ ॥

कुड्यकाष्ठादिकमालम्बनमात्रमाश्रितः सन् रात्रावासीतैव उपविशेत् श्रमातिशयनिवृत्तये, नतु सुप्यात् । एवं हि सातिशयं तपो भवति । अतिश्रान्तस्तूपविष्ट एवान्तरान्तरा मनाक् स्वापं कुर्वीत शरीरापायस्यावश्यवर्जनीयत्वात्, नतु शय्यामारोहेत् ॥ ४ ॥

सर्वाण्यहानि तिष्ठेत् ॥ ५ ॥

दिनेषु सर्वेषु तिष्ठेदेव, नतूपविशेत् ॥ ५ ॥

ब्रह्मचारी ॥ ६ ॥

ब्रह्मचर्यचरणशीलः । एतेन गृहस्थस्याप्यधिकारं दर्शयति ॥ ६ ॥

क्षपाशयः ॥ ७ ॥

यदि श्रमातिशयमपनोदयितुं मनाङ्निद्रां कुर्यात् तदा क्षपायामेव कुड्याद्यवष्टम्भेनोपविष्टः सन्, नतु कथंचिदपि दिवा शय्यायां वा ॥७॥

मधुमांसलवणश्राद्धानि वर्जयेदविचारयन् ॥ ८ ॥

'अकामोपेतं मधु न दुष्यति'

इति वाजसनेयकादौ यद्दृश्यते, तथा

'............सैन्धवं तु न दुष्यति ।'

इति,

'दत्त्वा तु देवविप्रेभ्यः खादन्मांसं न दुष्यति ।'
(मनु० ५।३२)

इति,

'व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् ।'
(मनु० ३।२३४)

इत्याद्यागममविचारयन्नेव प्रयत्नविशेषेण मध्वादीन्यत्र व्रते वर्जयेत् ॥ ८ ॥

गवाजिनं शाणीचीरं कुतपं मार्गं वा वास उच्यते ॥ ९ ॥

गवाजिनं गोचर्म । शाणीचीरं वरासिखण्डः । मृगस्येदं मार्गं चर्म । कुतपमुक्तम् ॥ ९ ॥

सर्वाकुशलमोक्षाय
मरुतोऽप्याचरंस्तथा ॥ १० ॥

अध्ययनकाले वैगुण्यकृतस्यैवान्यकालकृतस्यापि समस्तस्येहजन्मकृतस्य पूर्वजन्मविहितस्य च अकुशलस्य पापस्य कर्मणो मोक्षाय विनाशायैतद्व्रतं भवति सम्यक् कृतं सत् ।

तथाच मरुदादयोऽपि तादर्थ्येनैवाचरितवन्तो-ऽसम्भाव्यमानव्यामोहा इति दृढप्रमाणकमे-तत् ॥ १० ॥

त्र्यहं सायं त्र्यहं प्रात-
स्त्र्यहं भुञ्जेदयाचितम् ।
त्र्यहं नैव तु भुञ्जीत ।
एतद्वसुभी रुद्रैरादित्यैश्चरितं व्रतम् ॥११॥

मरुद्भिश्चेति विज्ञेयम् । त्रीण्यहानि सायमेव भुञ्जीत होमकालादूर्ध्वम्, त्र्यहं प्रातरेव, त्र्यहं त्वयाचितं लब्धमेव भुञ्जीत, त्र्यहं तूपवस-नम्,–इति क्रमेणैव द्वादश दिनानि व्रतम् । एतत्कृच्छ्रं व्याख्यातम् । अस्य प्राजापत्यमिति नाम । एवंप्रकारं क्लेशसाध्यमन्यदपि कृच्छ्र-शब्देनोच्यते कूर्चसान्तपनादिकम् ॥ ११ ॥

एतमेव प्रकारमतिकृच्छ्रेऽतिदिशन्नाह

एष एवातिकृच्छ्रस्य
विधिरेवं विधीयते ॥ १२ ॥

यः कृच्छ्रस्य प्रकारः स्थानशयनब्रह्मच-र्यादिक उक्तः, स एष एवातिकृच्छ्रस्य विधिः ।

यद्येवमभेद एव स्यात् तदत्र कोऽतिदेशावका-
शोऽस्य भिन्नविषयत्वादित्याशंक्याह एवं विधी-
यते इति, विशेष इति शेषः ॥ १२ ॥

तथाचाह

एतेष्वेव तु कालेष्वेकैकं पिण्डं
प्राश्नीयात् ॥ १३ ॥

भोजने विशेष इत्यर्थः । तथाचैतेष्वेव सा-
यमादिषु भोजनकालेष्वेकैकं ग्रासमश्नीयाद-
तिकृच्छ्रं चरन् । पिण्डप्रमाणं त्वस्याविकारेण
यावद्ग्रासो मुखे वर्तते पाणिपूरणभोजन
इति ॥ १३ ॥

इति पंचमी काण्डिका ॥ ५ ॥

अथ

षष्ठी काण्डिका ।

तप्तकृच्छ्रमाह

तप्तकृच्छ्रं व्याख्यास्यामः

त्र्यहमुष्णाः पिबेदापस्त्र्यहमुष्णं पयः पिबेत् । त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षः परं त्र्यहम् ॥ १ ॥

कृच्छ्रकालेष्वेव सायमादिषु उष्णजलपानादिकम् । पयः क्षीरम् । सर्पिस्त्र्यहमयाचितम् । वायुभक्ष इति वायुमेवोपजीवेत् पवित्रतार्थं शरीरसन्धारणार्थं च, नत्वन्यत्किमपि भुञ्जीत पिवेद्वेति तीव्रोपवासनत्रयविधानमेवैतत् ॥१॥

बृहस्पतेस्तु कूर्चस्य
एष एव विधिः स्मृतः ॥ २ ॥

बृहस्पतेरित्यार्षम् । प्ररोचनार्थं कूर्च इति संज्ञा । यः कृच्छ्रस्य स्थानासनादिप्रकार उक्तः, स एव कूर्चस्यापि । तुशब्दोऽप्यर्थे भिन्नक्रमः ॥ २ ॥

पूर्ववद्विशेषमाह

यवागूं यावकं शाकं
पयः सर्पिः कुशोदकम्।
त्र्यहं त्र्यहं तु प्राश्नीया-
द्वायुभक्षः परं त्र्यहम्॥ ३॥

यवागूरपासिततुषयवसम्पाद्या पेयप्राया प्रसिद्धा। यावकोऽपि तद्वत्, स तु भक्तप्रायः कठिनः। शाकं तु हविष्यमेव, नत्वविशेषेण। एवं भोजनेऽपि सायमादौ कृच्छ्रादौ ज्ञेयम्। कुशोदकमिति समाहारनिर्देशात्सहोपयोगः। तेन सप्त त्र्यहा भवन्ति॥ ३॥

इति षष्ठी काण्डिका॥ ६॥

अथ

सप्तमी काण्डिका ।

अथ सान्तपनम् ॥ १ ॥

कृच्छ्रविधिं व्याख्यास्याम इति वाक्यशेषः । अथशब्दः पृथक्स्थानतां पूर्वेभ्यो द्योतयति॥१॥

मरुतां होमो मरुतस्तर्पयेत् ॥ २ ॥

मरुतामेवात्रार्षम् । अतस्तेषामेव होमः । तानेव चोदकेन तर्पयेत् । द्वयमपि चैतत् स्नानादूर्ध्वम् ॥ २ ॥

गोमूत्रं गोमयं क्षीरं
दधि सर्पिः कुशोदकम् ।
एकरात्रोपवासश्च
कृच्छ्रसान्तपनं स्मृतम् ॥ ३ ॥

कृच्छ्ररूपं च तत्सान्तपनं कृच्छ्रसान्तपनम् । कुशोदकमेकत्राहनि, गोमूत्रादिकमेकैकमहन्यहनि, एकरात्रोपवासश्चेति सप्तरात्रः ॥ ३ ॥

एतदेव त्रिरभ्यस्तं
महासान्तपनं स्मृतम् ॥ ४ ॥

एतदेव सान्तपनं यथास्थानं गोमूत्रादिभक्षणमुखेन त्रिरभ्यस्तं दण्डकलितकेन वा महासान्तपनं भवति । तेन भंग्या सान्तपने सप्तोपवासाः,महासान्तपने चैकविंशतिः पर्यवस्यन्तीति महदेतत्तपः । यत्तु याज्ञवल्क्ये सान्तपनस्य द्व्यहत्वं,महासान्तपनस्य च सप्ताहत्वं प्रतीयते, तदपि विकल्पेन शक्तिविशेषभावापेक्षया पुरुषान्तर एव कल्प्यते सर्वस्मृतीनां प्रामाण्यात् । नत्वेतावता सर्वत्र संकोचव्याख्यया क्लेशोऽनुभवनीयः । तत्र याज्ञवल्क्यवचनम्

'पंचगव्यं तु गोक्षीरं दधि मूत्रं शकृद्घृतम् ।
जग्ध्वापरेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरन् ॥' (३।३१४)

अनेन पंचगव्यादीनामेकत्राहन्युपयोगः, द्वितीये तूपवास उक्तः, यतो महासान्तपनमाह

'पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः ॥' (३।३१५)

इति । अत्र पंचगव्यादीनां पृथगुपयोगात् षडहानि, सप्तमेऽहन्युपवासः ॥ ४ ॥

इति सप्तमी काण्डिका ॥ ७ ॥

अथ

अष्टमी काण्डिका ।

सर्वेषां कृच्छ्रव्रतानां द्वादशाहादधिकत्वं, गौणत्वं तु द्वादशाहस्येति तेन तदीया एव मन्त्रादयोऽत्र गुणत्वेन योजयितव्या इत्यभिप्रायेण गुणविशेषमाह

अथात्र व्रतोपायनम् ॥ १ ॥

एतेषु समस्तेषु कृच्छ्रेषु अत्र यत्पूर्वं व्रतमुक्तं व्रतनियमाश्चेति तस्योपायनं ग्रहणोपाय इतिकर्तव्यता द्वादशाहादित्युच्यते, त्यागोपायश्च तत एवेति ज्ञेयम् ॥ १ ॥

वसवो व्रतपतयो रुद्रा व्रतपतय आदित्या व्रतपतयो मरुदंगिरसो व्रतपतय इति व्रतमालभ्य, वसूनद्भिस्तर्पयेत प्रथमेऽस्मिँस्त्रिरात्रे, रुद्रान् द्वितीये, आदित्यांस्तृतीये, मरुदंगिरसश्चतुर्थे ॥ २ ॥

प्रथमस्य त्रिरात्रस्य प्रथमेऽहनि स्नात्वाग्नि-

समीपे 'वसवो व्रतपतयः' इत्यादिभिर्मन्त्रैर्व्रतं गृह्णीयात् । 'वसवो व्रतपतयो व्रतमालभे तद्वः प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ।' इत्यादिमन्त्रलिङ्गाद्धि संसिद्ध्यन्तव्रतग्रहणानुज्ञासिद्धये देवताभ्यर्थनं प्रतीयते। तथा व्रतान्ते व्रतत्यागः कर्तव्यः 'वसवो व्रतपतयो व्रतमचारिषं तदशकं तद्वः प्रब्रूमस्तन्नो गोपाय' इत्यादिभिः। एवमेतैश्चतुर्भिर्मन्त्रैर्व्रतमालभ्य प्रथमे त्रिरात्रे अद्भिर्वसून्प्रत्यहं तर्पयेत्, द्वितीये रुद्रान्, तृतीये आदित्यान् । चतुर्थे त्रिरात्रे मरुदङ्गिरस उदकेन सन्तर्पयेत् ॥ २ ॥

'आ मे गृहाः' इति द्वाभ्यां वसूनां स्थालीपाकस्य जुहोति ॥ ३ ॥

प्रथमे त्र्यहेऽहन्यहनि चरुणा मन्त्रद्वयेन वसुभ्यो होमः कार्यो ब्रह्मचारिस्नातकाभ्यां लौकिकेऽग्नौ, गृहस्थेनाहवनीये गृह्येऽग्नौ वा ॥३॥

'असंख्याता' इति दशभी रुद्राणाम् ॥४॥

होमः कार्यो द्वितीये त्र्यहे ॥ ४ ॥

'कदाचन स्तरीरसि' इति पंचभिरादि-
त्यानाम् ॥ ५ ॥

तृतीयत्र्यहविषयमेतत् ॥ ५ ॥

'सान्तपनाः' इति षड्भिर्मरुद्गणानां
'त्वामग्ने अंगिरसो' 'वायुरग्रेगाः' ॥६॥

चतुर्थे त्र्यहे मरुद्गणानामंगिरसां चाहन्य-
हनि होमो यथायोग्यमेतैर्मंत्रैः कर्तव्य
इत्यर्थः ॥ ६ ॥

हव्यवाहमिति स्विष्टकृतम् ॥ ७ ॥

हव्यवाहमित्यादिमन्त्रेण स्विष्टकृतं जुहुयाद-
विशेषेण सर्वेषु त्र्यहेषु ॥ ७ ॥

वसवो व्रतपतयो व्रतमालभे तद्वः प्रब्रवीमि तच्छकेयं
तेनर्ध्यासम् ॥

हे वसवो वासयितारः यतो यूयं व्रतपतयो
व्रतस्य पालयितारस्तत्तस्माद्युष्मान्प्रब्रवीम्यभ्य-
र्थये अहं व्रतमालभे आरभे, तस्माद्युष्मत्प्रसा-
दादहं शकेयं शक्नुयां पारयेय, तेन च व्रतेन
संपन्नेन ऋध्यासं समृद्धिं फलविशेषात्मिकां
प्राप्नुयाम् ॥

रुद्रा व्रतपतयो व्रतमालभे तद्वः प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ॥

पूर्वव्याख्यानेनैव गतार्थः । रुद्रास्त्वभ्यर्थनीया विशेष्यन्ते । एवमुत्तरयोरादित्या मरुदंगिरसश्च विशेष्यन्ते । शेषं तुल्यम् ॥

आदित्या व्रतपतयो व्रतमालभे तद्वः
प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ॥
मरुदङ्गिरसो व्रतपतयो व्रतमालभे
तद्वः प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ॥
आ मे गृहा भवन्त्वा प्रजा म
आ मा यज्ञो विशतु वीर्यावान् ।
आपो देवीर्यज्ञिया मा विशन्तु
सहस्रस्य मा भूमा मा प्रहासीत् स्वाहा ॥
आ मे गृहा भवन्त्वा पुरोरुक्
स्तुतशस्त्रे माविशतां समीची ।
आदित्या रुद्रा वसवो मे सदस्याः
सहस्रस्य मा भूमा मा प्रहासीत् स्वाहा ॥

त्रिष्टुप्छन्दः । मुद्गलस्य भार्म्यश्वस्यार्षम् । मे मम गृहा दारा आभवन्तु । प्रजाश्च पुत्रा ममाभवन्तु । यज्ञश्च वीर्यवान्मां विशतु । तथा देवीः देव्यः आपो यज्ञिया यज्ञसाधनभूता मा मां विशन्तु साहाय्यं भजन्ताम् ।

सहस्रशब्दोऽतिभूयस्त्वोपलक्षणार्थः । भूमशब्दः पुष्कलधनविषयः । सुबहूनां भूरिधनं तन्मा मा प्रहासीत् मां मा त्याक्षीत् । स्वाहा सुहुतमस्तु ॥ तथा मम गृहा उपांशुप्रभृतयः आभवन्तु । तेषामेव च गृहाणां या पुरोरुक् पुरोऽनुवाक्या हविर्ग्रहणात्पूर्वमन्त्र आभवतु, स्तुतशस्त्रे च मामाविशतां समीची सम्यगञ्चने सम्मुखमित्यर्थः । आदित्या रुद्रा वसवश्च मम सदसि भवाः सदस्याः भवन्तु । सहस्रेत्यादि व्याख्यातम् ॥

असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १ ॥

अग्निप्रकरणे रुद्राभिधानाः षडनुवाकाः पठ्यन्ते 'नमस्ते रुद्र मन्यवे' इत्याद्याः । तन्मध्ये एते दश मन्त्राः । सर्वेषु तेष्वनुवाकेषु देवानामार्षम् । तथाच श्रूयते

'रुद्रं वै देवा यज्ञान्निरभजन् । स देवानायतया आयामवत्या सेनयाभिपर्यावर्तत । एते देवा भीता एतच्छतरुद्रियमपश्यंस्तेनैनमशमयन्यच्छतरुद्रियं जुहोति तेनैतं रुद्रं विततधन्वानं संहतेषुं मन्युमन्तं महाबाहुं शमयति ॥'

इति । ये भूम्यामधि पृथिव्यामीश्वरत्वेना-न्तर्वर्तमाना व्यवस्थिता रुद्रा असंख्याता सहस्राणि असंख्यानि सहस्राणि 'शेश्छन्दसि बहुलम्' (६।१।७०) इति शेर्लुक् अपरिमिता रुद्रा इत्यर्थः, तेषां कुपितानामारोपितगुण-धनुष्काणां हननोद्यतानां सतां धन्वानि धनूंषि अवतन्मसि अवतनुमः इदन्तो मसिः, अव-तारितगुणानि कुर्मः स्तुतिद्वारककोपप्रशान्त्या सहस्रयोजने अतिदूरे स्थिताः सन्तः । 'ऊध-सोऽनङ्' 'धनुषश्च' (५।४।१३२) इत्यनङ् ।

येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ २ ॥

येऽस्मिन्प्रत्यक्षे सर्वेषामन्तरिक्षे आकाशे अर्णवे समुद्रे आकाशं हि सूक्ष्मसमुद्रयुक्तमि-त्याहुः रात्र्यादाववश्यायादिरूपजलपतनदर्श-नात् , अथवा ये समुद्रेऽन्तरिक्षे च महति अधि भवा अधिपतित्वेन वर्तमानाः, तेषां ध-नूंषि अवरोपितज्यानि दूरादेव कुर्म इति पूर्ववत् ॥

ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपाश्रिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ३ ॥

ये रुद्रा नीलग्रीवा अशुक्लगलाश्च दिवं स्वर्गमुपाश्रिताः । शेषं पूर्ववत् ॥

ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४ ॥

ये शर्वा रुद्रा अधःक्षमाचराः पातालचराः ॥

ये वनेषु शष्पिंजरा नीलग्रीवा विलोहिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५ ॥

ये विपिनेषु तरुगुल्मलतावितानतृणादिगहनेषु स्थिताः शष्पवत् कोमलतृणवत् पिंजराः कपिलाः नीलग्रीवाश्च, तथा विलोहिता नितान्तरक्ताः ॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६ ॥

ये चान्नेषु भुज्यमानेषु, पीयमानेषु क्षीरादिषु प्रच्छन्नरूपेणान्तर्गताः सन्तो भोक्तॄन् पातॄंश्च जनान् विविध्यन्ति ताडयन्ति व्यथयन्ति ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ७ ॥

ये भूतानां पृथिव्यादीनां देवविशेषाणां वाधिपतयो रक्षकाः । विशिखासो मुण्डाः । कपर्दिनो जटिलाः ॥

ये पथीनां पथिरक्षय ऐडमृदा यव्युधः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ८ ॥

ये पथीनां अध्वन्यानां पथिरक्षय अध्वन्याः सन्तो रक्षका आदित्यरूपा इत्यर्थः । इडा अन्नं तत्समूह ऐडं, तन्मृद्नन्ति कोमलीकुर्वन्ति इति ऐडमृदाः । युधि संग्रामे युवन्ति मिश्रीभवन्तीति यव्युधः योद्धार इत्यर्थः ॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ९ ॥

ये तीर्थानि प्रचरन्ति तपोतिशयसिद्धये सृकावन्तः सातिशयबुद्धियुक्ताः, निषङ्गाः खड्गास्तद्युक्ताः ॥

य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितष्ठिरे ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १० ॥

ये रुद्रा एतावन्त इयत्तया अवधृता, भूयांसो वा इयत्तया अनवधृता दिशो वितष्ठिरे दिक्षु विविधं स्थिताः ॥

कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ १ ॥

ऐन्द्री । बृहती । एक उपशब्दः पादपूरणः 'प्रसमुपोदः पादपूरणे' (८।१।६) इति पाणिनिवचनात् । 'स्तरी हिंसायां' । हे इन्द्र त्वं न कदाचन नैव कदाचित् स्तरीहिंसको यजमानस्य भवसि, प्रत्युत सश्चसि दाशुषे । सश्चतिरनुग्रहकर्मा । दाशुषे इति द्वितीयास्थाने व्यत्ययेन चतुर्थी । दाश्वांसं दातारं यजमानमनुगृह्णासि फलेन योजयसि । एको नुशब्दः क्षिप्रवचनः, द्वितीयो निश्चयार्थः । इच्छब्दोऽवधारणार्थ एकः, उपेदित्यत्र तु पादपूरणार्थः । मघमन्नं धनं च विद्यते यस्य स मघवा । हे मघवन् धनेश ते तव देवस्य दानादिगुणयुक्तस्य सम्बन्धि दानं दीयमानं स्वर्गादिफलं भूयः प्रचुरं क्षिप्रमेव उपपृच्यते 'पृची सम्पर्के' सम्बध्यते । केन । अर्थाद्दाशुषा यजमानेन । 'दाश्वान्साह्वान्मीढ्वांश्च' (६।१।१२) इति दाश्वाञ्छब्दो निपातितः 'दाशृ दाने' इत्यस्य ॥

कदाच न प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्य सवनं त इन्द्रियमातस्था अमृतं दिवि ॥ २ ॥

'इदि परमैश्वर्ये' इत्यस्येन्द्रः । सच पूर्वमंत्रेऽपि आदित्ये प्रवृत्तः आदित्यानां स्थालीपाके विनियोगात् । आदित्यो वात्रेन्द्रो ब्रह्मा प्रजापतिस्तस्यैव प्रकाशविभवत्वात् । 'युच्छ प्रमादे' । हे इन्द्र त्वं सम्यक् पूजितः सन् न कदाचित् प्रयुच्छसि प्रमाद्यसि यज्ञे फलवैगुण्यादिरूपेण । यत उभे देवमानुषजन्मनी निपासि नितरां रक्षसि । हे तुरीय त्वरमाण यद्वा चतुर्थगायत्रीपादात्मकपरब्रह्मस्वभाव आदित्य ते तव सम्बन्धि सवनं सूयमानं क्रियमाणं कर्म सूयतेऽनेन फलमिति सवनमिति कर्म, इन्द्रियमिन्द्रदृष्टं, दिवि द्युस्थानममृतममरणधर्मकमातस्थौ आस्थितं यजमानं तत्र प्रापयतीत्यर्थः ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्त्यादंहोश्चिद्या वरिवोवित्तरासत् ॥३॥

त्रिष्टुप् । आदित्यदैवत्या । आदित्या एवादित्यासः 'आज्जसेरसुक्' । भवता इति सुब्व्यत्ययः ।

मृडयन्त इति तृचः स्थाने शतृ । हे आदित्या यतो भवन्तो मृडयितारः सुखयितारः 'मृड सुखने' अतो हेतोरयं भवद्दैवत्यो यज्ञो देवानां यजमानानां सुम्नं सुखं प्रत्येति सुखाभिमुखो गच्छति सुखं साधयतीत्यर्थः। किंच वः युष्माकं सम्बन्धिनी सुमतिः कल्याणी बुद्धिः अर्वाची अभिमुखा सती आववृत्त्यात् अस्मदभिमुखा आवर्ततां पुनःपुनरस्माकं कल्याणी मतिर्भवत्वित्यर्थः । कीदृशी मतिः । अंहोश्चिद्या वरिवोवित्तरासत् । चिच्छब्दोऽप्यर्थे । असत् भवति । वरिवो धनम् । या अंहोरपि पापिष्ठस्यापि वरिवोवित्तरा धनलब्धितरा भवति ॥

विवस्व आदित्यैष ते सोमपीथस्तस्मिन्मन्दस्व ।
या दिव्या वृष्टिस्तया त्वा श्रीणामि ॥ ४ ॥

तमांसि विवासयतीति कृत्वा विवस्वान् । हे विवस्वन् आदित्य अदितेरपत्य एष ते तव सोमपीथः सोमपानं सोमग्रहे विनियोगात् ज्योतिष्टोमे सोमपीथः सोमरसः, इहतु ऊहेनोपचारेण वा सोमपीथः स्थालीपाकस्तस्मिन्स्थालीपाके मन्दस्व तृप्तिं भजस्व । अनेनैव कर्मानुष्ठानेन

या दिव्या वृष्टिः, तया त्वां श्रीणामि मिश्रीकरोमि मेघादिद्वारेण वृष्ट्या संयोजयामीत्यर्थः ॥

अदब्धेभिः सवितः पायुभिष्ट्वं
शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे
रक्षा मा किर्नो अघशंस ईशत ॥ ५ ॥

हे सवितः अद्यास्मिन्नहनि नः अस्माकं गयं गृहं परिपाहि परिपालय । कैः। पायुभिः पालनशीलैः पानशीलैर्वा रश्मिभिः। अदब्धेभिः अनुपहिंसितैः । यतस्त्वं हिरण्यजिह्वः सत्यवादी, तेन सुविताय फलप्रसवनाय यज्ञाय नव्यसे नवाय गयं गृहं रक्ष । किंच मा नः अस्मान् किः कश्चित् अघं पापं शंसतीत्यघशंसः पापिष्ठ ईशत प्राभूत् ॥

सान्तपना इदं हविर्मरुतस्तज्जुजुष्टन ।
युष्माकोती रिशादसः ॥ १ ॥

हे मरुतः इदं हविः युष्माकं, तत्तस्मात् जुजुष्टन जुषत भजध्वं, ऊती रक्षाश्चास्माकं कुरुत । सम्यक् तापयन्ति विघ्नकारिणो रक्षःप्रभृतीनिति सान्तपनाः । यतो रिशादसः रि-

शतिर्हिंसाकर्मा 'दसु उपक्षये' हिंसाकारिणामुपक्षयकारिणः ॥

यो नो मर्तो मरुतो दुर्हृणायुस्तिरश्चित्ता वो वसवो जिघांसत् ।
द्रुहः सपाशं प्रतिषूमुचीष्ट तपिष्ठेन तपसा हन्तना तम् ॥ २ ॥

हे मरुतः यो नः अस्मान् मर्तो मरणधर्मा मनुष्यो, दुष्टं हृणं कार्यमपकारं कामयमानः, तिरः निकटे वर्तमानः गुप्तरूपो वा चित्ता चित्तेन तिरश्चित्तो वा अस्पष्टचित्तः जिघांसत् जिघांसेत् वः युष्माकं सम्बन्धी युष्मानपि वा यो जिघांसेत्—हे वसवः वासयितारः—अन्यच्च कीदृशो मर्तः, द्रुहः स्वभावेन हिंसकः—तं प्रतिषूमुचीष्ट सुष्ठु प्रतिमुंचत बध्नीत । तथा हन्तन हिंसत । केन । तपिष्ठेन तपसा अतिशयेन तपसा । कीदृशं तम् । सपाशं पाशयति पाशः पुत्रदारादिः स्ववर्गः, सह पाशेन वर्तमानं सपशुबान्धवमित्यर्थः ॥

गृहमेधा रिशादसो मरुतो मापभूतन ।
प्रमुञ्चन्तो नो अंहसः ॥ ३ ॥

गायत्री । हे मरुतः गृहमेधा अस्माकं भवत गृहं मेधयन्तीति गृहमेधाः । कीदृशाः सन्तः ।

रिशादसः हिंसानां क्षयकारिणः, अस्मान् अंहसः पापात् प्रमुञ्चन्तः सन्तः । मा अपभूतन अस्माकं अभिभवं मा कार्षुः ॥

प्र बुध्न्या व ईरते महांसि
प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहश्रियं दम्यं भागमेतं
गृहमेधीयं मरुतो जुषध्वम् ॥ ४ ॥

त्रिष्टुप् । हे मरुतः एतं भागं हविर्लक्षणं स्थालीपाकं जुषध्वं भजध्वम् । गृहमेधीयं गृहदेवतार्हं प्रयाजानुयाजहीनम् । एतेन च भागेन प्रयज्यवः इज्यमानाः सन्तः अस्मभ्यं दम्यं दमनार्हं अभिनवकरितुरगप्रभृतिकं प्रतिरध्वं ददत सहश्रियं कनकमणिमुक्ता-कलापादिलक्ष्मीयुक्तम् । महांसि च तेजांसि नामानि च 'यज्वानोऽमी धार्मिकाः सत्पुत्राः' इत्यादीनि प्रतिरध्वम् । यतो बुध्ने भवा बुध्न्या भूमिलोके वर्तमाना जना वो युष्मान् प्र ईरते प्रेरते उपसर्पन्ति युष्मदधीनाः सिद्धि-ष्वित्यर्थः ॥

क्रीडं वश्शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभि-प्रगायत ॥ ५ ॥

हे प्रकृता मरुतः वः युष्माकं सम्बन्धि शर्धः बलं क्रीडं क्रीडयत्वस्मान् । कणतिः शब्द-कर्मा, कणन्तीति कण्वा वायवः यूयमेव मारुतं मरुतां सम्बन्धि शर्धः प्रगायत कथयत यादृशं तदिति । कीदृशं शर्धः । रथेशुभं रथविमानादीनामनुकूलं गमने, तथानर्वाणं लिंगव्यत्ययः । अनर्वं अप्रच्युतमित्यर्थः ॥

अत्यासो न ये मरुतः स्वश्चो यक्षदृशो न शुभयन्त मर्याः । ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीडिनः पयोधाः ॥ ६ ॥

त्रिष्टुप् । अतन्तीत्यत्या अश्वाः । नशब्दः सर्वत्रोपमार्थीयः । ये मरुतः अश्वा इव स्वश्चः शोभनगतयः, ये च यक्षदृश इव शुभयन्तः शुभमिच्छन्तः सम्यगवलोकनं कुर्वन्ति यक्षा यज्वानः मर्या मर्त्याः, ते हर्म्येष्ठा भवन्तु यज्ञमण्डपस्था भवन्तु तत्र क्रीडन्त्वित्यर्थः । शिशव इव शुभ्रा अनाहार्यशोभायुक्ताः । प्रक्रीडनशीला वत्सा इव वत्सासः, अत एव प्रक्रीडनशीलाः । पयोधाः पयो धयन्ति पिबन्ति ये ते पयोधाः अभिनवाः । ते हि प्रक्रीडनशीला भवन्ति वत्साः शिशवश्च ॥

त्वामग्ने अंगिरसो गुहाहितमन्वविन्दञ्छिश्रियाणं वने वने।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमंगिरः॥

हे अग्ने त्वामंगिरसः गुहाहितं अंगारेषु गुप्तमन्वविन्दन् लेभिरे वने वने शिश्रियाणं तेषां वनस्पत्यादीनां वनेष्वाश्रितम् । सहो महत् महता सहसा बलेन मथ्यमानस्त्वं जायसे । यस्मात्स त्वमेवंभूतः, तस्मात्त्वामृषयः सहसो बलस्य पुत्रमाहुः । अंगिरः अंगारेषु जातः ॥

वायुरग्रेगा यज्ञप्रीस्साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः ॥

वायुरेव सर्वदेवतानामग्रे गच्छति यस्मात्, तस्मात्स एव प्रथमं यज्ञप्रीः यज्ञे प्रीयते तर्प्यते । तेन 'अंगिरोभ्यो दीयमाने हविषि तन्मध्ये वायवेऽपि हविर्दीयते' इति लिंगाद्वायोरपि देवतात्वं प्रतीयते यतो वायुरेव मनसा साकं सह यज्ञं गत् गच्छति । शिवः शान्तः । रूपेण यज्ञोपकारिणा नियुज्यन्ते इति नियुतः अश्वाः ताभिरश्वाभिस्तुल्यं कृत्वा गच्छति ॥

हव्यवाहमभिमातिषाहं रक्षोहणं पृतनासु जिष्णुम् ।
ज्योतिष्मन्तं दीद्युतं पुरन्धिमग्निं स्विष्टकृतमाहुवेम ॥

वयमग्निमाहुवेम आह्वयामः हव्यवाहं यो देवानां पितॄणां च हव्यं वहति तम् । अभिमन्यते इति अभिमाः शत्रुः, तं प्रसहते अभिभवति यस्तमभिमातिषाहम् । रक्षसां हन्तारम् । पृतनासु परसेनासु जयनशीलम् । ज्योतिष्मन्तं ज्वालाकरालम् । दीद्युतं अतिशयेन द्योतमानम् । पुरं समूहं धत्ते धयति वा पुरन्धिस्तम् । यजनमिष्टं, शोभनमिष्टं करोतीति स्विष्टकृत् तम् ॥

वसूंस्तर्पयामि रुद्रांस्तर्पयामि आदित्यांस्तर्पयामि मरुदंगिरसस्तर्पयामि ॥

वसवो व्रतपतयो व्रतमचारिषं तदशकं
तद्वः प्रब्रूमस्तन्नो गोपायत ॥
रुद्रा व्रतपतयो व्रतमचारिषं तदशकं
तद्वः प्रब्रूमस्तन्नो गोपायत ॥
आदित्या व्रतपतयो व्रतमचारिषं तदशकं
तद्वः प्रब्रूमस्तन्नो गोपायत ॥
मरुदङ्गिरसो व्रतपतयो व्रतमचारिषं तदशकं
तद्वः प्रब्रूमस्तन्नो गोपायत ॥

हे वसवः वासयितारः व्रतपतयो व्रतस्य पालयितारः युष्मत्प्रसादादहं व्रतमचारिषं

च्चरितं सम्पादितं मया व्रतम् । तद्व्रतमहमशकं युष्मत्प्रसादादशक्रवं शकितं पारितं मया व्रत-मित्यर्थः । तत्तस्माद्वयं वः युष्मान् ब्रूमः तद्व्रत-मास्माकीनं व्रतं यूयं गोपायत रक्षत । एतेनै-वान्यदपि मन्त्रत्रयं व्याख्यातम् ॥

इति अष्टमी काण्डिका ॥ ८ ॥

अथ

नवमी काण्डिका ।

वर्षासु श्रवणेनाध्यायानुपाकरोति ॥१॥

अत्र 'अन्तेवासिनां योगमिच्छन्' इति वक्ष्यमाणं सम्बन्धनीयम् । यद्यदध्ययनाध्यापनांगं स्मर्यते, तत्तत्किल वक्तव्यम् । उपाकरणं चाध्ययनाध्यापनयोरप्यंगम् । तथाच 'अन्तेवासिनां योगमिच्छन्' इत्यतोऽध्येतुः फलसम्बन्धः प्रतीयते । 'अमुष्मै कामायायुषे त्वा' इत्यतश्च मन्त्रलिंगादुपाकर्त्राचार्येण प्रयुज्यमानाद्द्वयोरपि शिष्याचार्ययोरविशेषेण फलं प्रतीयते । तत्र त्रैविद्यकत्वसिद्ध्यर्थं वेदाध्ययनांगभूतानि व्रतानि प्रतिपादितानि । अधीतवेदस्यापि च शिष्यस्यांगोपांगग्रहणार्थं गुरोर्वास इष्यते शिल्पादिशिक्षार्थं च । तथाच स्मृतिः

'कृतशिल्पोऽपि निवसेत्कंचित्कालं गुरोर्गृहे ।
अन्तेवासी............ ॥' (या० २।१८४)

इत्यादि । तत्रान्तेवासिनां योगं सम्बन्धमि-

च्छन्नाचार्य उपाकरणं वेदानां कुर्यात्। उपाकरणं स्वीकरणं, मनसा संकल्पनं, एतत्स्थानकविशेषादि मया अस्मै शिष्याय प्रवक्तव्यमिति। शिष्यो हि शिल्पांगोपांगपरिज्ञानार्थापि गुरौ वसन् स्थानकविशेषादिकमपि गुरोः सकाशादधीते, तमध्यापयता गुरुणा उपाकरणं कर्तव्यम्। शिष्यो यदि कस्मैचिदध्यापयति, तदा तेनापि कर्तव्यम्। सोऽपिहि शिष्यस्य गुरुः। नच वक्तव्यं शिष्यस्याचार्यवृत्तित्वाम्नानाद्ब्रह्मचारिणि गुरौ कथं वृत्तिस्तस्य भोजनास्तरणादिदानसामर्थ्याभावादिति,यतो भैक्षवृत्तित्वमप्याम्नातम्। सम्भवति च त्रैविद्यकस्य ब्रह्मचारिणोऽपि धनविशेषप्राप्त्या ज्ञानादिना वा स्वशिष्यपोषणसामर्थ्यम्। तस्मात्तेनाप्युपाकरणं कर्तव्यं यथासंभवम्। श्रावणभाद्रपदौ मासौ वर्षाः। तत्र यत् प्रथममेव श्रवणनक्षत्रं, तत्रैवोपाकरणं कर्तव्यं प्रथमपरित्यागे कारणाभावात् 'प्रथमं वा नियम्येत कारणादतिक्रमः स्यात्' इति नयेन। किं कुर्वता। अन्तेवासिनां सांगोपांगादिशिक्षार्थं गुरौ नि-

वसतां योगं सम्बन्धमध्यापयित्रध्याप्यलक्षण-मिच्छता अन्तेवासिनश्च प्रज्ञातिशयसम्बन्ध-मिच्छतेति फलतो व्याख्या ॥ १ ॥

स जुहोति 'अपवा नामासि तस्यास्ते जोष्ट्रीयं गमेयमहमिध्मेधस्परि मेधा-मृतस्य जगृहुरहं सूर्य इवाजनि स्वाहा' रन्तिर्नामासि, युक्तिर्नामासि, योगो ना-मासि, इत्युत्तरास्तिस्त्रः । तस्यास्त इति सर्वत्रानुषजति ॥ २ ॥

स जुहोति य उपाकरोति 'अपवा नामासि' इत्यादिभिर्यजुर्भिः । अन्यास्तिस्त्रः । एतेषु यजुषुः प्रथममन्त्रस्थं 'तस्यास्ते' इत्येतदनुषज्यते वाक्य-परिपूरणसामर्थ्यात् अनुषंगो वाक्यसमाप्ति सर्वेषु तुल्ययोगित्वादिति नयेन । तेन 'रन्ति-र्नामासि तस्यास्ते' इत्यादीनि त्रीणि वाक्यानि भवन्ति । समस्तपाठः शाखांतरीयत्वात् ॥ २ ॥

युजे स्वाहोद्युजे स्वाहा युक्त्यै स्वाहा योगाय स्वाहेत्यन्तेवासिनां योगमि-च्छन् ॥ ३ ॥

अन्तेवासिनां योगमिच्छन्निति प्रत्येकं सम्बध्यते ॥ ३ ॥

'दधि क्राव्ण' इति त्रिर्दधि भक्षयित्वा दर्भपाणिः सावित्रीं त्रिरन्वाहादितश्च त्रीननुवाकान् 'कस्त्वा युनक्ति' इति च ॥ ४॥

'दधि क्राव्ण' इति मन्त्रः सकृत्। दधिभक्षणमेवावर्तते त्रिः । सावित्री सवितृदैवत्या तत्सवितुरित्यादिकैव महाप्रभावत्वात् । नान्या 'आकृष्णेन रजसा' इत्यादिका । आदावादितः ये त्रयोऽनुवाकाः 'इषे त्वा' इत्यादिरेकः, 'देवस्य त्वा' इत्यादिर्द्वितीयः, 'वसोः पवित्रमसि' इत्यादिस्तृतीयः । 'कस्त्वा युनक्ति' इति चाश्वमेधे परिधिनियोजने नियुक्तः । उभयत्रान्वाहेत्यनुषंगः ॥ ४ ॥

तस्यानध्यायः ॥ ५ ॥

तस्याध्यापयितुरध्येतुश्चानध्याय उच्यते ॥५॥

न विद्योतमाने न स्तनयति ॥ ६ ॥

वर्तमाननिर्देशात्तात्कालिकमेतदनध्ययनम् । विद्योतमाने वैद्युते तेजसि । स्तनयति गर्जति मेघे ॥ ६ ॥

आकालिकं देवतुमुलं विद्युद्वन्वोल्का ॥७॥

आकालिकं समानकालमुच्यते। य एवादिः स एव चेदन्तो भवति, तस्य वचने आकालिकशब्दो निपातितः 'आकालिकडाद्यन्तवचने' (पा० ५।१।११४) इति सूत्रेण, टकारो ङीबर्थः । आकालिकी विद्युत्, य एवोपक्रमकालः, स एव विनाशकालो विद्युत इत्यर्थः । एवमिहापि यस्मिन्प्रथमार्धप्रहरादौ देवतुमुलादिकमुत्पद्यते स तस्यादिकालः स एव द्वितीयदिवसेऽन्तकालो भवति एतदाकालिकशब्देनोक्तम् । एतदुक्तं भवति—यावति काले देवतुमुलादिकमुत्पद्यते, तावत्येव काले द्वितीयदिवसेऽध्ययनयोग्यता भवति अन्तरा त्वनध्यायः । ये त्वाकालिकशब्दं 'न विद्योतमाने न स्तनयति आकालिकम्' इत्येवं पूर्वेण सम्बन्धयन्ति, यावद्देवतुमुलादि श्रूयते तावन्मात्रकालं चानध्ययनमिति व्याचक्षते; तेषामुत्तरत्राहोरात्रिकमनध्ययनं शब्दतः प्रयोज्यं, वर्तमाननिर्देशलब्धस्य च पुनर्वचनं पुनरुक्तम् । तत्रान्तरिक्षे गीतवाद्यात्मकं गन्धर्वा-

दिकृतं देवतुमुलम् । विद्युदिति विद्युत्पातो विवक्षितोऽत्राहोरात्रादिकाध्ययनावसरे, धन्वशब्देनापीन्द्रधनुर्वर्षाकालादन्यत्र । वर्षासु तात्कालिकत्वं सदाचाररूढम् । उल्कयापि महत्या उल्कायाः पातो विवक्षितः । तारकामात्रपतनेऽपि ह्युल्काशब्दप्रयोगोऽस्ति ॥ ७ ॥

आचारेणान्ये ॥ ८ ॥

अन्येऽप्यनध्ययनहेतव आचाराध्यायोक्ता अनुसर्तव्याः भूकम्पचन्द्रार्कोपरागनृपतिमहापुरुषप्रमयप्रभृतयः ॥ ८ ॥

तद्यथा

अत्यक्षराः शब्दाः सन्ततवलीकप्रस्रावाः ॥ ९ ॥

अतिक्रान्ता अक्षराणि अत्यक्षराः शब्दाः निर्घातहुंकारतलास्फोटनप्रभृतयः । सन्ततस्य वलीकस्य प्रस्रावो, नतु प्रस्रावमात्रं तस्य प्रायेण भावात् । एतद्द्वयमाकालिकस्यानध्ययनस्य निमित्तम् ॥ ९ ॥

अर्धपञ्चमान्मासानधीत्य पंचार्धषष्ठान्वोत्सृजते, उत्सृजामहेऽध्यायान्, प्रतिविश्वसन्तु छन्दांसि, कस्त्वा विमुञ्चतीति च ॥ १० ॥

अर्धं पंचमो येषां तेऽर्धपंचमा मासाः सार्धचत्वारः । एवमर्धषष्ठाः सार्धपंच । मासानुक्तविधिनाधीत्याध्ययनार्थप्रयोजकव्यापाराध्ययनं निर्वर्त्य अध्याप्येति यावत्, उत्सृजते अध्यायान् उत्सर्गसंकल्पनं करोतीत्यर्थः, नच वेदाध्ययनस्य त्यागोऽस्ति, अनध्यायविशेषेभ्योऽपिवा उत्सर्गे मन्त्रद्वयसम्बन्धमाह 'उत्सृजामहे' इत्यादि ॥ १० ॥

तस्यानध्यायोऽमावस्यां पक्षिणीं नाधीते ॥ ११ ॥

अयमन्योऽनध्यायः । पक्षाविवोभयपार्श्ववर्तितया अमावस्यायाश्चतुर्दशी प्रतिपच्च । यद्यपिचाचाराध्याये द्वे पौर्णमास्यौ द्वे अमावस्ये इति चतुर्दशीसहिते पौर्णमास्यमावस्ये उक्ते, तथापि प्रतिपद्विधानार्था पुनः श्रुतिः । तदुक्तं 'गुणार्थेन पुनःश्रुतिः' (पू० मी० १।२।४१) इति ॥११॥

नात ऊर्ध्वमभ्रेषु ॥ १२ ॥

अत उत्सर्गादूर्ध्वमभ्रदर्शनमात्रेऽपि सति नाध्येतव्यं, का कथा विद्योतमानादिषु ॥

अपवा नामासि तस्यास्ते जोष्ट्रीयं गमेयमहमिद्धमेधः परि मेधामृतस्य जगृहुरहं सूर्य इवाजनि स्वाहा ॥ रन्तिर्नामासि, युक्तिर्नामासि, योगो नामासि, युजे स्वाहा उद्युजे स्वाहा युक्त्यै स्वाहा योगाय स्वाहा ॥

ब्राह्मी विद्या देवता । पवते स्वरूपाच्च्यवते इति पवा अध्रुवा, तत्प्रतिषेधेन अपवा ध्रुवा विद्या । केचिदप्वेति पठन्ति, तत्राप्ययमेवार्थः । अपवा नामासि नित्यानन्दा, तस्यास्तव सम्बन्धि यदेधः इद्धं रूपं, तदहं गमेयं प्राप्नुयाम् । इद्धमेध इति पुनर्वचनमनादित्वख्यापनार्थम् । कीदृशमेधः । जोष्ट्रीयमतिशयेन सेवनीयम् । एतस्य अमृतस्य मरणरहितस्य ब्रह्ममयस्य विद्यारूपस्य मेधां परिजगृहुर्विपश्चितः मेधावन्तो विद्यास्वरूपं ब्रह्म लेभिरे इत्यर्थः, अथवा ऋतस्य सत्यस्य ब्रह्मणो मेधां परिजगृहुर्विपश्चितः । अतश्चाहमपि सूर्य इवाजनि सूर्य इवाहमुत्तमप्रकाशो ब्रह्मरूपनिकटः स्या-

ात्यर्थः । स्वाहा सुहुतमस्तु ॥ रमते क्री-
ति जगद्विवर्तादिना इति रन्तिः ब्रह्ममयी
ाद्या । युज्यते लोके विवर्तपरिणामशक्तिभि-
ति युक्तिः । एवं योगो, युक्, उद्युगि-
ादि व्याख्येयम् । पुनर्वचनं स्तुत्यर्थम् ॥

दधि क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥

अनुष्टुप् । अस्याश्च ऋचः सुरभिमतीति
म । तथाच श्रुतिः

'ऋत्विजो यजमानाश्च सुरभिमतीमृचमन्वाहुर्वाचमेव पुनते'
ते । अन्यत्राश्वसंस्कारोत्तरकालमृत्विग्य-
मानयोर्दधिभक्षणसमयादावियमभ्यर्थना इ-
पि यथायोग्यत्वं योजयितव्या । क्रामतीति
ावा । जयनशीलो जिष्णुः । व्याप्त्यर्थस्य
श्नोतेरश्वः, वेजनवान्वाजी अन्यत्राश्वः, इह
प्रजापतिः। यत्क्राव्णो जिष्णोरश्वस्य वाजिनः
श्वस्य संस्कारकाले अश्लीलाभिभाषणेन
ाण्यपवित्रीभूतानि दधि दध्ना पवित्राणि
कारिषं व्यत्ययेनैकवचनं उत्तरत्र च बहुव-
नदर्शनात् वयं अकारिष्म। प्रजापतेर्वा सर्वा-

त्मकस्य वेदात्मनो वा अज्ञानेनापभाषणेन बाल्यादितया अपवित्राणि मुखा मुखानि 'शेश्छन्दसि बहुल'मिति लुक् नः अस्माकं सुरभि सुरभीनि पवित्राणि करत् लोडर्थे लेट् 'इतश्च लोपः परस्मैपदेषु' (३।४।९७) इति तेरिकारलोपः 'लेटोऽडाटौ' (३।४।९४) इत्यडागमः करोतु। किञ्च अश्वः प्रजापतिर्वा अस्माकमायूंषि प्रतारिषत् प्रतरतु करोतु। 'तॄ प्लवनतरणयोः' पूर्ववत्पंचमलकारादि 'सिप् बहुलं लेटि' (३।४।३४) इट् गुणः वर्णव्यत्ययेनाकारः॥

इषे त्वोर्जे त्वा वायवस्थोपायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे॥

आप्यायध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्माः॥

मा वस्स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु॥

ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि यजमानस्य पशुपा असि॥ १॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे गोषदसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा॥

उर्वन्तरिक्षं वीहीन्द्रस्य परिषूतमसि माधो मोपरि परुस्त ऋध्या समाच्छेत्ता ते मा रिषत्॥

देव बर्हिश्शतवल्शं विरोह सहस्रवल्शा वि वयं रुहेम ॥

अदित्या रास्नासीन्द्राण्यास्सन्नहनं पूषा ते ग्रन्थिं ग्रश्नातु स ते मा स्थादिन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेस्त्वा मूर्ध्नाहरामि देवंगममसि ॥

तदाहरन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे ॥२॥

वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् ॥ अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः । मधुमद्धृतवत्पिन्वमाना जीवा जीवन्तीरुप वस्सदेम ॥ मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधायाः परेण धाम्नाहुतासि मा ह्वास्सा विश्वायुस्सा विश्वव्यचास्सा विश्वधाया हुतस्स्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याम् ॥

सम्पृच्यध्वमृतावरीरूर्मिणा मधुमत्तमाः । मंद्रा धनस्य सातयः ॥

इन्द्रस्य त्वा भागं सोमेनातनच्म्यधस्तमसि विष्णवे विष्णो हव्यं रक्षस्वापो जागृत ॥ ३ ॥

'इषे त्वा' इत्यादयो मन्त्रा दार्शपौर्णमासयोः शाखाच्छेदनादौ विनियुक्ताः श्रुतिलिंगादिभिः। तत्र परमेष्ठिनः प्राजापत्यस्यार्षम्, शाखादिरभिधेयो देवता । यजुषां छन्दो नास्तीत्येके । केचित्तु वैशेषिकं छन्द इच्छन्ति पिंगलपरिपठितं दैव्येकमित्यादि । तत्र च सर्वसंख्याया व्यवहारः पाद इत्यधिकारात् ।

इषे त्वा ॥

दैवी, अनुष्टुप्, त्र्यक्षरा, शाखाच्छेदने विनियुक्ता। 'इषे त्वेति च्छिन्दन्ति' इति। 'इषु इच्छायां' क्विप् तादर्थ्ये चतुर्थी 'सावेकाचस्तृतीयादिर्विभक्तिः (६।१।१६८) इत्यन्तोदात्तम् 'इषे' इति पदम्, अथवा इष्यते यस्य स इषः इष्यमाणोऽन्नादिः। अकारः प्रत्ययः। निमित्तात्कर्मसंयोगे सप्तमी। 'आद्गुणः'। 'एकादेश उदात्तेनोदात्तः' (८।२।५) इत्यन्तोदात्तत्वम्। 'त्वा' इति कर्मपदं युष्मदादेशः। कर्म च क्रियायाम्। तत्र क्रियाया अश्रवणाद्विनियोगबलाच्छिन्दन्ति इत्यध्याहारः। अन्नादिसिद्ध्ये त्वां छिन्दन्तीति समुदायार्थः। अन्नादिनिमित्तत्वं तु

'अग्नेर्धूमो जायते धूमादभ्रमभ्राद्वृष्टिः।'

इत्यादिश्रुतिकथितप्रणालिकया ॥

ऊर्जे त्वा ॥

'ऊर्ज बलप्राणनयोः' क्विबन्तः अन्नस्य बलस्य च नामधेयत्वेन प्रसिद्धः। शाखासन्नमने परिमार्जने च द्विपदस्यास्य मन्त्रस्य त्र्यक्षराया दैव्या

अनुष्टभो विनियोगः । परिमार्ज्मि सन्नमयामीति पर्यायेणाध्याहारः । बलार्थं त्वां परिमार्ज्मि सन्नमयामीति वाक्यार्थः ॥

वायवस्थोपायवस्थ ॥

अनुष्टुप् । वत्सदैवत्या । चतसृणां गवां सम्बन्धिनो वत्सान् शाखयोपस्पृशन् देशाद्देशान्तरं नयति कृतप्रस्रवणान् । हे वत्साः वायवः इव स्थ भवत कृतप्रस्रवणाः सन्तो वेगेनापसरत यावदहं क्षीरं गृह्णामि, उपायवस्थ उपगच्छत मातुः समीपे अनुसरत पुनः क्षीरं पातुमित्यर्थः ॥

देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥

धृतिश्छन्दः, गावो देवता, अनेन धेनूः प्राचीं गमयति । हे धेनवः वो युष्मान् देवो दानादिगुणकः, सविता कर्मणोऽनुज्ञाता फलप्रसविता वा प्रार्पयतु शरीरान्तरसम्बन्धं समर्पयतु देशान्तरं प्रापयतु, नत्वहं मानुषमात्र इत्यर्थः । किमर्थम् । श्रेष्ठतमाय कर्मणे यज्ञार्थं 'यज्ञो वै श्रेष्ठतमं कर्म' इति श्रुतिः ॥

'आप्यायध्वं' इत्यादि यजुः। हे अघ्न्याः अहन्तव्याः अघस्य पापस्य हन्त्र्यो वा देवस्येन्द्रस्य सम्बन्धिनं भागं भजनीयं सान्नाय्यलक्षणमाप्यायध्वम् 'प्यायी वृद्धौ' वर्धयत। यतो यूयं प्रजावतीः प्रजावत्यः पुत्रवत्यः, अनमीवा 'अम रोगे' इत्यस्यामीवाशब्दः व्याधिविशेषशून्याः, अयक्ष्माः यक्ष्मो व्याधिविशेषः राजयक्ष्माख्यस्तच्छून्याः, अथवा अयनमयः क्ष्मायां पृथिव्यां यासां ताः अयक्ष्माः। 'मा वस्तेन ईशत' वः युष्माकं स्तेनश्चौरो मा प्राभूत्। 'माघशंसः'—अघं पापं शंसतीत्यघशंसः चाण्डालादिः मा वः ईशत। 'परि वो रुद्रस्य हेतिर्वृणक्तु' परिवृणक्तु परिवर्जयतु। 'ध्रुवा अस्मिन्गोपतौ स्यात बह्वीः' अस्मिन्यजमाने स्थिरा भवत बह्वीः बह्व्यश्च भवतास्मिन्। 'यजमानस्य पशून्पाहि यजमानस्य पशुपा असि।' अनेन शाखां स्थापयति, हे शाखे यतस्त्वं स्वभावेनैव यजमानस्य पशुपाः अतो यजमानस्य पशून्पाहि॥ प्रथमोऽनुवाकः॥ १॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे॥

अनेन हविर्निदधाति । संकृतिश्छन्दः । हे धान्यादिक देवस्य सवितुरादित्यस्य प्रसवेऽनुज्ञायां वर्तमानस्तेन प्रकाशद्वारेण कर्मसु प्रवर्तनात्, अश्विनोः सम्बन्धिभ्यां बाहुभ्यां, पूष्णश्च हस्ताभ्यां नतु स्वकाभ्यां चर्मादिमयाभ्यां त्वामाददे । प्रतिग्रहादावप्यस्य विनियोगः ॥

गोषदसि ॥

बर्हिर्लवणीमश्वपशूनामाह गावः सीदन्त्यस्यामिति गोषत् तया बर्हिर्लवण्या गावो वर्तन्ते इत्येवमुक्तम् ॥

'प्रत्युष्टं रक्षः प्रत्युष्टारातिः' इत्यग्निमभ्यर्थयते पशूंस्तापयन् । 'उष दाहे' रक्षः राक्षस उपलक्षणमेतत् राक्षसपिशाचादिकं प्रतिदग्धमस्तु । न विद्यते रातिः धनं यत्र सोऽरातिरर्थाभावः अलक्ष्मीरित्यादिपर्यायः; अदानं कार्पण्यं वा अरातिः, शत्रुर्वा अरातिः स दग्धो भवतु ॥

बर्हिर्लवनायोत्तिष्ठन्नाह

प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा ॥

इयं मम धिषणा बुद्धिः बर्हिः कर्मभूतं अच्छ प्रागात् आभिमुख्येन गन्तुं प्रवृत्ता। 'अच्छाभेः शाकपूणिः' इत्यच्छशब्दोऽभेरर्थे आभिमुख्ये वर्तते। कीदृशी धिषणा। मनुना प्रजापतिना कृता, तथा स्वधया अन्नेन वितष्टा तीक्ष्णीकृता ॥

बर्हिःस्थानं गच्छति

उर्वन्तरिक्षं वीहि ॥

हे चरणयुगलक उरु विस्तीर्णमन्तरिक्षं वीहि गच्छ ॥

दर्भस्तम्बं त्रिः परिलिखति

इन्द्रस्य परिषूतमसि ॥

हे दर्भस्तम्ब त्वमिन्द्रस्य कृते परिषूतं जातः ॥

पर्वं मध्येन योजयति ॥

माधो मोपरि परुस्ते ॥

हे दर्भस्तम्ब ते तव परुः पर्व अधः उपरि मा भूत् परशुधारासाम्येन वर्ततामित्यर्थः ॥

लुनाति

ऋद्ध्या समाच्छेत्ता ते मा रिषत् ॥

'रुष रिष हिंसार्थः' ते तव समाच्छेत्ता लविता ऋद्धिं मा रिषत् मा हिंसीत् यज्ञसाधनशक्तिं मा च्छैत्सीदित्यर्थः । ऋद्ध्येति व्यत्ययेन तृतीया ॥

छिन्नशेषाणि भूमिलग्नानि पुनःप्ररोहणसमर्थानि बर्हिर्मूलानि अभिमृशति

देव बर्हिः शतवल्शं विरुह सहस्रवल्शा वि वयं रुहेम ॥

हे देव बर्हिः त्वं जातं सत् शतवल्शं शतशाखं विरुह वर्धस्व, वयमपि त्वत्प्रसादात् सहस्रवल्शाः सहस्रशाखाः विरुहेम वर्धिषीमहि ॥

बन्धनार्थं रज्जुं करोति

अदित्या रास्नासि ॥

असि त्वं अदित्याः पृथिव्या रास्ना रज्जुः ॥

बर्हिः सन्नह्यति

इन्द्राण्याः सन्नहनं पूषा ते ग्रन्थिं ग्रथ्नातु स ते मा स्थात् ॥

यतस्त्वमिन्द्राण्याः सन्नहनं बन्धनमतस्ते पूषा इन्द्रो ग्रन्थिं ग्रथ्नातु ते बर्हिषः, त्वा-

मिन्द्रो बध्नात्वित्यर्थः । सच ग्रन्थिर्ग्रथितः सन् तव चिरं मा स्थात् शीघ्रमेव तव विमुक्तस्य यज्ञोपयोगोऽस्त्वित्यर्थः ॥

उद्यच्छति बर्हिः

इन्द्रस्य त्वा बाहुभ्यामुद्यच्छे ॥

हे बर्हिः त्वामहमिन्द्रस्य सम्बन्धिभ्यां बाहुभ्यामुद्यच्छामि, नतु स्वकाभ्यां चर्मादिमयाभ्यामिति ॥

प्रोत्साहेन उद्धृतं मूर्ध्नि निधत्ते

बृहस्पतेस्त्वा मूर्ध्नाहरामि ॥

त्वामहं बृहस्पतेः सम्बन्धिना मूर्ध्ना शिरसाहरामि धारयामीति ॥

पूर्ववद्बर्हिराह

देवङ्गममसि ॥

असि त्वं बर्हिर्देवङ्गमं देवार्थं तव नयनमित्यर्थः ॥

न केवलं वयमेव देवार्थं त्वा नयामः, पूर्वैरप्येवमनुष्ठितमित्याह

तदाहरन्ति कवयः पुरस्तात् ॥

कवयः क्रान्तदर्शनाः सम्यग्विदितानुष्ठित-सकलवेदार्थाः तद्बर्हिरेवमेवाहृतवन्त इति तात्पर्यार्थः ॥

वेद्यामासादयति

देवेभ्यो जुष्टमिह बर्हिरासदे ॥

इदं बर्हिर्देवेभ्यो जुष्टमिति रुचितमिह वेद्यामासादयामीति ॥ द्वितीयोऽनुवाकः ॥ २ ॥

क्षीरपावनार्थं दर्भपवित्रं करोति

वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् ॥

हे पवित्र वसोर्धनस्य क्षीरस्य त्वं पवित्रं पावनं असि । शतसहस्रग्रहणमपरिमितत्वोपलक्षणार्थम्, अपरिमितच्छिद्रत्वादपरिमितधारमित्यर्थः । वसूनामिति, आस्तामिदमेकयजमानसम्भृतमल्पं पयः, यावज्जगतीगतानामितरयजमानसम्भृतानां पयसां पावनमसि । यद्वात्र मरुतो वसव उच्यन्ते इन्द्रसाहाय्येन वर्तमानाः, ते हि वसते आच्छादयन्तीति वसवः । तथाच ब्राह्मणम्

'वसूनां वा एतद्भागधेयम्'

इति ॥

वत्सैः संगृह्यमाणा गा अनुमन्त्रयते

अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः ॥

हे अयक्ष्माः व्याधिविशेषहीनाः अवध्यधना वा वो युष्मान् प्रजया संसृजामि । रायो धनस्य भक्ष्यविशेषात्मकस्य पोषेण बहुलाः प्रवृद्धदेहा भवन्तीः, यद्वा धनपुष्ट्या सह बहुलाः प्रचुराः भवन्तीः ॥

दुह्यमानासु जपति

मधुमद्घृतवत्पिन्वमाना जीवा जीवन्तीरुप वः सदेम ॥

हे गावः वो युष्मान्वयमुपसदेम अनवरतमित्याशास्महे । कीदृशीः । जीवन्तीः दीर्घायुषः, जीवाः प्राणयुता बलवतीरित्यर्थः । किं कुर्वतीः । मधुमत् मधुररससंयुक्तं, घृतवच्चातिस्निग्धं क्षीरं पिन्वमानाः स्रवन्त्यः ॥

गार्हपत्यादंगारराशिं पृथक्करोति

मातरिश्वनो घर्मोऽसि ॥

हे अंगारराशे त्वं मातरिश्वनो वायोः घर्मः तेजः । तथाच ब्राह्मणम्

'अन्तरिक्षं वै मातरिश्वनो घर्मः ।'

इति । अत्रान्तरिक्षशब्दः तात्स्थ्यादन्तरिक्षस्थे भानुतेजसि वर्तते ॥

उद्धृतेऽङ्गारराशौ उखामधिश्रयति

द्यौरसि पृथिव्यसि विश्वधायाः परेण धाम्नाहुतासि मा ह्वाः ॥

'उपस्तौत्येवैनामेतत्' इति श्रुतिः । यदा दिवःपतितेनोदकेन सम्पाद्यते तदा द्यौरिति स्तूयते । पृथिव्यवयवनिर्मितत्वात्पृथिवीति । विश्वं सर्वं धत्ते इति विश्वधा पृथिवी, तस्याः सम्बन्धिना परेणोत्कृष्टेन धाम्ना तेजसा सारेण असि त्वं अह्रुता 'ह्वृ कौटिल्ये' अकुटिला । यतश्च त्वमकुटिला, अतः मा ह्वाः द्रव्यधारणे व्यापृता सती कुटिला मा भूः ॥

तिसृषु धेनुषु दुग्धासु कां दुग्धवानसीति प्रश्ने अमूमिति चोत्तरे दोग्ध्राभिहिते अध्वर्युराह

सा विश्वायुः सा विश्वव्यचाः सा विश्वधाया ॥

या प्रथमं दुग्धा, सा विश्वायुः सर्वस्यायुषो धात्री क्षीरादिद्वारेण । तथाच श्रुतिः 'आयुर्घृतम्' इति । या द्वितीयस्थानदुग्धा, सा विश्वव्यचाः 'व्यच सम्भवे' विश्वं ततः सम्भवति यज्ञद्वारेण । या तृतीयस्थानदुग्धा, सा विश्वधाया विश्वं धापयतीति विश्वधाया सर्वस्य क्षीरेण तृप्तिं करोतीत्यर्थः ॥

पृथग्भवतो दुग्धविप्रुषोऽनुमन्त्रयते

हुतः स्तोकोऽहुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याम् ॥

यः स्तोको बिन्दुः, यश्च द्रप्सः स्थूलो भूमौ पतितः, स सर्व एवाहुतोऽपि हुतोऽस्तु । कस्मै । अग्नये, बृहते महते, तथा नाकाय नास्मिन् अकं दुःखमस्तीति कृत्वा स्वर्गाय । द्यावापृथिवीभ्यां च स्वाहा सुहुतमस्तु ॥

द्यौरन्तरिक्षमिति यत्र पात्रे दोहः कृतस्तस्मादुखायां क्षीरे आसिक्ते सति यत्किंचन दोहभाण्डे लग्नं, तदद्भिः प्रक्षाल्य स्थाल्यां निक्षिपति

सम्पृच्यध्वमृतावरीरूर्मिणा मधुमत्तमाः । मन्द्रा धनस्य सातयः ॥

हे आपः संपृच्यध्वं पयसोखास्थेन । ऋतावरीः सत्यवत्यः, यज्ञवत्यो वा तत्साधनत्वात् । केन । ऊर्मिणा कल्लोलैः । मधुमत्तमा मधुरतमरससंयुक्ताः । मंद्राः 'मदी हर्षे' मादयित्र्यः, तथा धनस्य सातयः साधिकाः ॥

दुग्धे दध्यासिञ्चति

इन्द्रस्य त्वा भागं सोमेनातनच्मि ॥

हे पयः त्वां सोमेन दध्ना आतनच्मि संकोचयामि, तञ्चिः संकोचनार्थः । कीदृशं त्वाम् । इन्द्रस्य भागं भजनीयम् ॥

गार्हपत्यसमीपे पयः स्थापयति

अदस्तमसि विष्णवे ॥

'दसु उपक्षये' अदस्तमनुपक्षीणं हे पयः यतस्त्वं विष्णवे विष्णवर्थं यज्ञोपयोगीत्यर्थः । 'यज्ञो वै विष्णुः' इति श्रुतिः ॥

हविरभिमन्त्रयते

विष्णो हव्यं रक्षस्व ॥

हे विष्णो इदं हव्यं हवनीयं रक्षस्व ॥
सजलेन दारुपात्रेण उखां पिदधाति

आपो जागृत ॥

हे आपः जागृत रक्षार्थं जागरूका भवत ॥
तृतीयोऽनुवाकः ॥ ३ ॥

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्द्ध्यै ॥

यज्ञादिकं प्रस्तुतं कर्मैवमुच्यते । कः प्रजापतिः, हे कर्मन्, त्वां युनक्ति संपादयति फलेन वा योजयति । स इत्यपि प्रजापतेरेव निर्देशः परोक्षरूपेण। अभ्यासे भूयांसमर्थं मन्यन्ते यथा अहो रमणीया अहो रमणीयेति । विष्णुर्यज्ञः, स च प्रजापतिरेव । यज्ञस्त्वा युनक्तु फलेन संवर्धयतु । किमर्थम् । अस्य प्रारब्धस्य यज्ञादिकस्य कर्मणः समृद्ध्यै माहात्म्याय । सावित्र्यनुवाकवदनुवचनमस्य ॥

अमुष्मै कामायायुषे त्वा प्राणाय त्वा व्यानाय त्वापानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा पोषाय त्वा घोषाय त्वाराद्घोषाय त्वा प्रच्युत्यै त्वा ॥

अत्र प्रत्येकं तर्पयामीत्यध्याहृत्य योजनीयम् । अमुष्मै कामाय त्वां प्रजापतिं तर्पयामि । असावित्युक्ते नाम प्रतीयात् । तेन 'अमुष्मै' इत्यस्मात्काम्यमानपशुपुत्रादिफलविशेषनामानि प्रत्येतव्यानि । आयुषे आयुरर्थं त्वां तर्पयामि । सर्वत्र तादर्थ्ये चतुर्थी । व्युष्ट्यै त्वां तर्पयामि 'उष दाहे' विशेषेण अविद्यास्मितारागद्वेषाभिनिवेशलक्षणानां क्लेशानां उष्टिः, तदर्थम् । रयिर्धनं, तदर्थम् । राधोऽन्नम् । पोषस्तत्त्वज्ञानस्य, तदर्थम् । प्रकर्षेण च्युतिः संसारस्य, तदर्थं त्वां प्रजापतिं तर्पयामि ॥

अग्नये वायवे सूर्याय ब्रह्मणे इन्द्राय प्रजापतये भवाय शर्वाय ईशानाय ईश्वराय विष्णवे बृहस्पतये यजुर्वेदाय च्छन्दोभ्य ऋषिभ्यो वेदेभ्यो ब्राह्मणेभ्यः सोमेभ्यः सोमपेभ्य आचार्येभ्यो नमो नमः ॥

इत्युदकतर्पणमाचाराध्यायोक्तमदोऽप्यध्यायोपाकरणम् ॥

इति नवमी काण्डिका ॥ ९ ॥

अथ

दशमी काण्डिका ।

अथोपनिषदर्हाः ॥ १ ॥

शिष्या उच्यन्ते इति शेषः । अध्यायोपाकरणानन्तरमध्ययनप्रसंगेनोपनिषदं रहस्यशास्त्रं येऽर्हन्ति, ते उपनिषदर्हाः शिष्याः नैष्ठिकब्रह्मचार्यादय उच्यन्ते ॥ १ ॥

ब्रह्मचारी सुचरिती मेधावी कर्मकृद्धनदः प्रियो विद्यया वा विद्यामन्विच्छंस्तानि तीर्थानि ब्रह्मणः ॥ २ ॥

ब्रह्मचारी नैष्ठिकब्रह्मचर्ययुक्तः, सुचरितमस्यास्तीति सुचरिती सदाचारो गृहस्थादिरपि । मेधावी ग्रहणधारणशक्तियुक्तः । कर्मकृत् नित्यनैमित्तिककर्मानुष्ठानरतः गुरुपरिचर्याचरणकारी च । धनदः प्रचुरधनदाने समर्थः ग्रहणान्ते गुरुदक्षिणावसाने, नतु पूर्वं निषिद्धत्वात्

'न पूर्वं गुरवे किञ्चिदुपकुर्वीत धर्मवित् ।'

इति। प्रियः पुत्रादिः सदाचारः। यश्च विद्यया विद्यान्तरमादित्सते, तानि ब्रह्मणस्तीर्थानि वेदस्य रहस्यरूपस्य दाने निपानानि ग्रहणे चोपाया इत्यर्थः। तीर्थं हि निपानं स्मृतम्।

'तीर्थाभिधानमिच्छन्ति त्रितयं कृतबुद्धयः।
शास्त्रं चैव निपानं च वारि चाप्यृषिसेवितम्॥'

इति॥ २॥

इति दशमी काण्डिका॥ १०॥

अथ

एकादशी काण्डिका ।

नवं नवावसानं समं समवस्रावं समवस्तुत्य वा यस्माद्वा प्रागुदीचीरापो निर्द्रवेयुः प्रत्यगुदीचीर्वा तस्मिन्प्राग्द्वारं दक्षिणद्वारं वा शरणं कारयेत् ॥ १ ॥

अध्याहिताग्निं वक्ष्यति । तत्संबद्धमिदमनागतावेक्षणेनाभिधीयते । सहधर्मचारिणीमुद्वोढुकामस्तस्मिन्देशविशेषे शरणं कारयेत् स्थपत्यादिभिर्विवहनात्पूर्वमेव । कीदृशं शरणम् । प्राग्द्वारं दक्षिणद्वारं वा । तथा नवं अन्यानुपयुक्तदार्वादिनिर्मितम् । नवावसानं अवसानं भूप्रदेशः नवप्रदेशमित्यर्थः । सममनिम्नोन्नतम् । समूलं प्रशस्तक्रीडाकुसुमादिमूलयुक्तम् । समवस्रावं समोऽवस्रावो यत्र तत्समवस्रावं, उदकं प्रक्षिप्तं यत्र समं कृत्वा स्रवति सञ्चरति, तत्समवस्रावं, अतिरश्चीनमित्यर्थः । समवस्रावं यद्भूमंडलं तस्मिन्निति संबन्धः । समवस्तुत्य

वा यस्मात्प्रागुदीच्यः आपो निर्द्रवेयुः, प्रत्यगु-
दीच्यो वा निर्हरेयुः निर्गच्छेयुः । अथवा
प्रतीचीमुदीचीं वा यत्रापो गच्छन्ति, तस्मिं-
स्तिरश्चीनेऽपि शरणं कारयेत् ॥ १ ॥

मध्यमायाः कर्ते प्रागग्रोदगग्रान्दर्भा-
नास्तीर्य तेषु स्थूणामवदधाति ॥

ध्रुवां सिनोम्यमृतस्य पत्नी क्षेमे तिष्ठ
घृतमुक्षमाणा । तां त्वा स्थूणे सर्ववीराः
सुवीरा अरिष्टवीरा इह संविशेम ॥

इहैव स्थूणे अमृतेन रोहाश्वावती गो-
मत्यमृतावती सूनृतावती । ऊर्जस्वती प-
यस्वती चास्मान्स्थूणे पयसाभ्याववृत्स्व ॥

आ त्वा कुमारस्तरुण आ वत्सो ज-
गता सह । आ त्वा परिस्रुतः कुम्भ आ
दध्नः कलशैरयमिति ॥ २ ॥

मध्यमायाः स्थूणायाः स्तम्भस्य सम्ब-
न्धिनि कर्ते 'कृती च्छेदने' कृत्यते इति कर्तः
खातः गर्तस्तस्मिन्, प्रागग्रानुदगग्रान्वा स्वस्ति-

कसन्निवेशभाजो दर्भानास्तीर्य, तेष्वेव दर्भेष्व-धिकरणभूतेषु स्थूणां स्तम्भं मध्यममव-दधाति प्रक्षिपति ॥

प्रक्षेपे चेदं मन्त्रत्रयमाह ध्रुवामित्यादि

हे स्थूणे त्वां ध्रुवां दृढां कृत्वा सिनोमि प्रक्षि-पामि गर्ते। त्वं हि अमृतस्य अमरणधर्मकस्य पत्नी पालयित्री। अतः क्षेमे तिष्ठ क्षेमनिमित्तं तिष्ठ। किं कुर्वती। घृतमुक्षमाणा ददती घृतग्रहणं सर्वसम्पदुपलक्षणार्थम्। यत एवं-भूतासि, अतस्तां त्वां हे स्थूणे वयमाविशेमेत्या-शास्महे। प्रविष्टाश्च सन्तस्त्वदायत्तं गृहमिहैव जन्मनि सर्ववीराः बहुपुत्राः, सुवीराः सुपुत्राः, अरिष्टवीराः अनुपहिंसितपुत्राश्च स्याम ॥

हे स्थूणे इहैव स्थाने अमृतेनाविनाशिना रूपेणोपलक्षिता सती रोह रूढा भव। कीदृशी सती। अश्वावती अश्वयुक्ता। एवं गोमती। अमृतैश्च गृहमानुषैर्युक्ता सती। सूनृतं सत्यं वैदिकं च कर्म यागादिकं, तद्वती। ऊर्जस्वती 'ऊर्ज बलप्राणनयोः' प्राणयन्ती बलवती वेत्यर्थः। पयस्वती क्षीरवती। सर्वसमृद्धियुक्त-

मस्मद्गृहं कुर्वित्यर्थः । अत एवाह 'अस्मान्स्थूणे पयसाभ्याववृत्स्व' हे स्थूणे अस्मान् पयःप्रभृतिना आभिमुख्येन वर्तमानेन आववर्तयस्व ॥ किंच त्वां कर्मभूतां कुमारस्तरुण आविशतु, वत्सश्च आविशतु । एकवचनं व्यत्ययेन बहुवचनस्थाने । जगता जंगमेन गर्भवासादिना परिस्रुतः परिवृतो दुग्धस्य कुम्भस्त्वाविशतु अयं दध्नः कलशैः सह ॥ २ ॥

प्राञ्चं वंशं समारोपयति ऋतेन स्थूणामधिरोह वंशोग्रो विराजन्नपसेध शत्रून् । अथा रयिं सर्ववीरा वयन्त इति ॥ ३ ॥

मन्त्रमाह ऋतेन स्थूणामिति

विराट् । हे वंश ऋतेन सत्येन अपातिना रूपेण त्वं स्थूणामधिरोह स्तम्भस्योपरि तिष्ठ । कीदृशः। उग्रः अनभिभवनीयः सन् विशेषेण राजमानः। अन्यच्च अपसेध नाशय शत्रून् आत्मीयान् स्थितिप्रतिबन्धहेतुभूतान्, आस्माकांश्च । स्तम्भाधिष्ठात्री देवतैवमभिधीयते । एवं

च शत्रून् अस्मदरींश्चाभिभूय निश्चिन्तं गृहाधिष्ठातरि त्वयि स्थिते सति, अथा अनन्तरं तव वयमेव सर्ववीराः बहुपुत्रयुक्ताः रयिं धनं भविष्यामः प्रतिदिनं हविर्दानेन वयमेव हि ते स्वभूताः। इतिशब्दो मन्त्रसमाप्तिप्रतीकः। मध्यमवंशस्तम्भयोः मन्त्रविनियोगादितरस्तम्भवंशानाममन्त्रकं तूष्णीमेवारोहणं शस्यते ॥

उत्तरपूर्वं समाधानम् ॥ ४ ॥

'प्राञ्चं वंशं समारोपयति' इति 'प्राग्द्वारं दक्षिणद्वारं वा शरणं कारयेत्' इति चोक्तम्। तत्र प्राग्द्वारतापक्षे पूर्वाग्रता वंशसमाधानस्य भावयितव्यैतदर्थमिदं सूत्रम् । समाधानं सम्यगाधानं वंशस्यारोपणं कुड्यकोटिषु ॥

इति एकादशी काण्डिका ॥ ११ ॥

अथ

द्वादशी काण्डिका ।

'अमी वहा वास्तोष्पते' इति चतसृभिर्वास्तोष्पतीयस्य स्थालीपाकस्येष्ट्वाथ वास्त्वाविशेत् ॥ १ ॥

अथ विवाहे कृते वैवाहनाग्नौ प्रवेशितेऽनन्तरमध्याहिताग्निको वास्त्वाविशेत् ॥

वसन्त्यस्मिन्निति वास्तु गृहम् । किं कृत्वा प्रविशेत् । वास्तोष्पतीयस्य स्थालीपाकस्येष्ट्वा । वास्तोर्गृहस्य पतिरधिष्ठात्री देवता वास्तोष्पतिः मयूरव्यंसकादित्वात्सुपोऽलुङ्निपातनम् । वास्तोष्पतिर्देवता यस्य स वास्तोष्पतीयः 'वृद्धाच्छः' व्यत्ययेन षष्ठी स्थालीपाकेनेष्ट्वा, अवयवावयविसम्बन्धेन वा, नहि समस्तोऽसौ हूयते भक्ष्यसंरक्षणात् । ननु चेष्ट्वा आविशेदित्युक्तमयुक्तं प्रविश्य यजनात्? सत्यं, किन्त्वध्यवसायपौर्वकाल्येन नेत्रे सम्मील्य हसतीत्यादिवत् ।

याजयित्वेति वा णिजर्थो योजनीयः । निर्वापस्यामन्त्रकस्येष्टत्वात् 'अमी वहाः' इत्यादिना 'चतसृभिः' इत्यन्तेन शिष्यहितार्थं चतस्रः पठित्वार्पयति ॥

अमी वहा वास्तोष्पते विश्वा रूपाण्याविशन् ।
सखा सुशेव एधि नः ॥ १ ॥

वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ ३ ॥

वास्तोष्पते शग्मया संसदा ते सक्षीम हि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

प्रथमा गायत्री । अन्यास्त्रिष्टुभः । वास्तोष्पतिरन्तरिक्षनिवासी वायुः, यद्वा प्राणः । हे वास्तोष्पते गृहस्वामिन् विश्वेषां सर्वेषामस्मत्परिजनानां रूपाणि स्वरूपाणि आविशन् अधितिष्ठन् अमी अमून् परिजनानावह प्रापय पूर्वमेतानेव गृहं प्रवेशय । प्रथमं परिजनस्य गृहप्रवेशमनुजानीहि पश्चादस्माकमिति भावः ।

एवमेवानुतिष्ठन्नोऽस्माकं सखा मित्रं सुप्रवेशनीयो भव ॥

हे वास्तोष्पते प्रतिजानीह्यस्मान् गृहपतिः परमः सन् अस्मानप्यवान्तरस्वामितयांगीकुर्विंत्यर्थः । स्वावेशः सुखप्रवेशश्च नोऽस्माकं भव । तथानमीवो व्याधिशून्योऽस्माकं भव । किंच यत्तुभ्यं किञ्चिदन्नो हविरादिकं, तन्नोऽस्माकं सम्बन्धि जुषस्व भजस्व । तथा शं सुखं नो भव द्विपदे मानुषरूपे, चतुष्पदे गवाश्वादिके ॥

हे वास्तोष्पते नः अस्माकं प्रतरणः प्रकर्षेण संसारसागरक्लेशतरणः एधि भव । 'अस भुवि' लोट्, सिपि ह्यादेशः 'हुझल्भ्यो' (६।४।१०१) इति धित्वं 'घ्वसोरेद्धावभ्यासलोपश्च' (६।४।११९) । गयस्फानः गयं गृहं, गृहे स्फीतः सन् गोभिरश्वैश्च सहितः हे इन्दो परमेश्वर ते तव सख्ये वर्तमाना वयमजरासः अजीर्णाः स्याम । त्वं च नोऽस्मान्प्रतिजुषस्व प्रीणीहि । क इव कान् । पितेव पुत्रान् ॥

हे वास्तोष्पते या त्वां संसदाते सेवते विभूतिस्तया वयमपि सक्षीम 'षच समवाये' युज्येमहि। कीदृश्या। शग्मया सुखरूपया, हिरणवया हितरमणीयया हिरण्ययुक्तया वा, गातुमत्या कीर्तिरूपगानयुक्तया उद्गातृगीतयुतया च। यच्चास्माकं किञ्चिद्वरमुत्कृष्टं त्वत्प्रसादोपनतं, तत्सर्वं पाहि रक्ष। किं कुर्वन्। अलब्धलाभात्मके योगे, प्राप्तपरिरक्षणरूपे च क्षेमे वर्तमानः। उतशब्दश्चार्थे। किंवा विशेषेण वास्तोष्पतिरेव प्रार्थ्यते। हे गृहदेवताः एवं सर्वा एव यूयं नोऽस्मान् स्वस्तिभिरविनाशैः पात रक्षत सर्वकालम्॥ १॥

वंशोद्वीक्षणिकान्ब्राह्मणान्भोजयेत्॥२॥

तस्मिन् गृहे ब्राह्मणान् भोजयेत्। तस्य च कर्मणो वंशोद्वीक्षणिकमिति नाम। ते हि वंशानुद्वीक्षमाणा भुञ्जते॥ ३॥

इति द्वादशी काण्डिका॥ १२॥

अथ

त्रयोदशी काण्डिका।

अथ पाकयज्ञाः ॥ १ ॥

सहधर्मचारिण्या सार्धं यो गृहप्रवेशः, तदनन्तरं पाकयज्ञाः कर्तव्यास्तदनुष्ठानावसरलाभात्। पाकनिर्वर्त्या यज्ञाः पाकयज्ञास्तेषामासूत्रणमात्रमिह क्रियते, विस्तरेण ते वक्ष्यन्ते॥

चतुर्विधः पाकयज्ञो भवति हुतोऽहुतः प्रहुतः प्राशितश्चेति ॥ २ ॥

बहुवचनेनोपक्रान्तानामिहैकवचनं यज्ञत्वसामान्यापेक्षया एकस्यैव चातुर्विध्यं प्रत्यक्षस्येव चाक्षुषादिभेदेनेति प्रदर्शनाय। चतुर्णामेवावान्तरभेदाः षट्। यानाह गौतमः

'अष्टकाः पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्री आश्वयुजी च।'

इति 'षट्पाकयज्ञसंस्थाश्च' इति। तत्र हुतो हवननिर्वर्त्यो वैश्वदेवादिः। अहुतस्त्वहवनसाध्यो बल्युपहारादिः। यस्य तु प्रारम्भे हवनं, स

प्रहुतोऽन्वष्टकादिः। प्रकृष्टेनाशनेन निर्वर्त्यते योऽतिथिब्राह्मणभोजनादिः, स प्राशितः। सर्वश्चायं यागो देवतोद्देशेन द्रव्यसंकल्पनात्॥

हुतो हुतानाम्॥ ३॥

प्रकृतिरिति शेषः। इहत्यानां हुतानां वैदिको होमः प्रकृतिरित्यर्थः। यतः इतिकर्तव्यतोपजीव्यते, सा प्रकृतिः। योपजीवति, सा विकृतिः। तथाच वैश्वदेवे प्राकृताः समूहनपर्युक्षणपरिस्तरणस्वाहाकारान्नप्रक्षेपादयः क्रियाः क्रियन्ते॥ ३॥

उपहारोऽहुतानाम्॥ ४॥

वैदिक उपहारोऽत्रत्यानामुपहाराणां प्रकृतिः। अत्रोपाग्नि विष्टरमास्तीर्यावाहनं कृत्वा स्रजो गन्धांश्चोपहृत्य धूपं प्रदाय बल्युपकल्पनमिति इतिकर्तव्यता॥ ४॥

पिण्डपितृयज्ञः प्रहुतानाम्॥ ४॥

वैदिकः पिण्डपितृयज्ञोऽत्रत्यानां प्रहुतानां प्रकृतिः। वैश्वदेवशेषपिंडप्रतिपत्तित्वात्तदीय-

पिण्डमन्त्रा ग्रासासनदानादयश्च तद्धर्मा भवन्त्यतिदेशात् ॥ ४ ॥

मधुपर्को ब्रह्मौदनश्च प्राशितानाम् ॥५॥

प्राशिता द्विविधा अतिथिभोजनदानात्मानो ब्राह्मणभोजनवितरणात्मानश्च । तत्रातिथिभोजनादावस्यातिथ्ये वैदिको यो मधुपर्कः, स प्रकृतिः । तत्र च श्रोत्रियाणां पाद्यार्घ्यमधुपर्कपूर्वं मांसप्रधानं भोजनमित्यादिर्विध्यन्तः । देवताविशेषोद्देशेन तु ब्राह्मणभोजनदाने आधानविहितो ब्रह्मौदनः प्रकृतिः, तत्रापि बर्हिर्युक्तेष्वासनेषु उपवेशनं अर्घ्यदानादिकं सघृतमन्नं देवतायै संकल्प्य 'प्राश्नन्तु भवन्तः' इत्यनुज्ञानपूर्वकं चाशनमित्यादिरित्थंभावः ॥५॥

दर्शपूर्णमासप्रकृतयः पाकयज्ञाः ॥६॥

साधारणेतिकर्तव्यतातिदेशोऽयम् । असाधारणास्तु पूर्वमितिकर्तव्यता निदर्शिताः ॥६॥

दार्शपौर्णमासिके विध्यंते अविशेषेण प्राप्ते क्वचिदपवादमाह

तेष्वावृदुपचारस्तूष्णीम् ॥ ७ ॥

आवृत् क्रिया । उपचारोऽनुष्ठानम् । तूष्णीं निर्वापावघातादिक्रियानुष्ठानममन्त्रकमित्यर्थः॥

अनर्थलुप्तम् ॥ ८ ॥

यल्लुप्तार्थं निष्प्रयोजनं, तत्प्रकृतौ दृष्टमपि न कर्तव्यं विकृतावमन्त्रकमपि । यथा पेषण-कपालोपधानादि स्थालीपाके निष्प्रयोजनम् । एवं सामिधेनीनां लुप्तत्वात् समिदाधानं लुप्तार्थत्वान्न कर्तव्यं प्रयाजाभावाच्चोपभृत् । सामिधेन्याद्यभावस्तु वक्ष्यमाणात्परिसंख्या-नात् । नचैतावता दर्विहोमगृहमेधीयादि-वदपूर्वत्वं पाकयज्ञानां किं दर्शपूर्णमासप्रकृ-तित्वाभिधानेनेति वाच्यं जुहूहोमादिधर्मोप-जीवनात् ॥ १३ ॥

इति त्रयोदशी काण्डिका ॥ १३ ॥

अथ

चतुर्दशी काण्डिका ।

उदगयने भार्यां विन्देत ॥ १ ॥

"स्नात्वा भार्यामधिगच्छेत्" इति स्नानानन्तरं भार्यान्वेषणकालः । भरणमर्हतीति भार्या 'अर्हे कृत्यतृचश्च' (३।३।१६९) इति ण्यत्। विन्देत लभेत पश्येदित्यर्थः । उदगयने आदित्यस्य दक्षिणादिग्भागादुत्तरादिग्भागाभिमुखगमने सति उत्तरायण इत्यर्थः ॥ १ ॥

नक्षत्राण्याह

कृत्तिकास्वातिपूर्वैर्वरयेत् ॥ २ ॥

कृत्तिका च स्वातिश्च पूर्वाणि च तैर्वरयेत् कंचित्प्रयुञ्जीत, नतु स्वयं वृणुयादित्यौचित्यं णिचा दर्शयति ॥ २ ॥

लक्षणिना लक्षणानि परीक्षयेत् ॥३॥

हस्तादिलक्षणवेदिना लक्षणानि शुभसूचकानि परीक्षयेत् । पाठक्रमादर्थक्रमस्य ब-

लीयस्त्वाद्यथार्थं क्रमो ज्ञेयः—लक्षणपरीक्षण-पूर्वकं वरणमिति ॥ ३ ॥

लक्षणालाभे परीक्षायाः करणान्तरमाह

भागधेयमपि वा पिण्डैः परीक्षयेत् ॥४॥

अपिशब्द उपायान्तराभ्युपगमे । वाशब्दो विकल्पे । पिण्डैर्वा भाग्यानि परीक्षयेत् भर्तर्यनुकूलत्वापादनानि पूर्वोक्तालाभ इत्यर्थः ॥

वेद्याः सीताया ह्रदाद्गोष्ठादादेवनादादहनाच्चतुष्पथादिरिणात्संभार्यं नवमम् । ऋतमेव परमेष्ठ्यृतं नात्येति किञ्चन । ऋत इयं पृथिवी श्रिता सर्वमिदमियमसौ भूयादिति ॥ ५ ॥

यज्ञार्था वेदिः प्रसिद्धा । सीता हलोत्खाता भूमिः । अशोष्यः पद्माद्याकरो जलाशयो ह्रदः । गोष्ठं गवाश्रयो गोकुलादिः । आदीव्यन्त्यस्मिन्नादेवनं कितवस्थानम् । आदह्यन्तेऽस्मिन्नित्यादहनं श्मशानम् । स्वस्तिकाकारेण सम्बध्यमानं मार्गद्वयं चतुष्पथः । इरिणं

ऊषरप्रदेशः । एतेभ्यः प्रत्येकैकं पिण्डं गृह्णीयात् । संभार्यं च नवमम्, अष्टभ्योऽपि वेद्यादिभ्यो लेशं लेशं मृदः संभृत्य, नवमं कुर्यादित्यर्थः ॥

वेद्यादिभ्य उद्धृतानां पिण्डानामनुमन्त्रणे मन्त्रमाह ऋतमेवेति । इतिशब्दः सर्वप्रतीकार्थः। परमेष्ठी प्रजापतिः । ऋतं सत्यं नात्येति नातिवर्तते किमपि । अतः सोऽत्र सन्निहितो भूत्वा सत्यं द्योतयतु । इयमपि वेद्यादिरूपा पृथिवी ऋते आश्रिता । असावित्युक्ते नाम प्रतीयात् । कन्या उच्यते असौ शोभावत्यादिसंज्ञिता । इयं प्रत्यक्षत्वेन वर्तमानत्वात् । इदं भूयः सत्यप्रकाशयोः ॥ ५ ॥

कन्याया नाम गृहीत्वा सर्वतः कृतलक्षणान्पिण्डान्पाणावादाय कुमार्या उपनामयेदेतेषामेकं गृहाणेति ब्रूयात् पूर्वेषां चतुर्णामेकं गृह्णतीमुपयच्छेत् ॥ ६ ॥

वेदिसीताह्रदगोष्ठोद्धृतानामन्यतमं गृह्णीयाच्चेत्तदोद्वहेदेनाम्, इतरग्राहिणीं तु वर्जयेत् ।

'वेदिपिण्डे हि वेदार्थक्रियासाहाय्यमावहेत् ।
प्रजावतीति सीतायां गोष्ठपिण्डे गवादिकम् ॥
ह्रदपिण्डे ह्रदोद्भूतकुसुमाभरणोचिता ।
तृप्तिदा चैत्यहेतुश्च भर्तृजीवनकारिणी ॥
श्मशाने विधवावश्यं द्यूतभूमौ कलिप्रिया ।
इरिणे नित्यसंतप्तावकीर्णा च चतुष्पथे ॥'

सम्भार्यमपीत्येके ॥ ७ ॥

मन्यन्ते इत्यध्याहारः । गृह्णतीमुपयच्छेदित्यनुषंगः ॥ ७ ॥

रोहिणी मृगशिरः श्रविष्ठोत्तरा इत्युपयमे ॥ ८ ॥

उपयमः स्वीकारः, तत्रैवानुकूलानि नक्षत्राणि एतानीत्यर्थः ॥

यद्वा पुण्योक्तम् ॥ ९ ॥

पुण्योक्तं ज्योतिःशास्त्रोक्तं यथासम्भवमनुसर्तव्यमित्यर्थः ॥

इति चतुर्दशी काण्डिका ॥ १४ ॥

अथ

पञ्चदशी काण्डिका ।

अथ ब्राह्मदेयायाः प्रदानविधिं वक्ष्यामः ॥ १ ॥

ब्राह्मेन विधिना या दीयते सा ब्राह्मदेया। तस्याः प्रकृष्टे दाने विधिमितिकर्तव्यतां वक्ष्यामः । अथेत्यधिकारार्थः । ब्राह्मो दैव आर्षः प्राजापत्य आसुरो गान्धर्वो राक्षसः पैशाच इत्यष्टौ विवाहाः । तत्र ब्राह्मासुरव्यतिरेकिणां षण्णां विधानं सुप्रथितं नेह वचनमर्हति । तेन ब्राह्मासुरयोरेवेतिकर्तव्यतोक्ता । तथाहि प्रसह्यापहारात् राक्षसो विवाहः, तत्र किं प्रकाराभिधानेन । एवमसंविज्ञातोपगमात्पैशाचोऽपि प्रकारवचनानर्होऽतिपापत्वात् । स्वयमिच्छन्त्या सहेच्छावतः संयोगो गान्धर्वः, तत्राप्यसाधारणेतिकर्तव्यता । सह धर्मश्चर्यतां, सहापत्यमुत्पाद्यतां, धर्मे चार्थे च कामे च न व्यभिचरितव्यमिति प्राजापत्यविधिः प्रथितः।

अलंकृत्य कन्यान्तर्वेदि ऋत्विजे प्रदीयते,— इति दैवो विवाह उक्तः स्मृतिकारैः । गोमिथुनं कन्यावते दद्यादित्यार्षस्य विधानम् ॥१॥

शुक्लपक्षस्य पुण्याहे पर्वणि वोदगग्रान्दर्भानास्तीर्य तेषूपविशतः प्राङ्मुखः प्रतिग्रहीता सामात्यः प्रत्यङ्मुखः प्रदाता ॥ २ ॥

शुक्लपक्षस्य सम्बन्धिनि प्रशस्ते ज्योतिःशास्त्रविशुद्धे दिवसे पर्वणि वा पौर्णमासीरूपे, विष्टरविशेषे पवित्रार्थमुत्तरदिगग्रान्दर्भानास्तीर्य, तेषु तयोर्दातृप्रतिग्रहीत्रोरुपविशेत् प्राङ्मुखो भूत्वा । कः । प्रतिग्रहीता । कीदृशः । सामात्यः परिजनसहितः । प्रदाता पुनः प्रत्यङ्मुख उपविशेत् तथैव सामात्यो दर्भानास्तीर्योदगग्रान् ॥ २ ॥

मध्ये प्रागग्रोदग्रान्दर्भानास्तीर्य तेषूदकं सन्निधाय व्रीहियवानुप्य दक्षिणत उदङ्मुखासीन ऋत्विगुपयमनं कारयेत् ॥ ३ ॥

तयोर्दातृप्रतिग्रहीत्रोर्दक्षिणदेशे उत्तराभिमुख उपविष्टः सन् ऋत्विग्विशेषः आचार्यस्तयोः उपयमनं दातृप्रतिग्रहीतृसम्बन्धं कारयेत्। किं कृत्वा । दातृप्रतिग्रहीत्रोर्मध्ये प्रागग्रानुदगग्रांश्च दर्भानास्तीर्य, तेषु च दर्भेषु कांस्यपात्र्यामुदकं सन्निधाय, तत्रोदकमध्ये ब्रीहियवस्यावपनं कृत्वा । अथ 'उदकं सन्निधाय' इति सामान्यवचनात्कंसस्य कुतो लाभः? 'कंसे हिरण्यं समुप्य' (१६।५) इति दर्शनात् ॥३॥

समेतेष्वाह ददानीति प्रतिगृह्णामीति त्रिरावेदयते ॥ ४ ॥

समेतेषु सङ्घटितेषु दातृप्रतिग्रहीतृबन्धुषु सत्सु ऋत्विग्ब्रूयात्, दातुस्तावदिदं ब्रूयात् कन्यास्मै प्रदीयतामिति, प्रतिग्रहीतुः कन्यास्मात्प्रतिगृह्यतामिति । ततो ददानि ते, ददानि ते, ददानि ते इति त्रिरुच्चारयेति दातारं बोधयेत्। दाता च तथैव कुर्यात् । एवं प्रतिगृह्णामि इत्यपि ऋत्विजावेदितः प्रतिग्रहीता ब्रूयात् । 'त्रिःसत्या हि देवाः' इति श्रुतिः,

'त्रिरभिहितं न व्यभिचारि भवति' इति त्रिरुच्चारणमिष्टमत एव समेतेष्वाहेत्युक्तम् । बहुजनसन्निधौ दत्तां प्रतिगृहीतां च नापहर्तुं त्यक्तुं वा शक्ष्यतीति ॥ ४ ॥

एतद्वः सत्यमित्युक्त्वा 'समाना वः' 'सं वो मनांसि' इति ऋत्विगुभौ समीक्षमाणो जपति ॥ ५ ॥

एतद्दानप्रतिग्रहकर्म युष्माकं सत्यमव्यभिचरितमस्त्विति लौकिकोक्त्या ऋत्विक् 'समाना' इत्यादि ऋग्द्वयं जपति, उभौ दातृप्रतिग्रहीतारौ वीक्षमाणः ॥

समाना व आकूतानि समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥ १ ॥
सं वो मनांसि सं व्रता समु चित्तान्याकरम् ।
अमी ये विव्रताः स्थन तान्न सन्नमयामसि ॥ २ ॥

अनुष्टुभौ । हे दातृप्रतिग्रहीतारौ वः युष्माकं सम्बन्धीन्याकूतान्यभिप्रायाः समानास्तुल्यान्येकरूपाणि आसति सन्तु, कस्यचिदपि कन्यापहाराद्यभिप्रायो दुष्टो माभूदित्यर्थः । एवं मनः समानमस्तु, अहं च वो युष्माकं तथा आ अकरं करोमि जपेन, यथा

सु सह असति सुष्ठु वः सहभावो भवति, तथा मनांसि समाकरं, व्रतानि च संमिलितानि करोमीत्यर्थः । एवं चित्तानि चैतन्यानि समाकरमिति योज्यम् । ये च युष्माकं मध्ये विव्रता विरुद्धाचाराः यूयमिति केचित्, अमी इति प्रत्यक्षं तानेव मुखविकारादिना दुराचारान्दर्शयति, स्थन भवथ, तान्न सन्नमयामसि नेतिवर्णोपजनः तान्वयं सन्नयामः सम्यक् नतान् कुर्मः सदाचारान् संपादयाम इत्यर्थः ॥ ५ ॥

इति पञ्चदशी काण्डिका ॥ १५ ॥

अथ

षोडशी काण्डिका ।

आसुरविवाहविधिमाह

अथ शुल्कदेयायाः ॥ १ ॥

प्रदानविधिरुच्यते इति शेषः । शुल्केन मूल्येन दीयते या, सा शुल्कदेया ॥ १ ॥

हिरण्यं व्यतिहरतः ॥ २ ॥

सुवर्णं विजिगीषया परस्परं ददतो दातृ-प्रतिग्रहीतारावसुरत्वात्, दस्युविजिगीषुप्रधा-नत्वाच्चासुराणां राजसत्वेनान्योन्योपचारं कु-रुत इति शस्यते । कन्यामूल्यभूतं तु सुवर्णं व्यतिहरतो निश्चिनुतो द्वौ दातृप्रतिग्रहीतारौ सम्भूयेत्यर्थद्वयं तन्त्रेणावगम्यते ॥ २ ॥

प्रजाभ्यस्त्वेति प्रददाति ॥ ३ ॥

तत्प्रकृतं हिरण्यं प्रजाभ्यस्त्वेत्यनेन ददाति वरः कन्यायाः पित्रे, हे हिरण्य प्रजार्थं त्वा-महं ददानि ॥ ३ ॥

रायस्पोषाय त्वेति प्रतिगृह्णाति ॥४॥

कन्यायाः पिता । रायस्पोषाय त्वां प्रतिगृह्णामि ॥ ४ ॥

कंसे हिरण्यं समुप्य 'हिरण्यवर्णाः' इति चतसृभिः समवमृशन्ते ॥ ५ ॥

तत्कन्यामूल्यभूतं हिरण्यं प्रतिगृहीतं कांस्यपात्रे निधाय जलयुक्तं 'हिरण्यवर्णाः' इति ऋग्भिश्चतसृभिः समवमृशन्ते उपस्पृशन्ति घोरपापविशुद्धये । बहुवचनं सर्वबंध्वपेक्षं सर्वेषां पापभागित्वप्रदर्शनाय । हिरण्यवर्णा इत्याद्याः संमार्जनावसरे व्याख्याताः ॥ ५ ॥

प्रजाभ्यस्त्वा ददानि । रायस्पोषाय त्वा प्रतिगृह्णामि ॥

इत्येतावन्तावेव मन्त्रौ केचित्प्रयुञ्जते वाक्यपरिसमाप्तेरिषे त्वेत्यादिवत्, अन्यमते तु प्रजाभ्यस्त्वानुप्राणन्तु त्वं च प्रजाः अनुप्राणिहीति प्रथमस्य, सुप्रजार्थं च वीर्यार्थं च त्वामहं प्रतिगृह्णामीति द्वितीयस्य शेषः ॥

इति षोडशी काण्डिका ॥ १६ ॥

अथ

सप्तदशी काण्डिका ।

अथ विवाहमाह

गौदानिकैर्मन्त्रैः कन्यामलङ्कृत्य चतुष्पादे भद्रपीठे प्रागासीनायाश्चतस्रोऽविधवा माता पिता च गुरुः सप्तमस्तां सहस्रच्छिद्रेण पवित्रेण स्नापयित्वाहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोतीन्द्रायेन्द्राण्यै कामाय भगाय ह्रियै श्रियै लक्ष्म्यै पुष्ट्यै विश्वावसवे गन्धर्वराजाय स्वाहेति ॥ १ ॥

पाठक्रमादर्थक्रमस्य बलीयस्त्वात्तदनुसारेण व्याख्या कर्तव्या यथा जातं जनिना जुहोति जातमतिप्राणितीति, तथाग्निहोत्रेण जुहोति यवागूमधिश्रयतीति । तेनायमर्थः—पादचतुष्टययुक्ते भद्रपीठे शोभने आसने प्राङ्मुख्या उपविष्टायाश्चतसृषु दिक्षु चतस्रोऽविधवा भवन्ति, वामभागे माता, दक्षिणभागे पिता,

अग्रे गुरुः संस्कारस्य कर्ता सप्तमः । तेषु यथासन्निवेशं स्थितेषु गोदाने भवा गौदानिकास्तन्मन्त्रैस्तां गुरुः कन्यां सहस्त्रच्छिद्रयुक्तेन पवित्रेण पावनेन वस्त्रविशेषेण सुप्रजस्त्वाय गौदानिकैरेव मन्त्रैः कटककेयूरादिभिर्यथाविभवमलंकृत्याहतेनानुपभुक्तेन वाससा प्रच्छाद्य स्थालीपाकेन गुरुर्जुहोति । अत्र पल्लवचतुष्टयं वस्त्रस्य पवित्रस्य चतस्रोऽविधवा अवष्टभ्नन्ति । पितरौ जलमभिषिञ्चतः । गुरुर्मन्त्रपाठं करोति । स्नापनेऽलंकरणे च गुरुरेव प्रयोजककर्ता, तेन होमेन समानकर्तृकत्वम् । ये त्वलंकरणं विपरीतलक्षणया केशवपनं व्याचक्षते, अमाङ्गलिकास्ते । स्थालीपाकस्येत्युपादीयमानगतत्वादेकत्वं विवक्षितं पशुगतैकत्ववत् । जुहोतीत्येकवचनं एक एव होमो नवस्वप्याहुतिषु,—इति प्रत्यभिज्ञानबलेन सूचयति, तेनैवाहुतीर्निगदति । विश्वावसवे गन्धर्वराजायेत्येकैवाहुतिस्तेन नव भवन्ति । इन्द्रः परमेश्वरः । इन्द्राणी शची । कमनीयः कामः । भजनीयो भगः । ह्रीर्लज्जा । श्रीः श्रयणीया ।

लक्षणीया लक्ष्मीः । पोषः पुष्टिः । स्वाहा सुहुतमस्तु ॥ १ ॥

नाडीं तूणवं मृदङ्गं पणवं सर्वाणि च वादित्राणि गन्धोदकेन समुपलिप्य कन्या प्रवादयते 'स्वनं वद दुन्दुभे सुप्रजस्त्वाय गोमुख। प्रक्रीडयन्तु कन्याः सुमनस्यमानाः सहेन्द्राण्या कृतमंगलाः ॥' इति ॥२॥

नाड्यादीनि सर्वाणि वादित्राणि गन्धोदकेन सुगन्धिनोपलिप्य पूर्वं कन्यैव प्रवादयते। वाद्यमानेषु च गुरुर्मंत्रं पठति। तत्र नाडी वंशः, तूणवो गोमुखो वाद्यविशेषः। मंत्रार्थस्तु हे दुन्दुभे पटह स्वनं वायुं वद वादय शब्दं कारय। किमर्थम्। सुप्रजस्त्वाय सत्प्रजार्थम्। एवं हे गोमुख स्वनं वदेति पूर्ववत्। प्रक्रीडन्तु अन्योन्यं कन्याः सखिभूताः प्रक्रान्तविवाहया कन्यया सहिताः। ता अपि हि कन्या एव भवितुमर्हन्ति समानशीलानां सखित्वस्यान्योन्यान्तरत्वात्। कीदृशः कन्याः। सुमनस्यमानाः सुमनस्का हृष्टा इत्यर्थः। इन्द्राण्या सह

इन्द्राण्यप्यत्रोत्सवे क्रीडितुमवतरत्वित्याशास्यते । सुमंगला मंगलप्रधानगीतघोषिण्यः ॥

अथ गौदानिकमंत्रा व्याख्यायन्ते

या आपो दिव्याः पयसा संबभूवु-
र्या अन्तरिक्ष्या उत पार्थिवासः ।
तासां त्वा सर्वासां रुचाभिषिंचामि वर्चसा ॥
अभि त्वा वर्चसासिचं यज्ञेन पयसा सह । यथासो मित्रवर्धनस्तथा त्वा सविताकरत् ॥ इन्द्राय स्वाहा ॥

पूर्वा विराट् । उत्तरानुष्टुप् । या दिव्या दिवि भवा आपो, याश्च अन्तरिक्ष्या अन्तरिक्षे भवाः, याश्च पार्थिवासः पार्थिव्यः, पयसा सम्बभूवुः क्षीरेण यज्ञोपयोगिना सम्भूताः, तासां सर्वासां रुचा दीप्त्या वर्चसा च सारेण बलेन हे कन्ये त्वामभिषिञ्चामि, त्वामहमभ्यसिचमभिषिञ्चामि यज्ञेन पयसा वर्चसा सह यज्ञादियोग्यां च करोमीत्यर्थः । मित्रस्य मेहनस्य स्वर्गपशुपुत्रादेरसौ यज्ञादेश्च वर्धनो यथा भवति, तथा सविता आदित्य अकरत् तव करोतु हे कन्ये । इन्द्राय सुहुतमस्तु ॥ २ ॥

इति सप्तदशी काण्डिका ॥ १७ ॥

अथ

अष्टादशी काण्डिका ।

यज्ञियस्य वृक्षस्य प्रागायतां शाखां सकृदाच्छिन्नां सूत्रतन्तुना प्रच्छाद्य सावित्रेण कन्यायै प्रयच्छति 'या तेऽलक्ष्मीर्मातृमयी पितृमयी संक्रामणी सहजा वापि काचित्तां तिष्येण सह देवतया निर्भजामि निर्णुदामि सा द्विषन्तं गच्छतु तिष्यबृहस्पतिभ्यां नमो नमः' इति ॥१॥

यज्ञमर्हति यज्ञियः 'यज्ञर्त्विग्भ्यां घखञौ' (५।१।७१) इति घः, यज्ञार्हाणां वृक्षाणां वटादीनामन्यतमस्य सम्बन्धिनीं शाखां सकृदाच्छिन्नां सूत्रतन्तुना प्राच्यां दिश्यायतां प्रसृतां सकृदेकेनैव प्रहारेण छिन्नामेकसारेण सूत्रतन्तुना प्रच्छाद्य कन्यायै प्रयच्छति 'देवस्य त्वा' इत्यादिना 'तां प्रयच्छामि' इति शब्दान्तेन ॥

गुरुर्गृहीतशाखां कन्यामनुमन्त्रयते 'या ते' इत्यादिना ।

हे कन्ये या ते तव काचिदलक्ष्मीरलक्षणं मातृमयी पितृमयी वा मातुः पितुर्वा सकाशात्संक्रान्ता बीजादिदोषात् अन्यतो वा कुतश्चित् संक्रान्ता, तामहमनेन मन्त्रेण निर्भजामि त्वां प्रति निर्भागां करोमि । किमेककः । नेत्याह तिष्येण देवतया सहकृतः, तथा निर्णुदामि निःशेषेण नुदामि अपसारयामि । सा चापसारिता सती द्विषन्तं तव शत्रुं गच्छतु । अलक्षणापसारे चोद्यतस्य मम विघ्नापसारणाय तिष्यबृहस्पतिभ्यां नमस्कारोऽस्तु । अन्ये तु 'तिष्यबृहस्पतिभ्यां नमो नमः' इत्येतं यजुरेकदेशमाच्छिद्य शाखोत्सर्गेऽपि प्रयुञ्जते ॥

तस्या उत्सर्गः स्थावरोदके शुचौ वा देवतायतने ॥ २ ॥

स्थावरोदकं तडागादि । तत्र तस्याः शाखाया उत्सर्गः प्रतिपत्तिकर्म शुचौ देवगृहे । देवगृहं मद्योपहारशोणितादिना अपवित्रमपि सम्भाव्येत, तदर्थं शुचिग्रहणम् ॥

इति अष्टादशी काण्डिका ॥ १८ ॥

अथ

एकोनविंशी काण्डिका ।

अथातो हविष्यकल्पं व्याख्यास्यामः ॥१

हविष्यकल्प इति पारिभाषिकी कर्मविशेषस्य संज्ञा ॥ १ ॥

दशवार्षिकं ब्रह्मचर्यं कुमारीणां द्वादशवार्षिकं वा ॥ २ ॥

वर्षदशकादूर्ध्वं कुमारी न स्थापयितव्या पित्रा, अगत्या वा द्वादश वर्षाणि नातिक्रमणीयानि ॥ २ ॥

ब्रह्मचर्यान्ते गन्धर्वे देवकुले वा द्वावग्नी प्रज्वाल्य द्वौ पशू उपाकरोत्यर्यम्णे दक्षिणं प्राजापत्यमुत्तरम् ॥ ३ ॥

ब्रह्मचर्यावसाने विवाहात्पूर्वं गन्धर्वे निर्निमित्तजलस्राविणि देशे, देवतायतने वा लौकिकौ द्वावग्नी प्रज्वाल्य, द्वौ पशू छागौ कन्यासंस्कारार्थमुपाकुर्यात्पशुकल्पवत्, एकमर्यम्णे दक्षिणभागवर्तिन्यग्नौ, द्वितीयं प्रजाप-

तये उत्तरदिग्भागवर्तिन्यग्नौ । इतिकर्तव्यतां समन्त्रव्याख्यानां पशुकल्पे एव व्याख्यास्यामः ॥

असम्भवे त्वेकपशुः ॥ ४ ॥

प्रचुरार्थाद्यभावे एक एव द्विदैवतः पशुरुपाकर्तव्यः । अवदानानि च हृदयादिभ्यो मेदोऽन्तेभ्यो द्वादशभ्यो द्विर्द्विर्ग्रहीतव्यानि । 'अर्यमप्रजापतिभ्यां स्वाहा' इति चोहः । एक एव च योगः संहतयोरेकदेशत्वधर्मसमवायात् । अत एवच केचित् हृदयादिभ्यो द्विगुणानि अवदानानि नेच्छन्ति ॥ ४ ॥

तण्डुलैर्वा कुर्यात् ॥ ५ ॥

धनदौर्गत्ये सति अहिंसानियमे वा तण्डुलैर्वा कुर्यात् । तण्डुलग्रहणं पिष्टकार्थम् ॥ ५ ॥

यथास्थानं पशुर्यथास्थानमवदानानि तथा हविः ॥ ६ ॥

यत्रैव स्थाने आज्यभागाभ्यां पूर्वो मुख्यपशुः, तत्रैव पिष्टकपशुः, अवदानान्यपि हृदयादिभ्यस्तद्वत् । तेषां च श्रपणहोमौ सर्वदान्यापीतिकर्तव्यता रशनाबन्धयूपनियोजनो-

पायेन विशसनादिः । लुप्तार्थवर्जं हविः पशु-पुरोडाशस्थाने स्थालीपाकस्तदपि यथास्थानं पशुपुरोडाशक्रमे, वपाहोमस्थाने त्वाज्यहोमः ॥

अग्निं सोमं वरुणं मित्रमिन्द्रं बृहस्पतिं स्कन्दं रुद्रं वात्सीपुत्रं भगं भगनक्षत्राणि कालीं षष्ठीं भद्रकालीं पूषणं त्वष्टारं महिषिकां च गन्धाहुतिभिर्यजेत ॥ ७ ॥

सुगन्धचन्दनघनसारादिद्रव्ययुतेनाज्येनाहुतयो गन्धाहुतयः, ताभिरग्न्यादिकाः सप्तदश देवता यजेत । वात्सीपुत्र इति देवतानाम यतः शब्दैकसमधिगम्या देवता । विभक्ति-विपरिणामेन चतुर्थ्यन्तैः स्वाहाकारयुक्तैः शब्दैरुद्दिश्याग्न्यादिदेवता यष्टव्याः 'अग्नये स्वाहा' इत्यादिकैः ॥

इति एकोनविंशी काण्डिका ॥ १९ ॥

अथ

विंशी काण्डिका।

अथातो हविष्यपुण्याहः ॥ १ ॥

इयमपि पारिभाषिकी संज्ञा। हविष्येण व्रीह्यादिना पुण्येऽहनि क्रियमाणता शब्द-प्रवृत्तिनिमित्तम् ॥ १ ॥

उदकान्तं गत्वा यथोपपत्ति वा पयसि स्थालीपाकं श्रपयित्वा सर्वगन्धैः फलोत्तरैः सशिरस्कां स्नापयित्वाहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोतीन्द्राणी वरुणानी गन्धर्वाण्युदकान्यग्निर्जीवपुत्रः प्रजापतिर्महाराजः स्कन्दोऽर्यमा भगः प्रजानक इति ॥ २ ॥

उदकस्य समीपं गत्वा अतिदूरतडागादिके तु ग्रामे, यथोपपत्ति यत्रोपपद्यते स्थाने, तत्र क्षीरे स्थालीपाकं कृत्वा मांगलिकबिल्वाक्षोटादिफलोपेताभिः सर्वौषध्यादिगन्धयोगिनीभिश्चाद्भिरामलकैः कन्यां स्नापयेत्। सशि-

रस्कामित्यनेनान्यदा स्त्रीणामशिरस्कमपि स्नानं भवतीति सूचयति । स्नापनाहतवस्त्राच्छादन-व्यवधानेन च स्थालीपाकेन होमः, स्नानाच्च पूर्वं स्थालीपाक इति विवक्षितः क्रमः । चतुर्थ्या देवतापदपरिणामः स्वाहाकारश्च पूर्ववत् । जीवपुत्रोऽग्निरित्येकैव देवता जीवः प्राणो वायुः पुत्रो रक्षकोऽस्येति बहुव्रीहिरन्यपदार्थप्रधानो योग्यश्च सन्निहितोऽग्निरेवान्यपदार्थः । महाराज इत्यत्र 'न पूजनात्' (५।४।६९) इति प्रतिषेधो नास्ति नियमाश्रयणात् 'पूजायां स्वतिग्रहणं कर्तव्यम्' इति वचनात् अन्यथा हि परमराज इत्यादावपि टचः प्रतिषेधः स्यात् । ये तु महाराजा इत्याकारान्तं पठन्ति, ते स्वति-नियमं नाद्रियन्ते ॥

इति विंशी काण्डिका ॥ २० ॥

अथ

एकविंशी काण्डिका ।

यामेव द्वितीयां रात्रिं कन्यां विवाहयिष्यन्स्यात्तस्यां रात्र्यामतीते निशाकाले नवां स्थालीमाहृत्य पयसि स्थालीपाकं श्रपयित्वा सर्वगन्धैः फलोत्तरैः सशिरस्कां स्नापयित्वाहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोत्यग्नये सोमाय मित्राय वरुणायेन्द्रायोदकाय भगायार्यम्णे पूष्णे त्वष्ट्रे राज्ञे प्रजापतये इति ॥ १ ॥

एका विवाहाहोरात्ररात्रिस्तस्याः पूर्वा या द्वितीया रात्रिर्यस्यां पिता कन्यां विवाहयिष्यन्भवेत् विवाहयिष्यामीत्यनेनाध्यवसायेन युक्तः, अथवा यां भविष्यन्तीं रात्रिमधिकृत्य पिता कन्यां विवाहयिष्यन्स्यात्तस्या या पूर्वा द्वितीया रात्रिस्तामाश्रित्येतिकर्तव्यताप्रवृत्तः सन् तस्यामेव रात्र्यामतीते मध्यमप्रहरद्वये महानिशाख्ये

ब्राह्मणभोजनानन्तरं मंगलगानावसरोऽत्र विवक्षितो, नतु समानकर्तृत्वेऽतीवादरः, तेन ते ब्राह्मणान्भोजयेयुरन्ये वा, सर्वथा ब्राह्मणभोजनानन्तरं मंगलगानं कर्तव्यम् । अपिवा चतुरो नर्तनं कुर्यात् चतुरो नर्तनप्रवीणो नर्तनं कुर्यात् यदि सौशील्यादिगुणयुक्तो भवेत्, विपर्यये तु न ताभिः सह नर्तनं कुर्यादित्यनेनाभिप्रायेणापिवाशब्दः । अनुष्ठानं त्वार्यावर्ते यथा दृश्यते, तथा ब्रूमः—कन्याया मातृप्रभृतयोऽष्टौ चतस्रो वाविधवा यथाविभवं भोजयित्वा ब्राह्मणांश्चाविधवाभिः सह वीणागायिभिश्च गायन्ति नृत्यन्ति सोत्साहम् । तदनुसारेणायमर्थः—चतस्रोऽष्टौ वा स्त्रियः कर्मभूता ब्राह्मणांश्च शाकपिंडीभिरन्येन च भोज्यप्रकारेण भोजयित्वा वीणागायिभिः सहाविधवाभिश्च संगायेयुः । के । अर्थात् कन्यामात्रादयः । अपिवेति समुच्चये । सकलोऽसौ स्त्रीगणश्चतुरः सोत्साहो भूत्वा नर्तनं कुर्यात् ॥

'क्रीडं वः' इत्यनया गायत्र्यानुमन्त्रयते । व्याख्याता चेयं कृच्छ्रेषु ॥ १ ॥

अक्षतसक्तूनामग्निं पुष्टिपतिं प्रजापतिं च यजेत 'अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥' 'प्रजापते नहि त्वत्' इति च ॥ २ ॥

अक्षतानामनवहतानां यवानां सक्तुभिरग्निं पुष्टिपतिं यजेत 'अग्निना रयिम्' इत्येतयर्चा । तथा प्रजापतिं 'प्रजापते' इत्यादिमन्त्रेण । एतावाज्यभागान्ते यागौ ॥ २ ॥

सर्वत्रोद्वाहकर्मस्वनादिष्टदैवतेष्वग्निं पुष्टिपतिं प्रजापतिं च यजेत ॥ ३ ॥

यत्र नाम्ना मन्त्रवर्णैर्वा देवतानिर्दिष्टा विवाहप्रकरणोक्ते कर्मणि, तत्राग्निं पुष्टिपतिं प्रजापतिं च यजेत प्रकृतत्वादक्षतसक्तुभिः । आज्यभागान्ते भविष्यत्सु प्रास्थानिकादिष्वेतद्बोद्धव्यम् । पूर्वोक्तेषु तु क्वचिन्नाम्ना क्वचिन्मन्त्रवर्णेभ्यो देवता सर्वेषु प्रतीता ॥

अग्निना इज्यमानेनाहं रयिं धनमश्नवत् 'अशू व्याप्तौ' व्याप्नुयाम् । व्याप्तस्य च प्राप्तस्य

पोषं पुष्टिं दिने दिने अश्नुयाम् । कीदृशं रयिम् । यशसं यशस्करं, वीरवत्तमं वीरपुरुषयुक्तं, वीरैर्वा पुत्रैरतिशयेन युक्तम् । 'प्रजापते नहि' इति जातकर्मणि व्याख्यास्यते ॥ ३ ॥

इति द्वाविंशी काण्डिका ॥ २२ ॥

अथ

त्रयोविंशी काण्डिका ।

अथ प्रास्थानिक कर्म ॥ १ ॥

प्रस्थाननिमित्तं प्रास्थानिकं कर्मानन्तरं वक्ष्यत इत्यर्थः । प्रस्थानं च वरस्य श्वशुरगृहप्राप्तये विवाहं कर्तुम् ॥ १ ॥

तस्मिन्यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा पश्चाद्भगिनी सिचं गृह्णाति शस्त्रं गृहीत्वा ॥ २ ॥

तस्मिन्प्रास्थानिके कर्मणि यथोक्तमुपसमाधाय, अग्नेः पूर्वं कर्तव्यं उद्धतस्य चावोक्षितस्य च परिसंवाहनपर्युक्षणपरिस्तरणपूर्वकमाज्याहुतिपंचकेन सन्तनीहोमैश्चैकादशभिः संस्करणमुपसमाधानमुच्यते, तत्र जयप्रभृतिभिर्मन्त्रैर्होमं कुर्यात् जयाभिधानान्वा होमान् कुर्यात् 'आकूतं चाकूतिश्च, 'बृहस्पतिपुरोहिताः' 'ऋताषाद्'इत्यादिभिर्मन्त्रैर्जुहुयादित्यर्थः । एते हि मन्त्रास्तत्साध्या वा होमा जयाभ्यातराष्ट्रभृदाज्यभा-

गादिशब्दसाध्यतया प्रसिद्धाः । आज्यभागान्ते चाग्निं पुष्टिपतिं प्रजापतिं च यजेत 'सर्वत्रोद्वाहकर्मस्वनादिष्टदैवतेषु' इत्यादिसूत्रवचनप्रामाण्यादिति केचित् । अन्ये त्वाहुः सूत्रकारप्रामाण्यादेव जयशब्दोऽत्राग्निप्रजापतिदेवतयोर्होमयोः परिभाष्यते आज्यभागान्तं चोपसमाधानमिति । कश्चित्त्वाह विवाहप्रकरणेऽन्तरान्तरा चोदितत्वात् आज्यभागान्तानि कर्माणि कृत्वा पुष्ट्यर्थमग्नये पुष्टिपतये चाक्षतसक्तुभिर्होमः कर्तव्यः सूत्रकारवचनसंप्रत्ययार्थमिति । अन्यथा हि नाम्ना मन्त्रवर्णैर्वा सर्वत्र देवतावगमान्नानादिष्टदैवतं किंचिदुद्वाहकर्मसु कर्म विद्यते इति सूत्रार्थसंप्रत्ययाभावः स्यात् । एवं जयहोमेषु कृतेषु आज्यभागान्ते वरस्य पश्चात्स्थिता सती भगिनी मुख्या उपचरिता वा यथासंभवं खड्गक्षुरिकादीनामन्यतमं शस्त्रविशेषं हस्ते तूष्णीं गृहीत्वा, तूष्णीं सिचमुपरिपरिधानीयस्य वाससो भ्रातुः सम्बन्धिनोऽञ्चलं गृह्णाति परिधानदशां हस्तेन स्पृशतीत्यर्थः । अंचलग्र-

हणमदृष्टसंस्कारार्थं शस्त्रग्रहणमपि । तथाच प्रायस्तदेव शस्त्रमुत्तरकालेऽपि रक्षार्थं शयनादिसन्निधौ स्थाप्यमानमार्यावर्तें लक्ष्यते ॥ २ ॥

पूषा मेति यान्ति यत्रोदकम् ॥३॥

पूषा मा प्रपथे पात्वित्यादिना मंत्रेणोदकसंमुखा व्रजन्तीत्यर्थः ॥ ३ ॥

शन्नो देवीरित्युपस्पृश्य प्राची दिगिति यान्ति यथादिशम् ॥ ४ ॥

उदकान्तं प्राप्य उदकोपस्पर्शनं शिरसि प्रक्षेपणमाचमनं कृत्वा 'प्राची दिगग्निर्देवता' इत्यादिना मन्त्रेण यथादिशं या दिग्येषां गन्तव्या, तदभिधायिना मन्त्रेण यथालिंगमभिधाय वरप्रभृतयो गच्छन्ति । अत्र विवाहस्य कारयिता यो गुरुः, स एव पिता वा वरस्य मंत्रपाठे कर्ता ॥

पूषा मा प्रपथे पातु पूषा मा पशुपाः पातु पूषा माधिपतिः पातु ॥

पुष्णाति वर्धयतीति पूषा पृथिवी अन्तरिक्षं द्यौश्च । तथाच ब्राह्मणम्

'इयं वै पूषा प्रपथेऽन्तरिक्षं पशुपा द्यौरधिपतिः ।'

इति । एतद्धि इयमित्यपरोक्षनिर्देशेन प्रयुक्तस्य पूषशब्दस्य मन्त्रे पृथिव्यर्थतां दर्शयति । अन्तरिक्षं पूषेत्यनेनापि मध्यवर्तिना मन्त्रेण पूषशब्दस्यान्तरिक्षवृत्तित्वं दर्शयति । यथैवहि भूतानि पुष्णातीति पृथ्वी पूषा, तथैव पशूनवकाशदानेन पाति पुष्णातीति कृत्वा अन्तरिक्षं पूषा । एवं द्यौरपि पूषा, सा हि सर्वलोकाधिपतिः यतोऽसौ सर्वलोकान् वृष्ट्यादिद्वारेण पुष्णाति । तेनायं मन्त्रार्थः—पूषा पृथिवी प्रपथे गन्तुं प्रस्तुते पथि मार्गे मां पातु, तथा पशुपा यः पूषा अन्तरिक्षलक्षणः, सोऽपि मां पातु रक्षतु । तथा अधिपतिर्यः पूषा द्युलक्षणः, सोऽपि मां पालयतु पथि गच्छन्तम् । शन्नो देवीरित्यादयो व्याख्याताः ॥ ४ ॥

प्राची दिगग्निर्देवताग्निं स ऋच्छतु यो मैतस्या दिशोऽभिदासति, दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु यो मैतस्या० प्रतीची दिक् सोमो देवता सोमं स ऋच्छतु यो मैतस्या० उदीची दिक् मित्रावरुणौ देवता मित्रावरुणौ स ऋच्छतु यो मैतस्या० ऊर्ध्वा दिग्बृहस्पतिर्देवता बृहस्पतिं स ऋच्छतु यो मैतस्या० इयं दिगदितिर्देवतादितिं स ऋच्छतु यो मैतस्या० ॥

या प्राची दिक्, तस्या अग्निर्देवता । अत एव तस्या दिशः सम्बंधी कश्चित् यो मामभिदासति 'दसु उपक्षये' उपक्षेतुमिच्छत्याभिमुख्येन सोऽग्निमृच्छतु अग्निमभ्यृच्छतु अग्निं लक्षणीकृत्येन्द्रियप्रलयमनुभवतु अग्निस्तस्याक्ष्यादिनिग्रहं करोत्वित्यर्थः । एषैव सर्वत्र योजना तुल्या । पर्वतारोहणावरोहणमूर्ध्वमधश्च गमनमस्तीति तत्परत्वमपि मन्त्रस्य युक्तम् । केचिदाहुः—यदभिमुखं गमनं, तल्लिंगक एव मन्त्रैकदेशः प्रयोक्तव्य इति । तदयुक्तं यत उपद्रवनिवारणायैष मंत्रः, अन्यतमदिगभिमुखगमनप्रवृत्तस्य सर्वदिक्केभ्योऽपि संभाव्यते विप्लवः सर्पाशनिप्रभृतिभ्योऽधस्तनोपरितनेभ्यः । एवं पार्श्वादिप्रभवेभ्योऽपीति । सर्वप्रस्थानेषु चैषेतिकर्तव्यता बोद्धव्या ॥

इति त्रयोविंशी काण्डिका ॥ २३ ॥

अथ

चतुर्विंशी काण्डिका ।

षडर्घ्यार्हा भवन्त्याचार्य ऋत्विग्राजा विवाह्यः प्रियः स्नातक इति ॥ १ ॥

विवाहात्पूर्वमेव पाद्यार्घ्यमधुपर्कैर्विवाह्यः श्वशुरेण पूजनीयः । तुल्यं च पूजाविधानं षण्णामपीति षण्णामुद्देशः। अर्घ्यं पूजामर्हन्तीति अर्घ्यार्हाः षट् भवन्ति । आचार्यः उपनेताध्यापयिता च शिष्यस्य । ऋत्विग्याज्यस्य, तस्यापि प्राक्कर्मणः संमानः । राजा क्षत्रियोऽपि, नत्वभिषेकभावेन स जनपदस्य पूज्यः । विवहनमर्हतीति विवाह्यः 'अर्हे कृत्यतृचश्च' (३।३।१६९) इति कृत्यो ण्यत्प्रत्ययः, स कन्यायाः पितुरर्घ्यार्हः । तथा यो यस्य प्रियो गुणोत्कर्षेण, स तस्य दानाद्यवसरे अर्घ्यार्हः । स्नातकस्तु सद्यःस्नात आचार्यस्य ॥ १ ॥

अथैनमर्हयन्ति ॥ २ ॥

अथशब्दो वक्ष्यमाणप्रकारस्वीकारार्थो निपातानामनेकार्थत्वात् । एनमाचार्यादीनाम-

न्यतमं वक्ष्यमाणप्रकारेणार्हयन्ति पूजयन्ति संमानयन्ति ॥ २ ॥

आदौ च कर्मणः ॥ ३ ॥

विवाहोत्तरकालमर्हणं विहितमिति यथाचोदितमानुपूर्व्यमिति नयेन विवाहादूर्ध्वमेव मधुपर्कादिदानं कर्तव्यमिति केचित्प्राहुरत एव च विवाहोत्तरकाल एवेदमपकृष्य व्याचक्षते । तन्निरासायेदम् । कर्मण आदावेव पूजनं कर्तव्यं पाठक्रमादर्थक्रमस्य बलीयस्त्वात् । संस्कारो ह्ययमुत्साहादिजननमुखेन ऋत्विक्प्रभृतीनां कर्मणि योग्यताविशेषाधानार्थः, संवृत्ते यज्ञविवाहादिके कर्मणि ऋत्विक्प्रभृतीनां क्रियमाणो निष्फल एव स्यात् । स्मार्तोऽपि-चायं संस्कारः, स्मृतिषु च प्रागेव कर्मणोऽभिहितः । किंच विवाह्य इत्यर्हे आवश्यके वा कृत्यः—विवहनमर्हतीति, विवहति वा अवश्यं कन्यामिति विवाह्यः 'अर्हे कृत्यतृचश्च' 'आवश्यकाधमर्ण्ययोर्णिनिः' 'कृत्याश्च'इति स्मृतेः । नच विवाहादूर्ध्वं विवाहार्हो भवति ॥ ३ ॥

अर्घ्यलक्षणमाह

अर्घ्यमुदकं सौषधं दर्भा इति ॥४॥

उदकं, व्रीहियवयोश्चान्यतरत्, दर्भा एतत्त्रयमर्घ्यम् ॥ ४ ॥

मधुपर्कलक्षणपूर्विकां पूजयितुरनुपदेशां पूजाप्रतिपत्तिमाह

कंसे चमसे वा दध्यासिच्य मधु च वर्षीयसा पिधाय विष्टराभ्यां परिगृह्य पाद्यप्रथमैः प्रतिपद्यन्ते ॥ ५ ॥

अत्र पूजयितारः इत्यर्थाल्लभ्यते। कांस्यपात्रे चमसे वा दारुपात्रविशेषे दध्यासिच्यते मधु च। मधु मधुपर्क उच्यते। तच्च मधुपर्कपात्रं बृहता पात्रेण पिधाय स्थगयित्वा विष्टराभ्यां गृहीत्वा पाद्यं प्रथमं येषां पाद्यार्घ्यमधुपर्काणां तैर्यथायोग्यतमूर्ध्वमधो मध्ये च पूजां स्वयमेव प्रतिपद्यन्ते पूजयितारो, नतु तत्राप्युपदेशमपेक्षन्ते ॥ ५ ॥

मयि दोहोऽसि विराजो दोहः पाद्यायै विराजो दोहमशीयेत्याह्रियमाणमनुमन्त्रयते ॥ ६ ॥

कन्याया दातरि विवाह्यस्य निकटीभूते सति ऋत्विक् पाद्यादिकं कन्यादातृसमीपमानाययति । तदानीयमानमनेन मंत्रेण विवाह्योऽनुमंत्रयते। अमंत्रज्ञश्चेद्विवाह्यस्तदा ऋत्विगेवैनं पाठयति। एवं सर्वत्र ज्ञेयम् । अयं मन्त्रार्थः– 'दुह प्रपूरणे' दोहः प्रपूरकः आप्यायकः, विराट् स्वर्गादौ प्रजापतिः, पाद्यादिकमुच्यते हे पाद्यादिक यस्त्वं मयि मन्निमित्तो मदर्थो दोहः प्रपूरकः, स विराजः प्रजापतेः दोहः पूरकः जलादेः प्रजापतिना दिवो नियुक्तत्वादतो मम पाद्यायै प्रतिपत्तये त्वं भव, विराजश्च प्रजापतेः संबन्धिनं दोहं पाद्यादिकमहमशीय व्याप्नुयां पश्येयमित्यर्थः। पाद्यस्य संस्कारार्थं दर्शनम् ॥ ६ ॥

विष्टरोऽसि मातरि सीदेति विष्टरमास्तीर्य तस्मिन्नुपविशति ॥ ७ ॥

विष्टरोऽसीत्यादिना मंत्रेणासनान्तरस्योपरि दर्भविष्टरमास्तीर्य विवाह्य उपविशति तूष्णीम् । हे विष्टर असि त्वं विष्टरः विष्टरो भवसि

अत आच्छादयासनान्तरमाच्छादनार्थमेव मातरि आसनान्तरे सीद तिष्ठ ॥ ७ ॥

विष्टर आसीनायैकैकं त्रिः प्राह ॥८॥

विष्टरे दर्भाच्छादितासनविशेषे आसीनायोपविष्टाय विवाह्याय पाद्यादीनामेकैकं त्रिः प्राह कन्याया दाता—पाद्यं ३ अर्घ्यं ३ मधुपर्कः ३ आचमनीयं ३ इति । आसीनायेति सप्तम्यर्थे चतुर्थी, विष्टर आसीने विवाह्य इत्यर्थः ॥

नैव भोरित्याह न मार्षेति ॥ ९ ॥

अभ्यर्हणीयस्याभिमुख्यापादनाय यत् भो इति पूजासंबोधनं प्राप्तं, नामसंबोधनं च मार्ष ब्रह्मदत्त इत्यादि, तन्निषेधयति ॥ ९ ॥

शन्नो देवीरित्यपोऽभिमंत्र्य पाद्याभिः प्रक्षालयते दक्षिणं पादमवनेनिज इदमहमस्मिन् कुले ब्रह्मवर्चसं ददाम्युत्तरं पादमवनेनिज इदमहं मां मयि तेजो वीर्यमन्नाद्यं प्रजां पशून् ब्रह्मवर्चसं ददामि ॥ १० ॥

शन्नो देवीरित्यादिमंत्रैः पूर्वव्याख्यातैरपो-

ऽभिमंत्र्य विशेषेण पाद्याभिः पादयोर्धावन-समर्थाभिः पादौ प्रक्षालयते अभ्यर्हणीयस्य कन्याया दाता । पादयोः प्रक्षालने यथालिंगं मंत्रौ दक्षिणमित्यादि, उत्तरमित्यादि ।

इदमित्यनेन सद्यःफलं दर्शयति कन्याप्रदानं विवाहान्तरसाधितं च तत्क्षणादेव कर्मानुष्ठानादिसम्बन्धिरूपम् । अस्य विवाह्यस्य ब्रह्मवर्चससम्पन्नं उत्तरं वामपादमवनेनिजे शोधयामि । इदमहं तेजो वीर्यमन्नाद्यं प्रजां पशून् ब्रह्मवर्चसं ददामि विवाह्यादिके अर्घ्यार्हे । मां मयि—यत्तु मां प्राप्तं तेजःप्रभृति, तन्मय्येव चिरमस्त्वित्यर्थः ॥ १० ॥

आपोहिष्ठीयाभिरर्घ्यं परिगृह्य सावित्रेण मधुपर्कं विष्टरोऽस्यन्तरिक्षमधिविश्रयस्वेति विष्टरमवकृष्योरु त्वेत्यपसार्य तच्चक्षुरिति वीक्ष्य पृथिव्यास्त्वेति विष्टरे निधाय मधु वाता ऋतायते इति तिसृभिः प्रदेशिन्या प्रदक्षिणमालोडयति ॥११॥

आपो हि ष्ठेत्यादिभिर्व्याख्यातार्थाभिरर्घ्यं

प्रतिगृह्णाति। देवस्य त्वेत्यादिना 'मधुपर्कं प्रतिगृह्णामि' इत्यध्याहारपूरितेन सवितृदेवताकेन मंत्रेण मधुपर्कं प्रतिगृह्णाति । विष्टरोऽसीतिमंत्रेणोपरितनं विष्टरमपकर्षति । अपकृष्य चाक्षिप्य उरु त्वेति मंत्रेणापसारयति। तच्चक्षुरित्यादिना मधुपर्कं वीक्ष्य, पृथिव्यास्त्वेत्यादिना मंत्रेणाधस्तने विष्टरे मधुपर्कपात्रं निदधाति । मधु वाता ऋतायते इति तिसृभिरंगुष्ठसमीपवर्तिन्या प्रदेशिनीसंज्ञयाङ्गुल्या प्रदक्षिणं कृत्वा दधिमधुनी मिश्रयति । प्रदिशति तर्जयति तच्छीला प्रदेशिनी तर्जनी ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां मधुपर्कं प्रतिगृह्णामि ॥

देवस्य दानद्योतनादिगुणकस्य सवितुरादित्यस्य प्रसवेऽनुज्ञायां वर्तमाना अश्विनोर्देवभिषजोर्बाहुभ्यां पूषणश्च हस्ताभ्यां नतु स्वाभ्यां चर्ममयाभ्यां मधुपर्कं प्रतिगृह्णामि ॥

विष्टरोऽस्यन्तरिक्षमधिविश्रयस्व ॥

असि त्वं विष्टरः मिथ्यैवावारकः, अतोऽस्मादधस्तनविष्टरादपसरान्तरिक्षमाकाशमाश्रय ॥

उरु त्वा वाताय ॥

हे विष्टर त्वामहं पृथिव्यां प्रक्षिपामि, अतः उरु दूरं गच्छ । किमर्थम् । वाताय वाय्वर्थम् ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥

तदेतच्चक्षुः शस्तं यद्देवहितं सत्पुरस्तादुच्चरति, तदेव कृतकरणीयं चक्षुः देवार्थं हविरादिवीक्षणयागदानहोमादिषु साधनभावं भजत इत्यर्थः । कीदृशम् । शुक्रं शुक्लम् । अत आशास्महे वयं यागादिसाधनानि वर्षशतं पश्येम, तदर्थमेव संवत्सरशतं जीवेम ॥

पृथिव्यास्त्वा नाभौ साधयामि ॥

हे मधुपर्क त्वामहं पात्रस्थमपि सन्तं नाभावधस्तने दर्भविष्टरे साधयामि । धान्यानि हवींषि वेदिप्रस्तरे साध्यन्ते । पृथिव्या हि सारमोषधयस्तासामपि दर्भा इति नाभित्वं दर्भविष्टरस्य ॥

मधु वाता ऋतायते मधु क्षरन्ति सिंधवः ।
माध्वीर्नः सन्त्वोषधीः ॥ १ ॥
मधु नक्तमुतोषसा मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥ २ ॥

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ ३ ॥

वाता वायवः मधु सन्तु मधुरसपर्यवसायिनो भवन्तु । कस्मै । ऋतायते ऋतं सत्यं यज्ञं वा य इच्छति, तस्मै । सिंधवो नद्यः मधु क्षरन्ति क्षरन्तु स्रवन्तु । तथा ओषधयः फलपाकान्ताः व्रीह्यादयो मधुमत्योऽस्माकं सन्तु॥ नक्तं रात्रिप्रथमभागः मधुमान्नो भवतु, उत अपिच उषसा रात्रिपश्चिमभागेन सह । मधुमत्पार्थिवं रजः—रजो भूमिलोक उच्यते, धूलिर्वा । द्यौर्द्युलोकः मध्वस्तु मधुरसस्यन्दिनी वृष्ट्यादिद्वारेण भवतु । कीदृशी द्यौः । पिता पालयित्री ॥ वनस्पतिः फली मधुमानस्माकं भवतु । एवमस्माकं सूर्यो मधुमान् भवतु । अनेन कर्मणा गावश्च मधुमत्यो नः सन्तु क्षीरादिदानद्वारेण मधुरसाः ॥ ११ ॥

वसवस्त्वाग्निराजानो भक्षयन्तु पितरस्त्वा यमराजानो भक्षयन्तु रुद्रास्त्वा सोमराजानो भक्षयन्त्वादित्यास्त्वा वरु-

णराजानो भक्षयन्तु विश्वे त्वा देवा बृहस्पतिराजानो भक्षयन्त्विति प्रदक्षिणं प्रतिदिशं प्रतिमन्त्रं पात्रस्यान्तेषु लेपान्निर्मार्ष्टि ॥ १२ ॥

प्राच्या आरभ्य प्रदक्षिणं कृत्वा भक्षयन्त्वन्तैर्मन्त्रैर्मधुपर्कपात्रप्रान्तेषु अंगुलिलेपान् निर्मार्ष्टि। प्रतिदिशं प्रतिमन्त्रमितिवचनात्पंचमेन मन्त्रेणार्थात्पूर्वोक्तदिक्कोणे निर्मार्जनमापतति । मन्त्रार्थस्तु—

हे लेप प्राच्यां दिशि वर्तमाना वसवो देवताविशेषास्त्वां भक्षयन्तु वसवस्त्वया तृप्ता भवन्त्वित्यर्थः । कीदृशा वसवः । अग्निराजानोऽग्निर्येषां राजा । तत्पुरुषे हि समासान्तः स्यात् । एषा योजना सर्वमन्त्रेषु तुल्या ॥ १२ ॥

यन्मधुनो मधव्यस्य परमस्यान्नाद्यस्य परममन्नाद्यं रूपं तेनाहं मधुनो मधव्यस्य परमस्यान्नाद्यस्य परमोऽन्नादो मधव्यो भूयासं त्रय्यै विद्यायै यशोऽसि श्रियै

यशोऽसि यशसे ब्रह्मणो दीप्तिरसि सत्य-श्रीर्यशःश्रीर्मयि श्रीः श्रीः श्रयतामिति मधुपर्कस्य चतुष्प्राश्नात्यङ्गुष्ठद्वितीयाभिः कनिष्ठया प्रथममेवमनुपूर्वं सर्वाभिस्तदव-शिष्टं सुहृदे प्रयच्छति ॥ १३ ॥

यन्मधुन इत्यादिमन्त्रेण मधुपर्कस्य संब-न्धिनो भागानङ्गुष्ठसहितया एकैकया अंगुल्या गृहीत्वा चतुरो वारानश्नाति अंगुष्ठसहितया कनिष्ठया प्रथमं, ततोऽनामिकया, मध्यमया, प्रदेशिन्या प्रत्येकमंगुष्ठसहितयावदानचतुष्टये गृहीते यच्छिष्यते, तत्सुहृदे कनीयसे भ्रातृप्र-भृतये प्रयच्छति । मन्त्रार्थस्तु—

पृथिव्यादीनि भूतानि मध्विवामृतमिव, मधव्यं मधुसारः अमृतसारः सारसार इत्यर्थः, यन्मधुनोऽमृतस्य संबन्धि मधव्यं सारसारः पृथिवीति

'इयं पृथिवी सर्वेषां भूतानां मधु' (२।५।१)

इत्यादिना बृहदारण्यके पृथिव्या भूतसारत्वेन प्रतिपादनात्, तस्य मधव्यस्य पृथिवीलक्षणस्य

सारसारस्य यत्परममुत्कृष्टतमं रूपमन्नादि-
लक्षणं, तेन भुक्तेनाहं मधव्यस्य सर्वामृतसा-
रस्य मधुनोऽमृतस्य नित्यानन्दरूपस्य परमस्य
परमात्मतादात्म्यवृत्तेरन्नाद्यस्यादनीयस्य सुसं-
वेदनभोग्यस्य परमोऽन्नादः परमात्मस्वरूपः
तत्र लयात् भूयासं ब्रह्मभूयमहं गच्छेयमिति
यावत् । किंच हे मधुपर्क असि त्वं त्रय्यै
विद्यायै वेदत्रयस्य यशः प्रकाशः, तथा श्रियै
संपदो यशः प्रकाशोऽसि, अतो यशसे
त्वामश्नामि । किंच ब्रह्मणः परमात्मनो दीप्तिः
प्रकाशस्त्वं, सत्यस्य वेदार्थस्य श्रीः संपदसि
यशसश्च श्रीः, अतो मयि श्रीः श्रीः श्रयतां
भूयोभूयो मयि श्रीस्तिष्ठत्वित्यर्थः ॥ १३ ॥

आचामत्यमृतोपस्तरणमसीति ॥१४॥

अनेन मन्त्रेणाचामति । हे आचमनोदक
अमृतस्य मधुपर्कस्य उपस्तरणमाच्छादक-
मसि ॥ १४ ॥

तस्मा असिपाणिर्गां प्राह ॥ १५ ॥

अर्हयिता दत्तमधुपर्कः सन् खड्गपाणिर्भूत्वा

तस्मै अर्हणीयाय भक्षितमधुपर्काय गामाह 'गां करिष्ये' इत्यनुज्ञां प्रार्थयते अन्यार्थेनेत्यर्थः । गोश्च करणं निपातनम् ॥ १५ ॥

तां शास्ति ॥ १६ ॥

तां गां शास्ति 'ओं कुरुष्व' इत्यनुज्ञां अर्हणीयो ददातीत्यर्थः ॥ १६ ॥

अर्हयितामुं मन्त्रमाह

मम चामुष्य च पाप्मानं जहि हतो मे पाप्मा पाप्मानं मे हत ॥ १७ ॥

हे गौः मम चाग्निशर्मणोऽमुष्य च विष्णुशर्मणः पूज्यस्य यदुद्देशेन वैदिकविधिपरवशीकृतोऽहमिदमकर्तव्यं करोमि तस्य पाप्मानं जहि नाशयेति यावत्, अथवा हतो मे पाप्मा नास्त्यतः कर्मणो मम पापं विधिचोदितत्वादित्यर्थः । हे विशासितारः मम पाप्मानं हत नाशयत ॥ १७ ॥

ओं कुरुतेति ॥ १८ ॥

हे विशासितारः गौः क्रियतामित्यनुजानातीत्यर्थः ॥ १८ ॥

चतुरो नानागोत्रान् ब्राह्मणान्भो-
जयेदेष आद्योपायः ॥ १९ ॥

नानागोत्रान्नानाप्रवरांश्चादौ चतुरो ब्राह्मणान् भोजयेत्पश्चात्सबान्धवमर्हणीयम् । एष आद्यो ब्राह्मणायोपायो गोकरणादिक उपदिष्टस्तेन नात्र विचिकित्सा कर्तव्येत्यर्थः ॥१९॥

यद्युत्सृजेन्माता रुद्राणामिति जपेत्
माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥
सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम । अद्धि तृणमघ्न्ये विश्वदानी पिव शुद्धमुदकमाचरन्ती ॥ २० ॥

निश्चितेऽपि यदिशब्दो दृष्टः 'यदि वेदाः प्रमाणम्' इति यथा । उक्तामितिकर्तव्यतां विधाय गामुत्सृजेत् न हन्यादित्यर्थः, माता रुद्राणामित्यादिच पठेत् । इयं गौ रुद्राणामन्तरिक्षचारिणां देवताविशेषाणां माता परिपोषिका पयःप्रभवाहुतिद्वारकवृष्ट्यादिद्वारेण

वसूनां वासयितॄणामोषधीनां भूमिजानां दुहिता पोषणीया, आदित्यानां स्वसा भगिनी अदितितनया, अतोऽहं प्रनुवोचं चिकितुषे जनाय नुशब्दो निश्चये, निश्चयं कृत्वा प्रवदामि चिकितुषे चैतन्यातिशयवते जनाय । किं वदामि । हे विशसितारः गां मा वधिष्ट । कीदृशीम् । अनागामपापां, अदितिमखण्डितां दैन्यशून्यां वा । कुतः । यस्मादियं शोभनं यवसं घासमत्तीति सूयवसात् । किंच हे गौः भगो धनं पयो यशश्च विद्यते यस्याः सा भगवती पयस्विनी त्वं भूयाः, तथा वयमपि त्वत्प्रसादात् भगवन्तो धनयुक्ताः यशस्विनश्च स्याम । हे अघ्न्येऽनुपहिंसिते तृणमद्धि भुङ्क्ष्व । यतस्त्वं विश्वदानी सर्वस्य दात्री पयोद्वारेण । पिव शुद्धमुदकमा समन्तात् चरन्ती विहरन्ती ॥ २० ॥

ओमुत्सृजत तृणान्यत्त्वित्युक्त्वा तामुत्सृष्टां पशुमंगं वा ॥ २१ ॥ नामांसो मधुपर्कः स्यादिति ह विज्ञायते ॥ २२ ॥ अपिवा घृतौदन एव स्यात् ॥ २३ ॥

अर्हयिताह ओमित्यविचारितसिद्धं कृत्वा हे विशासितारः यूयं गामुत्सृजत । उत्सृष्टा सती स्वाच्छन्द्येन तृणान्यत्तु भक्षयतु इत्युक्त्वा तामुत्सृष्टां दृष्ट्वा पशुं छागं, पश्वङ्गं वा मांसखण्डं प्रतिनिदधीत । नामांसो मांसविहीनो मधुपर्कः स्यादिति ह श्रुतितो विज्ञायते, हशब्द इतिहासे । अपिवा घृतमिश्रित ओदन एव कर्तव्यो मांसद्वेषिणे तादृशा वा ॥ २१, २२, २३ ॥

इति चतुर्विंशी काण्डिका ॥ २४ ॥

अथ

पञ्चविंशी काण्डिका ।

अनृक्षरा ऋजवः सन्तु पंथा येभिः सखायो यन्ति नो वरेयम् । समर्यमा सं भगो नो निनीयात् सं जास्पत्यं सुयममस्तु देवा इत्युदाहारं प्रहिणोति ॥ १ ॥

अनृक्षरा इत्यादिमन्त्रेण गृहीतजलभाण्डमुदकस्य आहर्तारं प्रेषयति कन्यास्नानाद्युपयोगि जलमानेतुं पुरुषं प्रहिणोतीत्यर्थः । ऋगर्थस्तु–ब्रह्मण आर्षं सूर्यस्य वा । त्रिष्टुप् । पंथा इति व्यत्ययेनैकवचनम् । ऋक्षराः कण्टकादयः परुषास्तृणविशेषाः, न विद्यन्ते ऋक्षराः येषु ते अनृक्षराः पंथानः सन्तु, ऋजवश्चाकुटिलाः । येभिर्यैः नोऽस्माकं संबन्धिनः सहाया वरेयं वरणीयं गंगादिकं जलाहरणस्थानं यन्ति गच्छन्ति । सखाय इति व्यत्ययेन बहुवचनम् । किंचार्यमा आदित्यः भगश्च नोऽस्माकं संबन्धिनं सखायं सन्निनीयात् स-

म्यगुदकस्थानं प्रापयेत् । हे देवाः ऋत्विग्प्रभृतयः आदित्यप्रभृतयश्च युष्मत्प्रसादात् जास्पत्यं जायायाः पत्युश्च समागमः सम्यक् सुयममस्तु सुसंयतं स्थिरतरं संपूर्णमस्तु । 'जायायास्पत्यौ वा च्छन्दसि' इति जास्पत्यशब्दश्छन्दसि निपातितः ॥ १ ॥

शमीशाखया सपलाशया पिधायाहरेत् ॥ २ ॥

स प्रहित उदाहारः उदककुम्भं शमीशाखया सपत्रया पिधाय स्थगयित्वा उदकमानयेत् ॥ २ ॥

एतासामेवापामुदकार्थान् कुर्वीत ॥ ३ ॥

एतासामेव आहारितानामपां संबन्धिनो भागानवदायावदायोदकसंपाद्यानर्थान् कन्यास्नानसुवर्णक्षारणाग्निपर्युक्षणादीन् कुर्यान्नान्येन जलेन ॥ ३ ॥

शन्न आपो धन्वन्याः शन्नः सन्त्वनूप्याः । शन्नः समुद्रिया आपः शमु नः सन्तु कूप्या या इमा इत्यकेवलाभि-

रद्भिः स्नातां या अकृन्तन्या अवयन्या अतन्वत याश्च देवीरन्तां अभितोऽततन्थ। तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वास इत्यहतं वासः परिधाप्याशासानेत्यन्तरतो मौञ्जेन दार्भेण वा योक्त्रेण सन्नह्यति॥ ४॥

शन्न आप इत्यादिमन्त्रेणाकेवलाभिः सर्वौषध्यादिगन्धद्रव्ययुक्ताभिः फलविशेषसहिताभिश्चाद्भिः कन्यां स्नापयेत्। ततो 'या अकृन्तन्' इत्यादिना अहतमपूर्वपरिहितमत्यन्ताभिनवं वस्त्रं परिधापयेत्। ततश्च 'आशासाना' इत्यादिना मन्त्रेणान्तरे गुप्तां कृत्वा यथा न दृश्यते तथा वा सन्नहनं कन्यायाः कुर्यात् मौञ्जेन दर्भनिर्मितेन वा योक्त्रेण॥

शन्न आप इत्यनुष्टुप् व्याख्याता। या इमा उदाहारेणाहृताः, ताः शं सुखं नः संत्विति विशेषः॥

या अकृन्तन्निति जगती। हे आयुष्मति कन्ये इदं वासः परिधत्स्व परिधेहि। त्वां च

सर्वास्ता देव्यो जरसा परिव्ययन्तु जरसा वेष्टयन्तु जराजर्जरितां सभर्तृकां सतीं त्वां देवताः सम्पादयन्तु दीर्घमायुस्तव कुर्वन्त्वित्यर्थः । कास्ता देव्यः । या इदं वासोऽकृन्तन् याभिः कर्तनेन संपादितमधिष्ठात्रीभिर्देवताभिः, या अवयन् याभिरुतं संपादितं वासः, या अतन्वत याभिः सूत्रमाततं दैर्घ्येण प्रसारितं, याश्च देवीरन्तां अभितोऽततन्थ, उभयतो मूलपल्लवस्य चान्ताः प्रान्ताः याभिरातानिता इत्यर्थः । ताश्च देवता मन्त्रान्तरे स्वनाम्नैवोपात्ताः 'रेवतीस्त्वा व्यक्ष्णन्' इति ॥

आशासाना सौमनसं प्रजां सौभाग्यं रयिम् । अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कम् ॥

अनुष्टुप् । पृथिव्या आर्षम् । अहं सन्नह्ये वस्त्रं बध्नामि । किमर्थम् । सुकृताय कर्मणे विवाहपूर्वयागदानहोमादिकर्मार्थम् । कमिति कामायेत्यर्थः । यथा 'चक्षुषे कं पूर्वमात्यज्यते' इत्यत्र चक्षुष्कामप्रतीतिः, एवं सुकृताय कमिति सुकृतकामप्रतीतिः । कीदृशी सती सन्नह्ये । सौमनसं प्रसन्नमानसत्वं तथा सौभाग्यं भर्त्रा-

नुकूल्यं रयिं च धनमाशासाना इच्छन्ती, तथा अग्नेरनुव्रता सती आह्वनीयादिपरिचरण-शीला सती सन्नह्ये ॥ ४ ॥

प्रेतो मुञ्चातु मामुतः सुबद्धाममुतस्क-रत्। यथेयमिंद्र मीढ्वः सुपुत्रा सुभगासति॥ पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहतां रथेन। गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथे मा वदासि॥ मा विदन्परिपंथिनो य आसीदन्ति द-म्पती। सुगेभिर्दुर्गमतीतामपद्रान्त्वरातय इत्युदानीयोक्तं वाससः कर्म ॥ ५ ॥

प्रेतो मुञ्चात्वित्यादिभिस्तिसृभिः उदानीय-स्थानादुत्क्षिप्योत्संगे कृत्वा स्थानान्तरे पिता ज्येष्ठो भ्राता वा यथोक्तं वासस उपरिभागाच्छा-दनस्याप्यधस्तनाच्छादनवत् 'या अकृन्तन्'इ-त्यादिना मन्त्रेण कर्म कुर्यादित्यर्थः। सूर्यस्या-र्षम्। प्रथमतृतीयेऽनुष्टुभौ, द्वितीया त्रिष्टुप्। हे कन्ये इतः स्थानात्प्रमुञ्चातु प्रमुञ्चामि त्वां

नयामि भवतीम्। मुञ्चात्विति तिङ्व्यत्ययः पुरुषव्यत्ययश्च, तथाच शाखान्तरे प्रेतो मुञ्चामीति मन्त्रः पठ्यते । पितृकुले भर्तृकुले च सुबद्धां सुश्लिष्टां सतीमेतां कन्याममुतः पितृकुलादमुतश्च भर्तृकुलात् माकरत् कश्चिन्मा कार्षीत् कुलद्वये विगमं तस्या मा कार्षीत् कश्चिदपीत्यर्थः । हे इन्द्र परमेश्वर मीढ्वः सेक्तः इयं कन्या सुपुत्रा सुभगा च यथा भवति, तथा कुरु । हे कन्ये इतः स्थानात् पूषा इन्द्रस्त्वां नयतु । हस्तगृह्य हस्तेन गृहीत्वा । अश्विनौ च त्वां रथेन प्रवहतामभिमतं स्थानं प्रापयताम् । तथा क्रमेण त्वं गृहान्भर्तृवेश्मानि गच्छ । तत्र च गृहपत्नी गृहस्य पालयित्री प्रभुर्यथा असः भवसि, तथास्तु। वशिनी जितकर्मकरजनादिका भव । विदथे च यज्ञे मा वदासि यज्ञप्रतिकूलं भर्तुर्मा वादीः वैदिककर्मकलापानुकूला भवेत्यर्थः ॥

ये परिपंथिनो मार्गे प्रतिकूलाश्चौरप्रभृतयो दम्पती जायावरौ आसीदन्ति दुष्टबुद्ध्या समासीदन्ति, ते त्वां मा विदन् मा द्राक्षुः सु-

गेभिः शोभनगमनैर्दुर्गं मार्गमतीतामतिक्रान्तां सर्वम् । किंच अपद्रान्त्वरातयः शत्रवो दानहीनाश्च धनाभावाश्च दारिद्र्याभिधाना अपद्रान्तु भीताः पराङ्मुखाः सन्तः पलायमानाः कुत्सितां स्खलनरूपां गतिं लभन्तामित्यर्थः ॥

आचारिकाणि ॥ ६ ॥

अस्मिन्नवसरे आचारिकाणि आचारादागतानि देशजातिकुलधर्मतया प्रसिद्धानि कर्माणि कारयेदित्यर्थः । तद्यथा—आगमनप्रयोजनकथनं कन्याया नामग्रहणं कुलदेवतापूजनं सुमनोलताभिस्ताडनमित्यादीनि ॥ ६ ॥

तूष्णीं निर्मन्थ्यं भ्राष्ट्रात्सान्तपनं यत्र दीप्यमानं वा बहिरग्निमुपसमाधाय परिसमूह्य पर्युक्ष्य परिषिच्य परिस्तीर्याज्यं विलीनोत्पूतं कृत्वाघारादाज्यभागान्तं हुत्वापरेणाग्निमनो रथं वावस्थाप्य योगे योग इति युनक्ति दक्षिणमितरमुत्तरमितराम् ॥ ७ ॥

'एष औपसदोऽग्निर्वैवाहनो वा' 'तस्मिन् पाकयज्ञाः' इति वक्ष्यति (४७ का०)। वैवाहनस्य विकल्प्यमानाश्चतस्रः प्रकृतयोऽत्रोच्यन्ते। सद्यः अरणिभ्यां निर्मथितो यस्तत्र निर्मन्थ्यशब्दो रूढः। तत्र निर्मन्थनसामान्यान्निर्मन्थनान्तरवन्मन्त्रे प्राप्ते तूष्णीमित्युक्तम्। एष एकः। भ्राष्ट्राद्द्वितीयः। सान्तपनस्तृतीयः। यो बलेनाग्निना सन्तप्तादपसारिताग्निकाष्ठभागात् कार्पासगोमयचूर्णादिसंसर्गं कृत्वोत्पाद्यते पाषाणं कंसमणिं वा तापयित्वा सूर्यसंमुखं सूर्यकान्तमणिं वा स्थापयित्वा, सोऽभिमतः। यत्र दीप्यमानश्चतुर्थः। अत्राविशेषश्रुतावपि त्रेतावसथश्मशानपरिगृहीतसूतकपतिताद्यग्निवर्जमिति ज्ञेयम्। उपसमाधायेति प्रत्येकं सम्बन्धनीयम्, गार्हपत्यवदुद्धतावोक्षिते जानुदघ्ने कुण्डे स्थापयित्वेत्यर्थः। गृहाद्बहिरेवेति नियमः। परिसमूहनं सजलेन करेण चतुर्दिक्संस्पर्शनम्। पर्युक्षणमासेचनम्। एवं चतुर्दिक्कमेव दर्भैः परिस्तरणं प्रथितम्। प्राग्दक्षिणोदक्ववस्तरणमित्यन्ये मन्यन्ते त्रिभिस्तरैः स्तृणा-

तीति वैश्रवणीयदर्शनात् । आज्यस्य विलयनं विगलनम्, उत्पवनं पवित्रेण पावनम् । आघाराद्याज्यभागान्तान् होमान् हुत्वा अग्नेः पश्चिमभागे स्थितयोः सतोः कन्यावरयोर्यथासंख्यं वामदक्षिणभागेनाग्नेरपरभागे अनः शकटं, रथं स्यन्दनं वा सयुगमवस्थाप्य योगे योग इत्यादिकयर्चा कन्यावरौ यूपे युनक्ति दक्षिणभागे वरमुत्तरभागे कन्यां योक्त्रेण संयोजयतीत्यर्थः ॥

योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये ॥

गायत्री । मैत्री । कश्यपस्यार्षम् । वयमिन्द्रं हवामहे आह्वयामः । कुत्र । योगे योगे, दम्पत्योः सहभावेनावस्थितयोः परिकर्मसम्बन्धे । तथा वाजे वाजे, वाजशब्दोऽन्नबलसंगमवचनः, इह त्वन्नवचनो गृह्यते गार्हस्थ्यस्यान्नमूलत्वात्, वाजशब्देन चान्नसाधनं वक्ष्यते, हविषि हविषि चाज्येष्टभागदानायेति प्रोत्साहना । किमर्थमाह्वयामः । ऊतये अवनाय । कीदृशा वयम् । सखायः समानख्यानाः । कीदृशमिन्द्रम् । तवस्तरं तवःशब्दो बलवचनः महत्त्ववचनो वा, बलवत्तरं महत्तरं वा ॥ ७ ॥

तूष्णीं विमुच्य खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्रस्त्रिष्पूत्वा करोतु सूर्यवर्चसमिति हिरण्यं निष्टर्क्यं बद्ध्वाध्यधि मूर्धनि दक्षिणास्मिन्युगतर्मण्यद्भिरवक्षारयते शं ते हिरण्यं शमु सन्त्वापः शं ते मेथी भवतु शं युगस्य तर्म । शं त आपः शतपवित्रा भवन्त्वेना पत्या तन्वा संसृजस्वेति ॥ ८ ॥

प्रकृतयोक्त्रयुक्ताविवात्रापि प्राप्तं मंत्रं निषेधयति तूष्णीमिति । विमुच्य कशायोजितं योक्त्रं मोचयित्वा । खे रथस्येत्यादिकयर्चा हिरण्यं दर्भपवित्रेण बद्ध्वा युगस्य दक्षिणभागगते रन्ध्रे निदधाति । कथं बद्ध्वा । निष्टर्क्यं कृत्वा यथा सुखमोचनं भवति तथेत्यर्थः, निष्टर्क्यं सुखविमोचनम् । तत्सुवर्णं बद्ध्वानन्तरं दक्षिणभागे वरस्थाने कन्यामानीय ससुवर्णां दक्षिणास्मिन्युगस्य तर्मणि च्छिद्रे पूर्वोक्ताभिरद्भिरध्यधि क्षारयति, 'उपर्यध्यधसः सामीप्ये' (८।१।७) इति वीप्सायां सामीप्ये

अध्यधीति द्विर्वचनम्, युगच्छिद्रस्याधः समीपे कन्यां स्थापयित्वा मूर्धनि सुवर्णोदकं क्षारयतीत्यर्थः। अस्मिन्नवसरे कन्यावरयोः स्थानपरिवृत्तिः संपन्ना, पुनः स्थान एव स्थितिर्भविष्यति। यद्वक्ष्यति 'दक्षिणतः पुमान्भवति' (२५ का०) इति॥

खे रथस्येत्यैन्द्री अनुष्टुप्। ब्रह्मण आर्षम्। अन्यत्राप्युच्यमाने ब्रह्मण एवार्षम्

'अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः।'

इति सर्ववेदानां सामान्येन तद्दृष्टत्वस्मृतेः। हे शतक्रतो अनन्तक्रिय इन्द्रस्तेजस्विनां मध्ये परमेश्वर आदित्य एतां कन्यां सूर्यवर्चसमादित्यकल्पकान्तिं करोतु। किं कृत्वा। त्रिष्पूत्वा त्रीन् वारान् पवित्रयित्वा। कीदृशीम्। अपालां विवाहात्पूर्वं स्वच्छन्दचारिणीमत एव पावनयोग्याम्। क्व। रथस्य खे, तथा अनसः शकटस्य युगस्य च खे च्छिद्रे। अथवा अपालामिवेन्द्र इमां कन्यां पूतां कृत्वा सूर्यवर्चसं करोत्विति इवार्थगर्भं व्याख्यानम्। यथा किला-

पालेति नाम्ना अत्रेर्दुहिता कुष्ठव्याधिग्रस्ता शून्याश्रमे स्नानाद्यर्थापसृतमुनिके दृष्टा यूपादिच्छिद्रेषु सुवर्णोदकेनाभिषिच्येन्द्रेण व्यपगतरोगा सूर्यकान्तिः संपादिता, तद्वदेतामप्यपगतपापां कृत्वा सूर्यवर्चसं करोतु इन्द्रः । तथा चेतिहासः

'अपालात्रिसुता त्वासीत्कन्या त्वग्दोषिणी पुरा ।
तामिन्द्रश्चकमे दृष्ट्वा विजने पितुराश्रमे ॥
रथच्छिद्रे तु तामिन्द्रो युगस्य शकटस्य च ।
प्रक्षिप्य निचकर्ष त्रिस्ततः सा सुत्वचाभवत् ॥'

इति । शं ते हिरण्यमिति जगती । हे कन्ये ते तव हिरण्यं शं सुखमस्तु । शमु सन्त्वापः, उ इति निपातः समुच्चये, आपश्च ते सुखं सन्तु । मेथी रथावस्तम्भनं वरूथं शं सुखं तवास्तु । युगस्य तर्म च्छिद्रं तव सुखकरमस्तु । आपस्ते शतपवित्रा बहुपावन्यः सुखकारिण्यो भवन्तु । एना पत्या तन्वा संसृजस्व, एना अनेन भर्त्रा सह तन्वा शरीरेण संसृजस्व संबध्यस्व । क्वचित्तु शाखायां पठ्यते तन्वं संसृजस्वेति, भर्त्रा सह संयोजयेति तत्रार्थः ॥ ८ ॥

दक्षिणतः पुमान् भवति ॥ ९ ॥

कन्याया अभिषेकसंस्कारे कृते सति पुनरग्नेरपरभागे प्राङ्मुखः पुरुषो भवति दक्षिणेन, अर्थात् कन्या उत्तरेण भवतीति लभ्यते । अत्र दक्षिणभागमानीय संस्क्रियमाणत्वात् कन्या प्रधानमित्येके, स्वतन्त्रत्वात् सदा दक्षिणभागे चावस्थानात् पुरुषः प्रधानं विवाह इत्यन्ये ॥९॥

अथ जुहोत्यग्नये जनिविदे स्वाहा सोमाय जनिविदे स्वाहा गन्धर्वाय जनिविदे स्वाहेति ॥ १० ॥

अथशब्दो मंगलार्थ इति माठरः, अन्तरालेऽक्षतसक्तुहोमद्योतनायाथशब्द इत्यादित्यदर्शनः। अवश्यं हि उक्तयुक्त्या ते होमान्तरालादावपि होतव्या इत्यत्रैवावसरे न क्षतिरिति। होमान् क्रमेणाह अग्नये इत्यादि ।

'पूर्वं देवैः स्त्रियो भुक्ताः सोमगन्धर्ववह्निभिः ।'

इति श्रूयते । तेन निष्क्रयाय तेषां होमः । यद्यपि च सोमः प्रथमस्तथाप्यग्रतो होमोऽत्राग्नये 'येन कर्मणेच्छेदग्निमुखं कुर्यात्'इत्यभि-

प्रायेण । अग्नये स्वाहा सुहुतमस्तु । कीदृशाय । जनिविदे जनी वधूः जनीं वेत्ति विन्दते वा जनिवित् तस्मै । एवमन्यत् ॥ १० ॥

आयुषः प्राणं संतन्विति संतनीर्जुहोति ॥ ११ ॥

एकादश संतन्य एवमाद्याः ॥ ११ ॥

जयाभ्यातानान् राष्ट्रभृतश्च ॥ १२ ॥

जुहोति इत्यनुषङ्गः । जयाश्चाभ्यातानाश्च, तान् राष्ट्रभृतश्च जुहोतीत्यर्थः ॥ १२ ॥

तानि यथोक्तम् ॥ १३ ॥

तानि त्रीणि जयादीनि कर्माण्युक्तानतिक्रमेण कर्तव्यानि । द्वादशगृहीतेन जयाञ्जुहुयादिति लौगाक्षिः । यथाधीतं मन्त्रमनुद्रुत्य ऋगन्तेन स्वाहाकारेण द्वादशप्रक्षेपा अपीति केचित् । अन्ये तु द्वादशावदानगृहीताज्यस्य सर्वमंत्रानुद्रवणे सर्वान्ते स्वाहाकारेणैक एव प्रक्षेप इत्यनुतिष्ठन्ति, प्रतिमंत्रं तु द्वादशावदानान्युद्धरन्ति । अभ्यातानानां होमे तु चतुर्गृहीतं जुहोति । तत्र 'बृहस्पतिपुरोहिताः' 'देवहू-

त्याम्'इति आघातग्रहणम् । राष्ट्रभृतस्तु द्वाद-शगृहीतेन त्रयोदश होमाः । ऋताषाडिति द्वादशभिर्वेडन्तैर्हुत्वा 'स नो भुवनस्य पते' इति रथमुखेऽध्यध्यग्निं ध्रियमाणस्येति यथोक्तता । पाकयज्ञेषु ह्येतत्रयं यथावद्व्यवस्थितं, तत्रैव समन्त्रकं व्याख्यास्यामः ॥ १३ ॥

आधिपत्यानि जुहोति ॥ १४ ॥

अधिपतिशब्दोपलक्षितालिंगादाधिपत्यान्यु-च्यन्ते । तानि सानुषङ्गान्येकविंशतिर्यजूंषि ।

अग्निर्भूतानामधिपतिः स मावतु तस्मै स्वाहा । यमः पृथिव्या अधि० वायुरन्तरिक्षस्याधि० सूर्यो दिवोऽधि० चंद्रमा नक्षत्राणामधि० विष्णुर्दिशामधि० पूषा पथीनामधि० त्वष्टा रूपाणामधि० सविता प्रसवानामधि० इन्द्रो ज्येष्ठानामधि० मित्रः सत्यानामधि० वरुणो धर्मणामधि० रुद्रः पशूनामधि० बृहस्पतिर्ब्रह्मणामधि० ब्राह्मणो वाचामधि० सोम ओषधीनामधि० समुद्रः स्रवत्यानामधि० अन्नं साम्राज्यानामधिपतिस्तन्मावतु तस्मै स्वाहा । गायत्री च्छन्दसामधिपत्नी सा मावतु तस्मै स्वाहा । मरुतो गणानामधिपतयस्ते मावन्तु तेभ्यः स्वाहा । पितरः पितामहाः परेऽवरेभ्यस्ते नः पान्तु ते नोऽवन्त्वस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्मिन्क्षेत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यां देवहूत्यां स्वाहा ॥

भूतानां स्थावरजंगमानामग्निरधिपतिर्नि-यन्ता स मा अवतु आगच्छतु हविर्ग्रहीतुं मां रक्षतु च, तस्मै स्वाहा सुहुतमस्तु च। यमः पृथिव्या नियन्ता स मावतु स्वाहेत्यनुषंगः। एवमन्यत्र। विष्णुर्दिशामधिपतिर्व्यापकत्वात्। पूषा पथीनां पथिकानाम्। त्वष्टा रूपाणां, त्वष्टा प्रजापतिर्विश्वकर्मा, स रूपाणां सर्वाकृतीनामधिपतिः। सविता प्रसवानां, प्रसूयन्त इति प्रसवाः अंकुरादयः। इन्द्रो ज्येष्ठानां प्राशस्त्यानाम्। मित्रः सत्यानामिति तथाच श्रूयते 'मित्राय सत्यपतये' इति। वरुणो धर्मणां धर्माणो धर्तारस्तेषां वरुणोऽधिपतिः 'वरुणोऽसि धृतव्रतो वरुणस्त्वोत्तुभ्नातु' इति दर्शनात्, धर्तॄणां पृथिव्यादीनां सर्वेषां वरुणो धर्तेति वैशेषिकादिभिरप्युक्तम्। रुद्रः पशूनां, स ह्यऽभ्यर्थयते 'अहमेव पशूनामीशे' इति। बृहस्पतिर्ब्रह्मणां वेदानामधिपतिः। ब्राह्मणो वाचां, स एव हि दैवीनां मानुषीणां च वाचामुपदेष्टा 'तस्माद्ब्राह्मण उभे वाचौ वदति दैवीं च मानुषीं च' इति श्रुतेः। सोमश्चन्द्रो ग्राम्यारण्या-

नामोषधीनां फलपाकान्तानामधिपतिः । स्रवत्यानां नदीनां समुद्रोऽन्तरिक्षाख्योऽधिपतिः, अपामाश्रयणीयं ह्यन्तरिक्षं सूक्ष्माणामन्यथावश्यायः कथम् । साम्राज्यमैश्वर्यं, तेषामन्नं, पृथिव्याः सौरो रसोऽधिपतिः । मरुतो गणानां, सर्वेषामेवाग्न्यादिगणानां मरुतोऽधिपतयो व्याख्याताः । अवरेभ्यः निकटेभ्यः पितृपितामहादिभ्यो ये परे सर्गसमुद्भवा हिरण्यगर्भमनुप्रभृतयः पितरः, ते नः पान्तु पालयन्तु चेति प्रकृतमपेक्षणीयमवतेः प्रकृतस्य गत्यर्थत्वात् । क्षावन्तु । अस्मिन् ब्रह्मणि, एतेषु ब्राह्मणेषु ऋत्विक्षु दक्षिणया स्वीकृतेषु, अस्मिन् विवाहाख्ये कर्मणि, अस्मिन् क्षेत्रे पालने, अस्यां चाशिषि ऋत्विग्भिराधीयमानायां दम्पत्योः फलभूतायां, यद्यपि ऋत्विग्विशेषा मामवन्त्वित्युच्चारयन्ति, तथापि कर्मणो दक्षिणया तदीयस्य परिक्रीतत्वाद्यजमानस्यैव फलम्, पुरोधायां पौरोहित्यकर्मणि, देवहूत्यां देवानां हूतिराह्वानं हविर्दानाय यत्र, सा देवहूतिर्विवाहभूमिरिह ॥ १४ ॥

आकूत्या इति त्रिभिस्त्वेत्यन्तैर्हिरण्यगर्भ इत्यष्टाभिः प्रत्यृचं भूः स्वाहेति महाव्याहृतिभिश्चतसृभिरग्न आयूंषीत्याग्निपावमानीभिस्तिसृभिर्हुत्वा हुत्वा मूर्ध्नि संपातानवनयेत् ॥ १५ ॥

'आकूत्यै त्वा' इत्यादिभिर्मन्त्रैराज्यं हुत्वा हुत्वा कन्याया मूर्ध्नि संपातान् हुताज्यशेषबिंदून् मूर्ध्न्यवनयेत् स्रावयेत् । त्वेत्यन्तैरिति स्वाहाकारान्ततां निवर्तयतीति केचित् । अन्ये त्वाहुः त्वान्तानामेव पाठात् त्वान्तत्वाव्यभिचारात् अन्यान्तत्वमप्यस्तीति स्वाहाकारान्तताद्योतनाय त्वान्तग्रहणमिति । हिरण्यगर्भ इत्यादिना सकलेनानुवाकेनैक एव होमो मा विज्ञायीति प्रत्यृचग्रहणम् । आग्निपावमानीभिरित्यग्निलिङ्गाभिः पवमानलिङ्गाभिश्च ॥

आकूत्यै त्वा कामाय त्वा समृद्ध्यै त्वा ॥

आकवनमाकूतिरभिप्रायः, अभिप्रेतासिद्ध्ये हे आज्य त्वां जुहोमीत्यर्थः । व्याख्यानांगं जुहोतिरध्याह्रियते, नतु मंत्रैकदेशः । अ-

ध्याह्रियमाणस्य मन्त्रैकदेशत्वे ऋचामपि साकांक्षत्वादध्याहारसहितानां यतिर्विनश्येत्, ततश्च गायत्र्यनुवाक्या त्रिष्टुबिति नावकल्पते । तस्मादर्थव्याख्यानाङ्गमेव अध्याहारो, न मंत्रैकदेशः,—इत्याहुः । कामाय काम्यमानसिद्धये त्वां जुहोमि । समृद्धिः संपत्, तदर्थं त्वां जुहोमि ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥

अष्टानामपि पुरुषस्य नारायणस्यार्षम् । हिरण्यगर्भः प्रजापतिः पुरुषो नारायणः प्राणो जगत्सूत्रं कः सम्राडिति पर्यायाः । हिरण्यगर्भः अग्रे सर्गादौ समवर्तत प्रादुर्बभूव । स च जातः प्रादुर्भूतः सन् एक एव भूतस्य समस्तस्य पृथिव्यादिभूतजातस्य अभिव्यंग्यस्य वा महदादेः पतिः पालकः प्रभुरासीत् व्यत्ययेनातीतविभक्तिः, प्रादुर्भवति जगदादौ हिरण्यगर्भः पतिश्च भवति सर्वस्येत्यर्थः । स हीमां प्रत्यक्षां पृथिवीं क्षितिं दाधार धारयते,

उत तथा द्यां स्वर्गं पृथिवीं च । पृथिवीशब्दः सामीप्यादन्तरिक्षे वर्तते । हिरण्यगर्भ एव हि सर्वं प्रोतं सूत्रे मणिगणा इव । तस्मै कस्मै प्रजापतये, देवाय दानादिगुणयुक्ताय, हविषा आज्येन विधेम परिचराम, तस्मै हविर्दद्म इति यावत् ॥

यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव ।
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै० ॥ २ ॥

यः प्राणापानादिमतो निमेषादिमतश्च देवमानुषादेः राजा प्रभुः, पतिः पालयिता । प्राणेन अपानाद्युपलक्ष्यते, निमेषेण स्पर्शनादिकं बुद्धीन्द्रियकर्मेन्द्रियक्रियायोगित्वम् । प्राणनादिकं कुर्वतः निमिषतो जिघ्रतो विहरत इत्यादि ज्ञेयम् । विश्वस्य सर्वस्य जगतो जंगमस्य बभूव भवति । सहि ईशे ईष्टे प्रभवति द्विपदो देवमनुष्यादेः, चतुष्पदो गवादेः । तस्मै कस्मै देवायेति पूर्ववत् ॥

य ओजोदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै० ॥ ३ ॥

ओज उत्साहः, बलं सामर्थ्यं, तद्ददातीत्यो-

जोदा बलदाः । यस्य संबन्धिनं प्रशिषमनुशासनमनुज्ञां विश्वे सर्वे जना देवाश्चोपासते सेवन्तेऽनुवर्तन्ते । यस्य संबन्धिनी छाया आश्रय आराधनम्, अमृतं मोक्षफलम् । यस्य च विपर्यय अर्थादनाराधनं, मृत्युः संसारकारी । तस्मै कस्मा इति समानम् ॥

येन द्यौरुग्रा पृथिवी दृढा च येन स्वः स्तभितं येन नाकम् ।
यो अन्तरिक्षं विममे वरीयः कस्मै० ॥ ४ ॥

येन प्रजापतिना द्यौरन्तरिक्षमुग्रा उन्नता, दृढा अवष्टब्धा, तथा पृथिवी व्याप्ता, तथा स्वः स्तभितं व्याप्तमवष्टब्धं प्रोतं, स्वर्गोऽप्यवष्टब्ध इत्यर्थः । येन नाकमादित्यमण्डलमवष्टब्धम् । स्वरित्यस्य विशेषणं वा नाकमिति, कं सुखं, न कमकं दुःखं न विद्यते यत्र तन्नाकम् । यश्चान्तरिक्षं विममे निर्ममे । कीदृशम् । वरीय उरुतरम् । तुल्यमन्यत् ॥

य इमे द्यावापृथिवी तस्तभाने अधारयद्रोधसी रेजमाने ।
यस्मिन्नधि विततः सूर एति कस्मै० ॥ ५ ॥

इमे प्रत्यक्षदृश्ये द्यावापृथिव्यौ रेजमाने

वेपमाने सत्यौ योऽधारयत् धारयते । की-
दृश्यौ । रोधसी रुन्धाने । कथं कृत्वा । तस्त-
भाने निःशल्ये कृत्वा । यस्मिन्नधि यस्यो-
परि सूर आदित्य एति गच्छति । कीदृशः ।
विततो विस्तीर्णः ॥

यस्येमे विश्वे गिरयो महित्वा समुद्रं यस्य रसया सहाहुः ।
दिशो यस्य प्रदिशः पंच देवीः कस्मै० ॥ ६ ॥

यस्य हिरण्यगर्भस्य इमे प्रसिद्धा मेर्वा-
दयो गिरयः महित्वा महिमानं माहात्म्य-
माहुः, तथा पंच दिशः प्रागाद्या ऊर्ध्वया सह,
विदिशश्च नाग्या सह पंच यस्य माहात्म्य-
माहुः । देवीर्दानादिधर्मिकाः इति दिशां वि-
शेषणम् ॥

आपो ह यन्महतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां निरवर्ततासुरेकः कस्मै० ॥ ७ ॥

यस्मिन् काले सर्गादौ महत्य आपः प्रथमं
सृष्टाः सत्यो विश्वं सर्वमायन् व्याप्तवत्यः ।
किं कुर्वाणाः । गर्भं दधानास्तमेव हिरण्यगर्भं
गर्भरूपेण दधानाः धारयन्त्यः । यथोक्तं

'अप एव ससर्जादौ तासु वीर्यमवासृजत् ।' (मनुस्मृ०)
इति । कीदृश्यः । जनयन्तीरग्निम् । अग्निं तेजःपुंजरूपं, अन्यच्च अण्डादिकं जनयन्त्यः । अथवा अग्निमिति गर्भविशेषणं, तेजःपुञ्जरूपमित्यर्थः । ततो गर्भाधानानन्तरं देवानां द्योतमानानामिन्द्रियाणां प्राणिनां वा गत्यादियोगिनां सुरमानुषप्रभृतीनां य एक एवासुः प्राणः सर्वसूत्ररूपो निरवर्तत निर्वृत्तः, तस्मै हविषा विधेम ॥

आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥८॥

स व्यानरूपो हिरण्यगर्भः प्रजापतिर्नोऽस्माकं प्रजामाजनयतु, धाता विधाता च भूत्वा गर्भं दधातु नः सुमनस्यमानः प्रसन्नचित्तः। संवत्सररूपः सन् ऋतुभिश्चाक्लृपानो विवर्तमानः आर्तवैः पदार्थैर्विपरिणममानः। चाक्लृपान इति लिटः कानच् । उपलक्षणमेतत्प्रथमविवर्तस्य। जलस्य हिरण्यगर्भो विवर्तः, तस्योङ्कारस्तस्य

वेदा इत्यादिरूपेण स एव विवर्तते । स हिरण्यगर्भो यतः पुष्टिपतिस्ततोऽस्माकं पुष्टि-मादधातु ॥ महाव्याहृतयो व्याख्याताः ॥

अग्न आयूंषि पवस आसुवोर्जमिषश्च नः ।
आरे बाधस्व दुच्छुनाम् ॥ १ ॥

तिस्रो गायत्र्यः । कूष्माण्डानामार्षम् । हे अग्ने त्वमायूंषि पवसे पुनासि रोगजरादिम-लैर्विहीनानि संपादयसि । नोऽस्मभ्यमूर्जं बलं इषं चान्नमासुव जनय देहि । दुरः शुनि परतस्ता-न्ता देशे प्रातिशाख्ये दुच्छुनामित्यन्वाख्यानात् शुनामिव दुष्टानां दुच्छुनां हिंस्राणां बाधस्व आरे दूरत एव । दुच्छुनामिति हिंसार्थाना-मिति कर्मणि षष्ठी ॥ १ ॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तमीमहे महागयम् ॥ २ ॥

अग्निर्ऋषिः दुष्टान् पवमानः पुनानः, पंच-जना मनुष्याश्चत्वारो वर्णाः अनुलोमजवर्गः पंचमस्तेभ्यो हितः, पुरोहितः 'अग्निर्वै देवानां पुरोहितः' पुरोऽग्रे परलोके वा हितः कर्मसंपा-दनद्वारेण, तं वयं ईमहे याचामहे महागयं महागृहम् ॥ २ ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्।
दधद्रयिं मयि पोषम् ॥ ३ ॥

हे अग्ने अस्मे अस्मान् पवस्व पुनीहि। अप इति कर्मनाम, शोभनान्यपांसि यस्य स स्वपाः सुकर्मा अग्निः। किं कुर्वन् पुनीहि। वर्चस्तेजः शोभनं च वीर्यं, तथा रयिं धनं पोषं च पुष्टिं दधद्विदधानः ददद्वास्मभ्यम् ॥३॥१५॥

या ते पतिघ्नी तनूरपतिघ्नीं ते तां करोमि स्वाहा या तेऽपुत्रिया तनूः पुत्रियां ते तां करोमि स्वाहा या तेऽपशव्या तनूः पशव्यां ते तां करोमि स्वाहेति त्रिभिः ॥ १६ ॥

या त इत्यादिभिश्च त्रिभिर्मंत्रैर्हुत्वा हुत्वा कन्याया मूर्ध्नि संपातानवनयेदित्यनुषंगेण समाप्तिः। मंत्रत्रयार्थस्तु—हे कन्ये या ते तव पतिघ्नी तनूस्तामपतिघ्नीं करोमि अनेन संपातावनयेन, तथा तव या अपुत्रिया पुत्रेभ्योऽहिता तनूस्तां पुत्रेभ्यो हितां पुत्रियां करोमि, याच अपशव्या पशुभ्योऽहिता तनूस्तां पशव्यां पशुभ्यो

हितां करोमि । अत्रावसरे पूर्वनिदर्शितविधानेनाक्षतसक्तून् जुहुयात् ॥ १६ ॥

पाणिग्रहणमाह

उदगग्नेर्दर्भेषु प्राचीमवस्थाप्य शुचिः पुरस्तात्प्रत्यङ्ङुपयन्ता देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामीति हस्तं गृह्णाति दक्षिणमुत्तानं सांगुष्ठं नीचारिक्तमरिक्तेनैवं सव्यं सव्येन ॥ १७ ॥

अग्नेरुदीच्यां दिशि दर्भास्तीर्णे देशे प्राङ्मुखीं कन्यामवस्थाप्य गुरुर्देवस्य त इत्यादिना मंत्रेण कन्यायाः संबन्धिनं हस्तं ग्राहयतीत्यध्याहर्तव्यं समानकर्तृकत्वार्थम् । केन प्रयुज्य ग्राहयतीत्यपेक्षायामर्थाद्वरेणोपयन्त्रेति योज्यम् । सचोपयन्ता गुरुणानुज्ञातस्तं गृह्णाति । कीदृशो वोढा गृह्णाति । शुचिः करग्रहणेऽधिकृतः धर्मोपयोगिनी ममेयमिति शुद्धसंकल्पः, प्रत्यङ्मुखः कन्यायाः पुरस्तादग्रे स्थितः सन् । 'प्राङ्मुखः सर्वकर्माणि कुर्वीत' इत्यस्यापवादार्थं प्रत्यङ्मुख

इति। दक्षिणं लोकप्रसिद्धं, साङ्गुष्ठमङ्गुष्ठसहित-मुत्तानं नीचा दक्षिणेन नितान्तमञ्चति चेष्टासु प्रगल्भते न्यक् दक्षिणस्तेन। यथोक्तं धनुर्वेदे

'पूर्वं वामेन शिक्षेत पूर्वसिद्धो हि दक्षिणः।'

इति। न्यञ्चतीति न्यक् तेन नीचा न्यग्भूतेनेत्यावृत्त्या योज्यम्। अरिक्तं साभरणं, असम्भवे सुवर्णकर्णिकादियुक्तम्, अतिदौर्गत्ये पुष्पफलादिसहितम्। अरिक्तेनेति तद्वत्। एवं सव्येन सव्यमिति समस्तस्य मंत्रादेरतिदेशः। हे कन्ये ते तवाहं हस्तं गृह्णामि देवस्यान्तरात्मनः सवितुः वैदिककर्माणि चिकीर्षोः प्रसवेऽनुज्ञायां वर्तमानः आदित्यस्य वा सवितुः प्रसवेऽनुज्ञायां वर्तमानोऽश्विनोर्बाहुभ्यां नत्वात्मीयाभ्यां चर्ममयाभ्यां पूष्णो हस्ताभ्यां गृह्णामि ॥ १७ ॥

गृह्णामीति चतस्रस्त्रिष्टुभावनुष्टुभौ जपति ॥ १८ ॥

गृह्णामि ते सुप्रजास्त्वाय हस्तौ मया पत्या जरदष्टिर्यथासः।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥१॥

सूर्याया आर्षम्। मांत्रवर्णिकी देवता। हे पति अहं ते तव हस्तौ गृह्णामि। किमर्थम्।

सुप्रजास्त्वाय लोकयपुत्रसिद्धये । त्वं च मया पत्या भर्त्रा सता जरदष्टिर्यथासः भवसि, तथा भूयाः जराजर्जरितदेहा भूयाः असमये भवत्याः प्रमयो मा भूदित्यर्थः । अमुत्र पक्षे जरया दृष्टिरुपक्षयो यस्याः सा जरदष्टिः । त्वा त्वां भगादयश्चत्वारो देवा अदुर्दत्तवन्तः गार्हपत्याय गार्हपत्यार्थम् ॥

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् २

हे पूषन् आदित्य अस्याः प्रियायास्तां शिवतमां मतिं आ ईरयस्व प्रेरयस्व तनु वा । यस्यां सत्यामधिकरणभूतायां बीजं रेतो मनुष्या वपन्ति क्षिपन्ति । या नोऽस्मानुशती कामयमाना सती ऊरू विश्रयाते विविधं कृत्वा श्रयाते समर्पयति विततयति वात्मीयावूरू । वयमपि यस्यामुशन्तः कामयमानाः सन्तः प्रहराम प्रक्षिपाम शेपं प्रजननम्, अन्योन्यमावयोः प्रीतिरस्त्वित्यर्थः । तथाह्ययमुपकारो भवति—

'संप्रीतिर्यत्र दम्पत्योस्त्रिवर्गस्तत्र वर्धते।'

सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥ ३ ॥

इयं कन्या पूर्वं सोमस्य संबन्धिन्यासीत्। स सोमो भुक्त्वेमां गन्धर्वायाददत् ददौ, गन्धर्वोऽग्नये। अग्निर्मह्यं संप्रति ददातु। न केवलमिमां यावता रयिं धनं पुत्रांश्चाग्निर्मह्यं ददातु अग्निरिमां कन्यां मह्यं दत्त्वा पुत्रधन-समृद्धां करोत्वित्यर्थः ॥ एतमेवार्थं चतुर्थ्यर्चा प्रपंचयति

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयोऽग्निष्टे पतिस्तुरीयोऽहं मनुष्यजः ॥ ४ ॥

हे कन्ये त्वां सोमः प्रथमो विविदे पति-स्तव बभूव प्रथमः। तत उत्तरो द्वितीयः गंधर्वो विविदे। तृतीयोऽग्निस्ते पतिस्तव पति-र्बभूव। तुरीयश्चतुर्थोऽहं मनुष्यजो मानुष्यः संप्रति भवामि ॥ १८ ॥

ततो गाथा वाचयति सरस्वति प्रेदमवेत्यनुवाकमुभावित्येके यदि पृथ-क्तंत्रम् ॥ १९ ॥

गीयन्त इति गाथाः विशिष्टा एव ऋचः । अत एव कास्ता इत्यपेक्षायां सरस्वति प्रेदम-वेत्यनुवाकमाह अत्रानुवाके याः स्थितास्ता एवेत्यर्थः । ह्यन्तरस्वरयुक्तासु च कासुचिदृक्षु गाथाशब्दो रूढः । यथोक्तं

'छन्दोगा बह्वृचाश्चैव तथा वाजसनेयिनः ।
उच्चनीचस्वरं प्राहुः स वै गाथिक उच्यते ॥'

इति । अयं समुदायार्थः—ततोऽनन्तरं सरस्व-तीत्यनुवाकपरिच्छिन्ना गाथा गुरुर्वरं वाचयति भाणयति। एके पुनर्मन्यन्ते उभावपि कन्यावरौ गाथा गुरुर्वाचयति । किं सर्वदा । नेत्याह, यदि पृथक्तन्त्रमिति । अत्रायमभिप्रायः—विवा-होद्वाहौ हि भिन्ने कर्मणी । कन्यासंस्कारो विवाहः । वरसंस्कार उद्वाहः । तत्र यदि देश-कालकर्त्रैक्यात्तन्त्रेणेतिकर्तव्यता, तदा सकृदेकं वरमेव भाणयति गाथाः स्वाध्यायिको गुरुः, यदि तु देशकालैक्येऽपि कन्यावरयोरेवाधि-कृतत्वादृत्विजो दक्षिणया क्रीतत्वात् कर्तृ-भेदात्तंत्रभेदस्तदोभावपि वाचयितव्यौ—इति ॥

सरस्वति प्रेदमव सुभगे वाजिनीवति ।
यां त्वा विश्वस्य भूतस्य प्रागायाम्यस्याग्रतः ॥ १ ॥

अत्रानुवाके ब्रह्मण आर्षम् । अनुष्टुप् छन्दः । गन्धर्वाप्सरोराजर्षिप्रभृतीनां चरितं द्व्यन्तरेण स्वरेण याभिर्गीयते, ता गाथा इत्युक्तम् । इह च सर्ववाक् सरस्वती, तद्रूपेण च वधूरुपचर्यते । मनोमेघप्रभृतिश्च गन्धर्वः । तद्रूपो वरः स्तुत्यर्थमुच्यते सरस्वतीति । प्रेत्युपसर्गोऽवेत्याख्यातेन संबध्यते । हे सरस्वति सा त्वमिदं कर्म प्राव 'अव रक्षणे' गोपाय । सुभगे सर्वहितकारिणि । वाजिनीवति वाजिन्यः फलपाकान्ता ओषधयस्तद्वति । स्तनयित्नुवाग्रूपा सरस्वती वृष्ट्यादिद्वारेण । सा का । यां त्वामहं प्रागायामि शब्दयामि स्तौमि । कीदृशीम् । अस्य विश्वस्य सर्वस्य भूतस्योत्पन्नस्य सर्गादावग्रे स्थितां शब्दब्रह्मविवर्तत्वात् सर्वस्य सरस्वत्याश्च शब्दरूपत्वात् ॥

यस्यां सर्वं समभवद्यस्यां विश्वमिदं जगत् ।
तामद्य वाचं गास्यामि या स्त्रीणामुत्तमं मनः ॥ २ ॥

तां चाद्य अस्मिन्नहनि सरस्वतीं वाचं गास्यामि शब्दयिष्यामि । या स्त्रीणामुत्तमं मनः

मानसं प्रकाशनम्, प्रकाशात्मिका हि वाक्, प्रकाशरूपं च हृदयं चेतः। याच अग्रे प्रथमं सर्गादौ समभवत् सर्वं, विवर्तरूपा बभूव । यस्यां चेदं वर्तमानं विश्वं सर्वं जगदाश्रितम्॥

य इह पूर्वे जना आसन् पूर्वे पूर्वतरेभ्यः ।
मूर्धन्वांस्तेभ्यो गन्धर्वः पुरा देवेभ्य आतपत् ॥ ३ ॥

य इह पूर्वे जनाः, य इह जगति पूर्वे जना अभूवन्,तत्पूर्वतरेभ्योऽपिच पूर्वे, तेभ्योऽपि पुरा गन्धर्वो मूर्धन्वान्नाम्नासीत्। किं बहुना, देवेभ्योऽपि यः पुरा आतपत् प्रकाशितवान् ब्रह्मरूप इत्यर्थः। गां सरस्वतीं धारयति वृणोति च गंधर्वः । सरस्वती वागात्मिकेयमधिगीयमाना कन्या, प्रजापतिरूपो गन्धर्वो वर इति प्ररोचनार्थः ॥ ३ ॥

य एति सर्वतः प्राग्भ्यो दिशोऽधिपवमानः ।
मूर्धन्वांस्तेभ्यो० ॥ ४ ॥

यो वायुरूपः सन् सर्वत एति आगच्छति अधिपवमान आधिक्येन पवित्रीकुर्वन्। अतश्च प्रागादिभ्यो दिग्भ्य आगच्छन्तः प्राच्यादिदेशभेदेन व्यपदेशभेदभिन्ना वायवो भवन्ति,

तेभ्योऽपि देवेभ्यो वायुभ्यः पुरा पूर्वं मूर्धन्वानेव गन्धर्वः आतपत् ॥ ४ ॥

स भगवो न मरिष्यस्यहं चेदस्मि भेषजम् ।
मूर्धन्वांस्तेभ्यो० ॥ ५ ॥

यः पूर्वोत्पन्नः सन् जीवात्मना सह प्राणाख्यो वायुः, हे भगवः भगवन् जीव, स त्वं मरणधर्मापि न मरिष्यसि यावदहमस्मि भवामि भेषजं तिष्ठामि इन्द्रियैः सह । तेभ्योऽपि देवेभ्यो द्योतनादिधर्मकेभ्यः प्राणेन्द्रियेभ्यः पुरा मूर्धन्वान् गन्धर्व आतपत् ॥ ५ ॥

हिरण्यवर्णो वैरम्पः स त्वा मन्मनसं करोतु ।
यद्राजा याति समितिं समुद्रमिव सौश्रवः ॥ ६ ॥

स प्रकृतो गन्धर्वः प्रजापतिः हे वधु त्वां मन्मनसं करोतु इति वर आशास्ते मदेकचित्तां पतिव्रतां करोत्वित्यर्थः । कीदृशः स । हिरण्यवर्णः भास्वरप्रकाशैकरूपः । वैरम्पो वीरस्य योगिनो मोहवैचित्र्यमोहनसमर्थस्य कर्म वैरं, तत् पाति रक्षतीति वैरम्पः । यत् यः सौश्रवः शोभनभ्रूमध्यसंयमात्प्रतीतो योगिनां, राजा राजमानः, समितिं संग्राममिव समुद्रमिमं

संसारदुःखभारं याति तारयतीत्यर्थः। य एति सर्वतः प्राग्भ्यो दिश इति पंचम्याः स्थाने व्यत्ययेन प्रथमा । केचित्प्राग्भ्यो विश इति पठन्ति, तत्र च्छान्दसो वर्णव्यत्ययः। पुराणतरच्छान्दसास्तु पठन्ति प्राग्वादिभ्योऽधिपवमान इति, अर्थं च व्याचक्षते प्राक् प्रथमं वाति वायते वा गच्छति प्राग्वा, सर्वाभ्यः सर्वतो दिग्भ्यः पवमान एतीति ॥

विच्छिन्नसंप्रदायेषु शताध्ययनवर्तिषु ।
मन्त्रेष्वपौरुषेयेषु यथेच्छं परिकल्पनात् ॥
पाठानां गत्यभावेन यथादृष्टि प्रदर्शनम् ।
क्रियमाणं सतामद्यैर्नोपालभ्यं कथंचन ॥

न वातस्याभि वायते नोद्वातस्याभि धीयते ।
न वातस्या धुरं वहतो नोद्वातस्यापमीयते ॥ ७ ॥

वातस्याभि अग्रे न अन्येन केनापि देवेन वायते गम्यते। नोद्वातस्याभि धीयते नच वातस्याभिमुखेन केनापि धीयते आगन्तुं मन्यते। वातस्य धुरं वहतः पृथिव्यादिकं धारयतो विमानादिकं च प्रेरयतो नान्येन केनाप्यपमीयते सह गम्यते माहात्म्यमाचर्यते । उदिति नि-

पातः सहार्थे। पुनःपुनर्वातशब्दोदीरणमतिशयार्थमहो रमणीया अहो रमणीयेत्यादिवत्। केचित्तु पठन्ति नेद्वातस्याद्ध धीयते न इत् वातस्य आत् ह धीयते, उकारो वर्णागमः, हशब्द इतिहासे, अन्येनाधीयते सहायेनागम्यते ॥ ७ ॥

आ सत्यहरितो रथः सौभ्रवः सुहिरण्ययः।
तं वात इभ्रजीयत्युद्वातो दृढया धुरा ॥ ८ ॥

आ इत्युपसर्गो भ्रजीयतीत्यनेनाख्यातेन संबध्यते। सत्यः सत्यप्रधानो हरितो हरितवर्णः आदित्यरथः, अथवा सत्यप्रधानाश्च ते हरयोऽश्वास्ते विद्यन्ते यस्य स सत्यहरित इति मत्वर्थीयस्तकारः। सौभ्रवः भ्रूसंयमेन तीक्ष्णदृष्टिभिरपि द्रष्टुमशक्यः। हिरण्ययः हिरणमयस्तैजसः। तमुद्वात ऊर्ध्वगतिर्वात आभ्रजीयति आभ्रजयति गमयतीति विवर्तस्य प्रजापतिरूपस्य वायोर्माहात्म्यवर्णनम्। कया आभ्रजीयति उद्वातः। दृढया धुरा ऊर्ध्वं उत्कृष्टो वात एव दृढा धूस्तया ॥ ८ ॥

तवैव राजन्दुन्दुभयस्तव दुन्दुभिरानकः।
तव वातोद्वाता अश्वौ तव चैत्ररथं वनम् ॥ ९ ॥

मूर्धन्वान् गन्धर्व उच्यते। हे मूर्धन्वन् राजन् तवैव दुन्दुभयो जयोद्घोषणा वाद्यविशेषाः उत्कृष्टा वा शब्दादयः प्रकाशनपराः, तथा आनकः पटहाख्योऽपि दुन्दुभिविशेषः, तवैव वातस्तिर्यग्गतिः पवनः, उद्वातः ऊर्ध्वगतिर्वातोऽधःपतनाद्वा, तथा अश्वौ । अथवा देहगतः प्राणो वायुरुद्वातः, अपानो वातस्तौ वातोद्वातौ प्राणापानौ शरीरस्य रथस्य अश्वाविव सर्वप्राणिनाम्। चैत्ररथाख्यं वनं देवोद्यानं तवैव, सर्वविभवास्त्वत्स्वामिका इत्यर्थः ॥ ९ ॥

ते शुक्रं शक्रस्याविन्दन्पराञ्चं निहितङ्गुहा ।
मूर्धन्वांस्तेभ्यो गन्धर्वः पुरा जत्रुभ्य आतृदः ॥ १० ॥

ते देवा वाय्वादयः शक्रस्य शक्तस्य सर्वकारणस्य प्रजापतेः शुक्रं सारमविन्दन् ज्ञातवन्तः। पराञ्चं परोक्षं गुहायां हृदये विदुषां निहितं, अविद्याभेदप्रपञ्चो वा गुहा। यद्वा शक्रस्येन्द्रस्य शुक्रं प्रजननमुदकलक्षणं गुहायां रश्मिसंघाते निहितं परोक्षं ज्ञातवन्तः ते देवाः। तेभ्यो देवेभ्यः पुरा पूर्वं मूर्धन्वान् गन्धर्वोऽविन्दत्। किमवधि ज्ञातवान्। जत्रुभ्य आतृदः

आजत्रुभ्य आतृदः जत्रूणि संश्लेषणानि सर्वाधिकरणानि 'सृपितृदोः कसुन्' (३।४।१७) तृदः तर्दनं विनाशः आसृष्टेराप्रलयात् यदुत्पादनपालनप्रलयसंपादनसामर्थ्यं, तन्मूर्धन्वानविन्दत् सकलमिच्छातः ॥ १० ॥

हिरण्यवर्णं सुभृतं शोभमानं कन्याया हस्तं परिगृह्य पुण्यम् ।
सा पुत्रकामा सुभगाय भर्त्रे भव वशीयान्गिरिवत्स्थिराय॥११॥

एष कश्मीरेष्वेव संप्रति पठ्यते । वर आशास्ते कन्याया हस्तं गृहीत्वा अहं वशीयान्भव भूयासम् । भवेति व्यत्ययेन मध्यमपुरुषः । अथवा अन्तरात्माभिधीयते कन्याया हस्तं गृहीत्वा हे अन्तरात्मन् वशीयान्भव गिरिवत्स्थिराय पर्वतवत् स्थैर्याय । हे वधु त्वमपि या मयोह्यसे सा भर्त्रे भर्त्रर्थं पुत्रकामा भव । कामनं कामः पुत्रार्थ एव कामो रतिर्यस्याः सा पुत्रकामा । किमर्थम् । सुभगाय सौभाग्याय, पुत्रवती हि सती लोके श्लाघ्या भवति, नतु रत्येकफला । भर्तृविशेषणं वा सुभगायेति । हस्तं विशिनष्टि—हिरण्यवर्णं सुवर्णकान्ति, सुभृतं कङ्कणाद्याभरणैः सु-

पूर्णमत एव शोभमानं, मंत्रवत्परिग्रहात्पुण्यं पवित्रम् ॥ ११ ॥

वैरम्पे मुनिपर्वते गिरौ हरितसंकाशे ।
संकल्परमणेऽमरावुभौ सुमनसौ चरावः ॥ १२ ॥

वर आह—हे वधु वैरम्पाख्ये मुनिजनसेविते हरितसंकाशे सुवर्णमये मेराविति यावत्, संकल्पमात्रेण सर्वाभिलषितसत्फलप्राप्तिर्यत्र तत्र संकल्परमणे, अमरावमरणधर्मकौ देवौ भूत्वा उभावपि सुमनसौ प्रसन्नचित्तौ चरावः संचरिष्यावः पुरुषायुषे पूर्णे ॥ १२ ॥

आणी व रथवेष्टसि वने वारिवर्षण्ये ।
अप्सराः सूर्यवर्चसिनी वशिनी मन्मना भूयाः ॥ १३ ॥

आणी रथकाष्ठिका, हे वधु त्वमाणी व रथवेष्टसि रथव्यापिनी यथा रथाव्यभिचारिणी, तथा मयि भूयाः पवित्रा । वशब्द उपमायाम् । तथा वने वारिवर्षण्ये विद्युल्लता यथा अव्यभिचारिणी मेघं वनं विना न दृश्यते, तथा त्वं मयि भूयाः । वारि वर्षत् पतत् नयत्यनुमापयतीति वारिवर्षण्या तडित् । अप्सराश्च सेत्याहुः । तथा सूर्यवर्चसिनी तेजस्विनी भूयाः वशिनी

च ईशाना मन्मनाश्च मयि दत्तचित्ता पतिव्रता भूया इत्यर्थः ॥ १३ ॥

यासा उपरि तिष्ठति वने वारिवर्षण्ये ।
वसुगा सूर्यवर्चसिनी वशिनी मन्मना भूयाः ॥ १४ ॥

अथवा यासौ तडिद्रूपधारिणी अप्सरा उपरि तिष्ठति, सैवेह त्वं रूपान्तरेणावतीर्णा अहं च मेघो वारिवर्षण्यः । अतश्च त्वं मयि दत्तचित्ता भूया इति समानं पूर्वेण । वसुगा धनवतीति विशेषः ॥ १४ ॥

अश्वत्थक उपरि श्येनो रमणीयतरो नाम ।
तस्मिन्ह रम्भा रमते शक्र इव परितक्म्यायाम् ॥ १५ ॥

प्रशस्तो वटवृक्षोऽश्वत्थकस्तत्रोपरि श्येनः शंसनीयो रमणीयतरो नाम गन्धर्व आस्ते । तस्मिन्नप्सरा रम्भा नाम रमते क्रीडते । शक्र आदित्यः, स यथा परितक्म्यायां रात्रौ विश्राम्यति ॥ १५ ॥

आस्यन्दमाना सुभगे निर्गिरिभ्यः सरस्वति ।
मातेव दुहितृभ्यः कुल्याभ्यो विभजा वसु ॥ १६ ॥

सरस्वतीं नदीं वाचं वा मध्यमामभ्यर्थयते । हे सरस्वति सुभगे निर्गता गिरिभ्यः, स्यन्दमाना स्रवन्ती, कुल्याभ्योऽन्यनदीभ्यः वसु जलमाभज विभज मातेव दुहितृभ्यः । यथा माता

दुहितृभ्यो धनं पैतृकं विभजते, तद्वत् । मध्य-
मवाक्पक्षे गिरयो देहाः, कुल्या गलबिलानि ॥

इदानीं 'वाग्वा अनुष्टुप् वाक्सरस्वती' इति
श्रुत्यानुष्टुभः सरस्वतीरूपत्वप्रतिपादनादनुष्टु-
प्छन्दोरूपेण स्तोतुमाह

मध्यं तच्छन्दस आहुर्यत्राद्धुर्नाम परेति देवाः ।
अरुणपिशङ्गोऽश्वोऽस्य दक्षिणा यस्तद्वेद स इहागन्तुमर्हति १७

छन्दस इति व्यत्ययेनैकवचनम् । छन्दसां
देवानामसुराणां च तदनुष्टुप्छन्दो मध्यं मध्य-
वर्ति देवा ऋत्विज आहुर्वदन्ति। यत्र च्छन्दसि
परेति परागच्छति देवासुरच्छन्दसां मध्यमनु-
सरति अनुष्टुबित्यनर्थकं नाम देवा आदधुः
विहितवन्तः । अत्रान्तरा मध्येऽनुष्टुप् व्यव-
स्थिता। तानि षोडशिनि ग्रहे विनियुक्तानि। तत्र
च षोडशिनि ग्रहे अरुणपिशङ्गोऽश्वोऽस्य दक्षिणा
मता । सा चेतरच्छन्दोमध्ये व्यवस्थितस्य रा-
जप्रख्यस्यास्यैव च्छन्दसोऽनुष्टुब्लक्षणस्य भव-
तीति सम्भाव्यते । अत एवंभूतं तदनुष्टुप्छन्दो
यो वेद वेत्ति, स इह पाणिग्रहणस्थाने आग-
न्तुमर्हति ऋत्विग्जन्यप्रभृतिः, नातद्वित् । दे-

वासुरच्छन्दसां तु मध्यवर्तित्वमनुष्टुभ इत्थं

'गायत्र्युष्णिगनुष्टुभो बृहतीपंक्तिस्त्रिष्टुभः।
जगती चेति विज्ञेयाश्छन्दसां सप्त जातयः॥'

तत्रैकैकाक्षरवृद्ध्या दैवान्येकाक्षरादीनि सप्ताक्षरान्तानि सप्त च्छन्दांसि भवन्ति। दैवी एकाक्षरा गायत्री। द्व्यक्षरा उष्णिक्। त्र्यक्षरानुष्टुप्। एवमादिक्रमेण दैवी जगती सप्ताक्षरा, आसुरी तु पंचदशाक्षरा। एकैकाक्षरहान्या च प्रातिलोम्येनान्यान्यासुराणि च्छन्दांसि भवन्ति। तत्र नवाक्षरा गायत्री भवति। एवं चैकाक्षरादारभ्य सप्तमाक्षरपर्यन्तान्यानुलोम्येन दैवानि च्छन्दांसि स्थितानि। पंचदशाक्षरादारभ्य प्रातिलोम्येन नवममक्षरं यावदासुराणि। अष्टमं त्वक्षरं वर्गद्वयस्य मध्ये भवति। तेनेयमष्टाक्षरा अनुष्टुप् मध्ये भवतीत्यलमतिवैतत्येन॥ १७॥

इषीकवर्णे लेखभ्रूः सुभगे सुस्मिते।
मूर्धन्वांस्त्वा गन्धर्वो मामभिनियच्छतु॥ १८॥

इषीकं शरकाण्डं सुवर्णमित्येके। हे सुवर्णवर्णे शरकाण्डगौराकारे वा, हे लेखभ्रूः

अंजनलेखावद्भ्रुवौ यस्याः, सा सम्बोध्यते, हे सुभगे प्रियदर्शने, सुस्मिते चारुहासिनि, त्वां मूर्धन्वान्गन्धर्वो मामभि मां प्रति नियच्छतु नियतां मदेकाधीनां करोतु । स हि कन्यास्वामीत्युक्तम् ॥ १८ ॥

उभये त्वा देवगन्धर्वाः सह्वयश्चो विह्वयामहे ।
तेषां यतरान्कामयसे तानभ्येहि सरस्वति ॥ १९ ॥

सोमक्रयिणी वाक् सरस्वतीत्युच्यते । हे सरस्वति देवा गन्धर्वाश्चोभये सह्वयश्वः सहाश्वमानाः सह भूत्वा त्वां विह्वयामहे तव विविधमाह्वानं कुर्मः । तेषामुभयेषां मध्ये यतरान् कामयसे देवान् गन्धर्वान्वा, तानभ्येहि आभिमुख्येन गच्छ ॥ १९ ॥

अभ्यावर्तेऽहं देवान्गायतः कामयामहे ।
गायन्तं स्त्रियः कामयन्ते न तथा ब्रह्मवादिनम् ॥ २० ॥

सरस्वत्याह—गायतो देवानेवाहमभ्यावर्ते आभिमुख्येन वर्ते, नतु वेदं पठतः सुरान् । यतोऽहं गायत एव कामयामहे कामये इति वचनव्यत्ययः । तथाहि गायन्तमेव हि स्त्रियः कामयन्ते, नतु ब्रह्मवादिनं वेदानां पाठकम् ॥२०॥

या सा उपरि पर्वत आत्मना रममाणेव ।
क्षौममृद्वी ह वा असि त्वोत ओजसि शृणोमि ॥ २१ ॥

या उपरि पर्वते गिरौ मेघे वा विद्युद्रूपेण मध्यमवाग्रूपेण वा आत्मना स्वेन रूपेण रममाणेव क्रीडन्तीव तिष्ठति सरस्वती, सा हे वधु असि भवसि त्वं, नास्ति नः संशयः । कीदृशी । क्षौममृद्वी दुकूलवत्कोमला जलवृष्टिदानेनार्थाभिधानेन वा । ह वै इति निपातौ पादपूरणौ । एवं च सति वधूं वदति वरः— यतस्त्वं सरस्वती, तेन त्वया ऊतो रक्षितः सन्नहमोजसि सति शृणोमि आकर्णयामि सकलं कर्तव्यं श्रुतिस्मृतिविहितं कर्तव्यतया व्यवस्यामि सहधर्मचारिण्यास्तव लाभबलेनेत्यर्थः । केचित्तु शृणोत्विति पठन्ति । तत्राप्ययं मदात्मा शृणोत्वित्यर्थः ॥ २१ ॥

इति सारस्वतानुवाकविवृतिः ॥

ततो गाथा वाचयति सरस्वति प्रेदमवेत्यनुवाकमुभावित्येके यदि पृथक्तन्त्रमिति विवृतमियता । यदि पृथक्तन्त्रमित्युत्तरसूत्रेणापि संबध्यते ॥ १९ ॥

प्रदक्षिणमग्निमानीय तत्रैवोपवेश्य संस्थापयेत् ॥ २० ॥

पृथक्तन्त्रपक्षेऽग्निप्रदक्षिणं कृत्वा वधूवरावानीय पुनस्तत्रैवोपवेश्य यत्र पाणिग्रहणं वृत्तं, संस्थापयेत् समापयेदृतुतिथ्यादिकं भविष्यत्तन्त्रमुद्वाहसंबन्धितया, ततो विवाहसंबन्धितया भूय उद्वाहनतन्त्रं सकलं पूर्वं प्रदर्शितं विवाहसंबन्धितयोपक्रम्य वक्ष्यमाणं कुर्यादित्यर्थः ॥ २० ॥

एककर्मणि तन्त्रे उत्तरेणाग्निं प्रत्येत्य ततो विवाहः ॥ २१ ॥

कर्मशब्दः प्रयोगवचनः । तन्त्रमितिकर्तव्यता विध्यन्ता । सकृदनुष्ठीयमानेतिकर्तव्यतोपकारपक्षे उत्तरेणाग्निं प्रत्येत्य प्रदक्षिणमकृत्वैव उत्तरभागेनैव कतिपयक्रमान् गत्वा प्रत्यागत्य ततो विवाहः विवाहाङ्गतया वक्ष्यमाणानामृतुतिथ्यादीनां प्रयोगः । तन्त्रेण चोद्वाहोपकारोक्तानां वक्ष्यमाणानां च आवृत्त्यानुष्ठानमित्यर्थः । एककर्मणि तन्त्रे विवाहोद्वाहलक्षण इत्यपि केचित्पदयोजनां कुर्वन्ति ॥ २१ ॥

एत एव तन्त्रावृत्ती स्पष्टार्थमेकेनैव सूत्रेण विवरीतुमाह

य इमे द्यावापृथिवीत्यादय उद्वाहहोमा जयप्रभृतयश्च नैककर्मणि तन्त्रे स्विष्टकृदाज्यभागौ च ॥ २२ ॥

उद्वाहे होमा ये जयप्रभृतयः, य इमे द्यावापृथिवीत्यादयश्च, तथा स्विष्टकृत्, तथा आज्यभागौ। एते सर्वे न एककर्मणि तन्त्रे आवृत्त्या कर्तव्या इत्यर्थाज्ज्ञायते। तेन श्रुत्यर्थानां विधिनिषेधलक्षणमर्थद्वयं यथासंभवमनेन निदर्शितम्। स्विष्टकृच्छब्द उपरितनस्य तन्त्रखण्डस्योपलक्षणार्थः, आज्यभागशब्दोऽप्यधस्तनस्य ॥ २२॥

पश्चादग्नेर्दर्भेषु सा त्वमसीति वाचयति सा त्वमस्यमोऽहममोऽहमस्मि सा त्वम्। ता एहि विवहावहै पुंसे पुत्राय कर्तवे। रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥२३॥

एककर्मणि तन्त्रे उत्तरेणाग्निं प्रत्येत्य प्रत्या-

नीयाग्नेः पश्चाद्दर्भेषु विनिहितचरणौ वधूवरौ कृत्वा 'सा त्वमसि' इति वरं गुरुर्वाचयति ॥

सा नाम ऋगासीत् अमो नाम साम, सा च अमश्च साम ऋक् च गीतिश्चेत्यर्थः। एवं सामशब्दस्य व्युत्पत्तिः । ऋक्सामरूपावावामिति विभज्य वरः प्रदर्शयति—हे वधु त्वं सा ऋगसि भवसि, अमोऽहमस्मि अहममः साम भवामि । सा त्वं सा त्वं भवसि, अमोऽहममोऽहं भवामीति द्विरुक्त्या ऋक्सामरूपत्वं द्रढयति । ता एहि विवहावहै तौ द्वावावां हे वधु एह्यागच्छ विवहावहै विवाहं कुर्वः। किमर्थम् । पुंसे पुत्राय कर्तवे, कर्तवे इति तुमर्थे भावे तवेन्प्रत्ययः, पुंसे पुत्रायेति सुब्व्यत्ययः, पुमांसं पुत्रं कर्तुम् । तथा रायो धनस्य पोषाय पुष्टये, सुप्रजास्त्वाय शोभनप्रजालाभाय, सुवीर्याय सुवीर्यं कर्मस्वोजस्विता तदर्थम् ॥ २३ ॥

अग्निमभिदक्षिणमानीयेह्यश्मानमातिष्ठाश्मेव त्वं स्थिरो भव । कृण्वन्तु विश्वेदेवा आयुष्टे शरदः शतमिति दक्षिणेन

पदाश्मानमास्थापयत्यातिष्ठेममश्मानम-श्मेव त्वं स्थिरा भव । प्रमृणीहि दुवस्यवः सहस्व पृतन्यत इति ॥ २४ ॥

अग्निमभिदक्षिणं वधूवरावानीय, अग्नेरुत्तरभागेऽश्मानं स्थापयित्वा दक्षिणेन चरणेन आस्थापयति गुरुः प्रयोजकः, वधूवरावातिष्ठत आक्रामतः । यथामन्त्रलिङ्गमाद्येन वरोऽश्मानमाक्रामति, उत्तरेण वधूः । गुरुस्त्वाशास्ते तयोर्मन्त्रेणेष्टम्—हे वर अश्मानमातिष्ठ अश्मवत् स्थिरो भव, किंच ते तव विश्वेदेवाः शरदः शतमायुः कृण्वन्तु कुर्वन्तु, हे वधु इममश्मानमातिष्ठ त्वं चाश्मवत् स्थिरा भव, तथा दुवस्यवः दुवस्यून् उपतापमिच्छतः शत्रून् प्रमृणीहि जहि, तथा पृतन्यतः पृतनां सेनामिच्छतो युयुत्समानान् सहस्व प्रसहस्व अभिभव । दक्षिणेन पदेत्युत्तरमन्त्रेऽप्यनुषज्यते ॥ २४ ॥

आज्यस्याञ्जलावुपस्तीर्येदं हविरित्यभिमृश्याथास्यै शमीलाजानावपति भ्राता ब्रह्मचारी वा ॥ २५ ॥

आज्येनाञ्जलावुपस्तृणाति चतुरवदानेन । तत इदं हविरित्यादिना मन्त्रेण शूर्पस्थान् शमीपर्णमिश्रांल्लाजानभिमृशति वरः । अनन्तरमञ्जलावस्या वध्वा भ्राता, ब्रह्मचारी वा भ्रातुरसन्निधाने शमीपर्णमिश्रांल्लाजानावपति ॥

इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये । आत्मसनि प्रजासनि पशुसन्यभयसनि लोकसनि । अग्निः प्रजां बहुलां मे करोतु अन्नं पयो रेतो अस्मासु धत्त ॥

कोकिलस्य राजपुत्रस्यार्षम् । अनुष्टुप् छंदः । इदं लाजाख्यं हविः मे मम प्रजननं दशपुत्रसंपादनं भवतु, तथा सर्वगणं सर्वेषां गणैः पुत्रप्रभृतीनां पशूनां गणैर्युक्तं, स्वस्तयेऽविनाशाय चास्तु । आत्मसनि आत्मानं शरीरमात्मीयत्वात्सनति 'षणु दाने' इत्यस्माद्धातोः ददाति प्रज्ञापयतीत्यात्मसनि । एवं प्रजासनि पशुसन्यभयसनि लोकसनि । सर्वत्रेह हविरन्यपदार्थः । अग्निर्मम पुत्रपौत्रादिकां भूयसीं प्रजां करोतु । अन्नादिकं चास्माकं धत्त स्थिरं कुरुत । बहुवचनादर्यमगन्धर्वत्र्यम्बका इज्यमाना एवं प्रार्थ्यन्तेऽपरार्धे ॥ २५ ॥

तानविच्छिन्दती जुहोत्यर्यमणं नु देवमिति ॥ २६ ॥

तान् लाजान् अविच्छिन्दती विच्छेदमकुर्वती एकेनैव प्रक्षेपेण जुहोत्यर्यमणं नु देवमित्यादिमन्त्रेण ॥

अर्यमणं नु देवं कन्या अग्निमयक्षत ।
सोऽस्मान्देवो अर्यमा प्रेतो मुञ्चातु मामुष्य गृहेभ्यः स्वाहा ॥

ब्रह्मण आर्षम् । अर्यमगन्धर्वत्र्यम्बका देवताः। उपरिष्टाद्बृहत्यो होममंत्राः । इयं नारीत्यनुष्टुप् । कन्या अग्निं देवमयक्षत इष्टवत्यः । अर्यमणमित्यग्नेर्विशेषणम् । अरीन् यच्छतीत्यर्यमाग्निः, तम् । अयक्षतेति तिङ्व्यत्ययः यजन्ते । अन्ये त्वग्निमित्यपि द्वितीयां सप्तम्याः स्थाने वर्णयन्ति अग्नावर्यमणं कन्या यजन्ते । अत्र पक्षेऽर्यमैव देवता । एवमनूच्य वधूर्यज्ञफलमाशंसति । अमुष्येति सामान्येन भर्तृनाम लक्ष्यते । सोऽर्यमा इष्टः सन् अमुष्य देवदत्तस्य इतो गृहेभ्योऽस्मान्मा प्रमुञ्चातु, मा इति निषेधार्थो निपातः, इतो भर्तृगृहेभ्योऽस्माकं च्यावं मा कार्षीदित्यर्थः । स्वाहा सुहुतमस्तु ॥

अग्निर्मा जनिमानिति वाचयति ॥ २७ ॥

वरं भाणयति गुरुरग्निरित्यादिमन्त्रमित्यर्थः ॥

अग्निर्मा जनिमाननया जनिमन्तं करोतु । जीवपत्निर्भूयासम् ॥

जनी जाया । अग्निर्यतो जायावानतो मामपि जायया अविच्छिन्नसंबन्धं करोतु । तत्प्रसादादहमपि जीवपत्निर्भूयासं जीवा पत्नी यस्य स जीवपत्निरहं स्याम् ॥ २७ ॥

इयं नारीति सर्वत्रानुषजति ॥ २८ ॥

इयं नारीत्यस्य अनुष्टुभः त्रिष्वप्यनुषङ्गः कर्तव्यः ॥

इयं नार्युपब्रूते तोक्मान्यावपन्तिका ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥

एषा नारी ब्रवीति । किम् । दीर्घायुरस्तु मे पतिर्ज्ञातयश्च मित्रादयो मम वर्धन्तामिति । किं कुर्वती ब्रवीति । तोक्मान्यावपन्ती लाजान् जुह्वतीत्यर्थः ॥ २८ ॥

एवं द्विरुत्तरम् ॥ २९ ॥

द्वौ वारौ द्विः । एवमुत्तरं कर्म द्वौ वारौ कर्तव्यम् ॥ २९ ॥

तदेव स्फुटं दर्शयितुमाह

पर्य्ययणे पर्य्ययणे लाजाहोमो यजमानं चाश्मानं चास्थापयति गन्धर्वं पतिवेदनमिति ॥ ३० ॥

पर्य्ययणमग्निपरिगमनं यजमानानुषञ्जनम् । तत्र च वरः कर्ता अर्थात् । ततोऽश्मनः स्थापनम् । तत्र परिस्तीर्य्य लाजानामावपनं गन्धर्वं पतिवेदनमिति ॥

गन्धर्वं पतिवेदनं कन्या अग्निमयक्षत ।
सोऽस्मान्देवो गन्धर्वः प्रेतो मुञ्चातु मामुष्य गृहेभ्यः स्वाहा ॥

गां पृथ्वीं धारयतीति गन्धर्वस्तमग्निं पतिवेदनं पत्युर्लम्भयितारं कन्या अन्या यतोऽयक्षत इष्टवत्यः, अतोऽहमपि यजे इति नारी ब्रूते इत्यर्थः । सच देवोऽग्निरिष्टः सन् गन्धर्वोऽमुष्य भर्तुर्गृहेभ्योऽस्मान् मा प्रमुञ्चातु इति पूर्ववत्प्रतिषेधः ॥ ३० ॥

सोमो मा ज्ञातिमानिति वाचयति ॥

सोम इत्यादिमन्त्रं गुरुर्वाचयतीत्यर्थः ॥

सोमो मा ज्ञातिमाननया ज्ञान्तिमन्तं करोतु । जीवपतिर्भूयासम् ॥

यतः सोमो ज्ञातिमानतो मामप्यनया नार्या ज्ञान्तिमन्तं करोतु । जीवपतिर्भूयासमिति व्याख्यातम् ॥ ३१ ॥

त्र्यम्बकं यजामह इति ॥ ३२ ॥

त्र्यम्बकमित्यादिना तृतीयो होमः ॥

त्र्यम्बकं यजामहे सुगन्धिं पतिपोषणम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामुष्य गृहेभ्यः स्वाहा ॥

त्र्यम्बकं शंकरं यजामहे हविर्दानेन पूजयामः । सुगन्धिं सुयशसं, गन्धशब्दो यशोऽभिधायी प्रसिद्धः । पतिपोषणं भर्तुः पोषयितारम् । अहं च त्र्यम्बकस्य पूजितस्य प्रसादात् मृत्योः सकाशात् मुक्षीय । कुतः किंवत् । उर्वारुकमिव बन्धनात् उर्वारुकं कर्करीफलं, तद्यथा बन्धनाद्वृन्तात्पक्वं सत्स्वत एव विमुच्यते वा अर्थिभिस्त्रोट्यते, तद्वदहं मृत्योः सकाशान्नित्यविश्लिष्टा स्यामित्यर्थः । अमुष्य भर्तुर्गृहेभ्यः पुनर्मा कदाचन मुक्षीयेति निषेधः ॥

पूषा मा पशुमानिति वाचयति॥३३॥

अस्यापि वाचनमेव, नत्वनेन होमः ॥

पूषा मा पशुमाननया पशुमन्तं करोतु । जीवपत्निर्भूयासम् ॥

अनया पशुस्वामिनं मां पूषा करोत्विति विशेषः ॥ ३३ ॥

शिष्टान्स्विष्टकृते जुहोति शूर्पेण कर्ता॥

लाजशब्द उभयलिङ्गः सूत्रकृता दृष्टः । कन्यया ये हुतास्तेभ्यो ये शिष्टा लाजास्तान् स्विष्टकृते जुहोति शेषान् 'स्विष्टकृते समवद्यति' इति वचनात् । कन्यया हि प्रधानहोमः कृतोऽञ्जलिना । तन्निवृत्तये शूर्पग्रहणं कर्तृग्रहणं च । विवाहकर्मणि यः कर्ता ॥ ३४ ॥

अथ दक्षिणा केन देयेत्याह

वरो दक्षिणाम् ॥ ३५ ॥

वर एव दक्षिणां विवाहकर्मकर्त्रे दद्याद्द्वि- द्वत्त्वाद्धनस्वामिकत्वाच्च, नतु नारीत्यर्थः । ऋतुतिथ्यादि यावत् स्विष्टकृत् ॥ ३५ ॥

तूष्णीं हस्तौ विमुच्य वि ते मुञ्चामीति सन्नहनम् ॥ ३६ ॥

सावित्रेण मन्त्रेण हस्तग्रहणं यथा, तथा विमोको मा भूदिति तूष्णींग्रहणम् । हस्तौ विमुच्य ततो 'वि ते मुञ्चामि' इति मन्त्रेण सन्नहनं योक्त्रं विमुञ्चति कर्ता मन्त्रलिंगात्, नतु स्वयम् ॥

वि ते मुञ्चामि रशनां वि रश्मीन्वि योक्त्राणि परिचर्तनानि ।
दत्त्वायास्मभ्यं द्रविणेह भद्रं प्र मा ब्रूताद्भविर्दा देवताभ्यः ॥

त्रिष्टुप् । यतीनामार्षम् । 'विमोक एवास्यैष ते' इति वचनादग्नेरेष विमोकोऽन्यत्रानेन प्रतीतः । बन्धनस्य च रशनारश्मियोक्त्रशब्दा अभिधायका उच्यन्ते । युज्यन्ते एभिरिति योक्त्राणि । कीदृशानि । परिचर्तनानि समन्तात् चर्तनं नियन्त्रिततया येषां तानि परिचर्तनानि । मुक्तमग्निं यजमानो ब्रूते—विमुक्तः सन्नग्निरस्मभ्यं द्रविणानि यज्ञोपयोगीनि धनानि दत्त्वा भद्रं च कल्याणं दत्त्वा मां प्रब्रूयात् । कीदृशं माम् । हविर्दा देवताभ्यः, हविषो दातारं यज्ञानुष्ठाने मां विनियुक्तमिति प्रार्थयते यजमान

इत्यर्थः । इहापि परिक्रीतेनर्त्विजा अर्थ्यमानस्य यजमानार्थतया यजमानस्याशीर्भवति । रशनारश्मिशब्दौ च योक्त्रपर्यायौ, पर्यायप्रयोगोऽतिशयार्थः । अथवा योक्त्राणि विमुञ्चामि न केवलं योक्त्राण्येव रशनां च अविद्यामित्यर्थः, वि रश्मीन् रश्मींश्चाविद्यामूलान्रागादीनित्यर्थः । दम्पत्योश्च योक्त्रविमोकेन विवाहभूमौ स्थितोऽग्निर्मुक्तो भवति स्वातन्त्र्यसंचरणेन तस्य संकटपरिहारात् । अतो विमुक्तः पूर्ववदभ्यर्थ्यते ॥

उत्तरतोऽग्नेर्दर्भेषु प्राचीं प्रक्रामयत्येकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मयोभवाय पञ्च प्रजाभ्यः षडृतुभ्यो दीर्घायुत्वाय सप्तमं सखा सप्तपदा भव । सुमृडीका सरस्वति मा ते व्योम सन्दृशि ॥ विष्णुस्त्वान्वेत्वित्यनुषङ्गः ॥ ३७ ॥

अग्नेरुत्तरेणास्तीर्णेषु दर्भेषु प्राङ्मुखीं वधूं प्रक्रामयति कर्ता सप्तपदानि सप्तभिर्मंत्रैः । विष्णुस्त्वान्वेत्विति सर्वत्रानुषङ्गः । एकमिषे विष्णुस्त्वान्वेतु—एकं पदमिषेऽन्नाय निधेहि, त्वां

च गच्छन्तीं विष्णुरन्वेतु। द्वे ऊर्जे विष्णुस्त्वा-
न्वेतु–द्वे पदे ऊर्जे बलाय निधेहीति पूर्ववत्।
त्रीणि रायस्पोषाय विष्णुस्त्वान्वेतु–त्रीणि
पदानि रायो धनस्य पुष्टये निधेहि। चत्वारि
मयोभवाय विष्णुस्त्वान्वेतु–मयः सुखं तद्भ-
वत्यस्मादिति मयोभूस्तस्येदं मयोभवं, तदर्थं
चत्वारि पदानि निधेहि सुखभवनप्रार्थनाये-
त्यर्थः। पंच प्रजाभ्यो विष्णुस्त्वान्वेतु–पुत्रपौ-
त्रप्रजार्थं पंच पदानि निधेहि। षडृतुभ्यो वि-
ष्णुस्त्वान्वेतु–षट् पदानि ऋतुसांमुख्याय नि-
धेहि, ते च ऋतवः संमुखीभूताः फलैः संब-
ध्नन्तु त्वामित्यर्थः। दीर्घायुत्वाय सप्तमं सखा
सप्तपदा भव। सुमृडीका सरस्वति मा ते व्योम
सन्दृशि॥ विष्णुस्त्वान्वेतु–दीर्घायुत्वायायुषे
सप्तमं पदं निधेहि। एभिश्च सप्तभिः पद्भिर्भर्तुः
सुखाय भव। सुमृडीका 'मृड सुखने' सुसुखा।
हे सरस्वति मा ते तव व्योम आकाशस्थः क-
श्चित्सप्तमं पदं द्राक्षीत् पवनान्दोलितवाससो
नग्नं वा कंचित्प्रदेशम्॥ ३७॥

तच्चक्षुरित्यादित्यमुपस्थापयति ॥३८॥

तच्चक्षुरित्यादिना कर्ता कन्यामादित्यमुपस्थापयति ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥

देवहितं देवविहितं, देवेभ्यो वा हितं हितकारि । शुक्रं शुक्लम् । उच्चरत् ऊर्ध्वं चरत् गच्छतु उद्यत् ॥ ३८ ॥

अस्तमितेऽग्निम् ॥ ३९ ॥

विवाहे क्रियमाणे यदि रात्रिर्भवति रात्रौ वा विवाहः, तदा तच्चक्षुरित्यनयाग्निमुपस्थापयेत् ॥ ३९ ॥

जीवन्तीं ध्रुवं स्वस्त्यात्रेयं दर्शयत्यरुन्धतीं च ॥ ४० ॥

जीवन्तीं कन्यामिच्छन् ध्रुवादिकं दर्शयेत् । अत्र केचिद्रात्रावित्यनुवर्तयन्ति दिवा ध्रुवादिदर्शनाभावात्, अपरे नानुवर्तयन्ति यतोऽग्ने पश्यसीति प्रश्ने अपश्यन्ती अपि पश्यामीति प्रतिवचनमाहेत्यर्थो लक्ष्यते । दर्शनमात्रविव-

क्षया हि पश्येः प्रैषः पश्यामि नवेत्यत्र चोत्तरं पश्येम ॥ ४० ॥

एतेषामेकैकं पश्यसीत्याह ॥ ४१ ॥

पश्यसीत्येकैकस्य नाम गृहीत्वा पृच्छेद्गुरुः ॥

पश्यामीति प्रत्याह ॥ ४२ ॥

सापि पृष्टा सती पश्यामीति प्रतिब्रूयात् ॥

सुमङ्गलीरियं वधूरिमां समेत्य पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं विपरीतनेति वीक्षितानुमन्त्रयते ॥ ४३ ॥

वीक्षितान् ध्रुवादीन् गुरुरनुमन्त्रयते । सुमंगलीरित्याद्यानुष्टुप् । इयं वधूः शोभनमंगलयुक्ता भवतु भवत्प्रसादात् । इमां समेत्य संभूय पश्यत । अस्यै च सौभाग्यं दत्त्वा पश्चादस्तं गच्छत । दत्त्वायेति क्त्वो यक् । तेन दिवापि ज्ञेयमेतत् । ध्रुवादिदर्शनं हि जीवनद्योतनमाहुः । तदिहावसरेऽपश्यन्त्या अपि पश्यामीति प्रतिवचनमपमृत्युव्याघाताय स्मर्यते । अत एव ध्रुवादिकं यद्दर्शयेत्, तत्स्वस्त्याविनाशमेव दर्शयेदित्यर्थः ॥ ४३ ॥

उदुत्तममिति प्रागुदीचीमावसथं यतीमनुमन्त्रयते यतो वा स्यात् ॥ ४४ ॥

उदुत्तममित्यादिना अनुष्टुप्चतुष्टयेनावसथं गृहं यतीं गच्छन्तीं प्रागुदीचीमुत्तरपूर्वदिगभिमुखीमनुमन्त्रयते । यत्र वा आवसथः स्यात्, तदभिमुखं गच्छेत् ॥

उदुत्तममारोहन्ती व्यस्यन्तीव पृतन्यतः ।
मूर्धानं पत्युरारोह प्रजया च विराड्भव ॥ १ ॥

हे वधु उत्तममुत्कृष्टं गृहं सुचरितं वा आरोहन्ती, पृतन्यतः पृतनां सेनामिच्छतः शत्रून् व्यस्यन्तीव क्षिपन्तीव, पत्युर्भर्तुर्मूर्धानमधिरोह तस्य स्वगुणगणेन मान्या भवेत्यर्थः, तथा प्रजया पुत्रपौत्रादिकया विशेषेण राजमाना भव ॥

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥ २ ॥

हे इन्द्र मीढ्वः 'मिह सेचने' सेक्तः, गर्भग्रहणाख्याया रेतःस्थितेरिन्द्रप्रसादायत्तत्वादेवं संबोधनम्, इमां वधूं सुपुत्रां सौभाग्ययुक्तां च कुरु । दशास्यां पुत्रानाधेहि विधेहि एकादशं पतिं सम्पादय ॥ २ ॥

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥ ३ ॥

हे वधु सम्राज्ञी श्वशुरे त्वं सम्राज्ञी माननीयतमा सम्यग्राजमाना भव, तथा श्वश्र्वां ननान्दरि च भर्तुर्भगिन्यामेवमधिदेवृषु देवरेषु॥

स्नुषाणां श्वशुराणां च प्रजायाश्च धनस्य च ।
पतीनां च देवृणां च सजातानां विराड्भव ॥ ४ ॥

सजाताः बान्धवपरिजनप्रभृतयः । देवृणां 'छन्दस्युभयथा' (६।४।५) इति ह्रस्वः, मध्यदेशे तु दीर्घः पठ्यते, देवराणाम् । सर्वं गृहगतं तवायत्तमस्त्वित्यर्थः । अत ऊर्ध्वं त्वं नो अग्न इत्यादितंत्रपरिसमाप्तिः । अत्र भर्तृगृहगमनावसरे मधुपर्ककाण्डिका पठ्यते । सा च स्नातकप्रकरणे व्याख्यास्यते ॥ ४४ ॥

इति जालन्धरीयजयपुरवास्तव्यभट्टोपेन्द्रसूनुहरिपालपुत्रदेवपालविरचिते समंत्रकाठगृह्यभाष्ये विवाहप्रकरणं समाप्तम् ॥

इति पञ्चविंशी काण्डिका ॥ २५ ॥

अथ

षड्विंशी काण्डिका ।

पुण्याहे युंक्ते । योगे योग इति युनक्ति ॥

यदा वधूः पुण्ये दिवसे भर्तृगृहं गच्छति तदा रथं शिविकां वा यथासम्भवं युंक्ते । तत्र च योगे योग इति व्याख्यातमंत्रावृत्त्या अश्वादिकं युनक्ति ॥ १ ॥

अङ्कन्यङ्का अभितो रथं ये ध्वान्ता वाताग्रमभि ये संपतन्ति । दूरेहेतिः पतत्रिणीवाजिनीवांस्ते नोऽग्नयः पप्रयः पारयन्त्विति चक्रे अनुमन्त्रयते ॥ २ ॥

अङ्कन्यङ्कावित्यादिकया जगत्या आग्निमारुते रथचक्रेऽनुमंत्रयते ऋत्विक् पार्श्वे वा । सकृच्च मंत्रः प्रयोक्तव्यो द्विवचनालिंगात् । अंचतीत्यंकुः, न्यञ्चतीति न्यङ्कुः, अंकुश्च न्यंकश्चाङ्कुन्यंकौ अञ्चकन्यञ्चकौ गन्तृविशेषौ याभ्यां चक्रे गच्छतः । अङ्कुन्यङ्कौ रथस्याभितः स्थितौ नोऽस्माकं तेऽग्नयः पारयन्तु पथस्तारयन्तु पाल-

यन्तु वा पथि । के तेऽग्नयः । ये ध्वान्तास्तमोरूपाः काष्ठादीन्धनजाः । ये च वाताग्रमभिसंपतन्ति वैद्युतादिरूपा इत्यर्थः । यश्च दूरेहेतिर्दूरगतार्चिरादित्यादिरूपः । यश्च पतत्रिणीवाजिनीवान् पतत्रिणीवान् वाजिनीवांश्चेत्यर्थः, पतत्रिणीवान् वायुगरुडादिमूर्तिषु व्यवस्थितः, वाजिनीवान् व्रीह्यादिमूर्त्याश्रितः । कीदृशा अग्नयः । पप्रयः 'पॄ पालनपूरणयोः' प्रीणन्तीति पप्रयः पालयितारः पूरयितारो वा कामानां, 'प्रा पूरणे' इत्यस्य वा पप्रिशब्दः ॥ २ ॥

खे रथस्य खेऽनसः खे युगस्य च तर्मसु । खे अक्षस्य खे अवदधामीति युगतर्मसु शमीशाखामवदधाति ॥ ३ ॥

खे रथस्येत्यादिना युगस्य तर्मसु च्छिद्रेषु शमीशाखामवदधाति । रथस्य खे आकाशे छिद्रे अवदधामि शाखां, तथा खेऽनसः गन्त्र्याः, एवं युगस्य तर्मसु च्छिद्रेषु, तथा खे अक्षस्य रथाधारकाष्ठविशेषस्यान्यत्रापि च खे छिद्रे शान्त्यर्थं शमीशाखामवदधामि ॥ ३ ॥

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्य-वर्णं सुवृतं सुचक्रम्। आरोह सूर्ये अमृतस्य योनिं स्योनं पत्ये वहतुं कृणुष्वे-त्यारोपयते ॥ ४ ॥

सुकिंशुकमित्यादिना वधूं रथमारोपयति। हे वधु रथमारोह। कीदृशम्। सुकिंशुकं शोभनपलाशकुसुमैस्तदुपलक्षितैरन्यपुष्पैश्च परिजनाहितैः शोभनं, शल्मलिं 'शल हुल पत्लृ गतौ' गमनशीलं, अथवा किंशुकशल्मलिदारुनिर्मितत्वादेवमुच्यते, विश्वरूपं नानाकारं, हिरण्यवर्णं उज्वलरूपं, सुवृतं फलकुसुमादिभिः परिवृतं सुवर्तुलं वा सुवर्तनं सुखचेष्टं वा, तथा शोभनचक्रं, अमृतस्य योनिं अमरणधर्मस्य कारणमप्रमापणकारिणम्। पत्ये भर्त्रे व्यत्ययेन भर्तुः स्योनं सुखं कृणुष्व कुरुष्वैनं वहतुं वहतीति वहतुस्तम् ॥ ४ ॥

मा विदन्परिपन्थिनः सुमंगलीरिति च प्रवाहयते ॥ ५ ॥

'मा विदन्परिपन्थिनः' इति 'सुमंगलीः'इति चैताभ्यां व्याख्यातार्थाभ्यां प्रवाहयते रथम् ॥

संकाशया विवहतं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण । पर्याणद्धं विश्वरूपं यदस्याः स्योनं पतिभ्यः सविता कृणोतु तदिति वधूसंगमे ॥ ६ ॥

एतां जगतीं सावित्रीं वधूसंगमे जपति संकाशयेत्यादिकाम् । अश्वावुच्येते । सम्यगनया प्रकाशमानया दृष्ट्या इदमनो विवहतं प्रापयतम् । ब्रह्मणा अन्नेन सह, गृहैश्च पत्न्या गृहशब्देन गृहस्थपत्न्युच्यते, अघोरेण शिवेन, चक्षुषा मैत्रेण मित्रसम्बन्धिना, नतु शात्रवेण। कीदृशं वहतम् । पर्याणद्धं समन्ताच्छन्नम् । तथा नानारूपं यदनः अस्या वध्वाः पतिभ्यः स्योनं सुखं पतिभ्य इति वचनव्यत्ययः पत्ये तच्च सविता च सुखादिकं सर्वं करोतु । रथयोरन्योन्यसंघाते विघातशंकायामेष जपः॥

ये पथीनामिति चतुष्पथेषु जपतीमे चत्वार इति च ॥ ७ ॥

व्याख्यातौ मंत्रौ। ये पथीनामित्यनुष्टुप्। इमे चत्वार इति त्रिष्टुप्। सूत्रं स्पष्टार्थम् ॥७॥

ये श्मशानेष्विति श्मशानेषु ॥ ८ ॥

जपतीत्यनुषङ्गः ॥

ये श्मशानेषु पुण्यजनाः शावास्तेषु शेरते।
तत्रैव ते रमन्तां मा वधूरन्ववेक्षत ॥

श्मशानेषु शवशयनेषु ये पुण्यजना यक्षा ये च शावाः प्रेतास्तेषु श्मशानेषु शेरते तिष्ठन्ति, तत्रैव ते रमन्तां रतिं कुर्वन्तु, मा वधूरन्ववेक्षत मा द्राक्षुर्वधूम्। वधूरिति सुब्व्यत्ययः ॥ ८ ॥

ये वनेष्विति महावनं महावृक्षं च दृष्ट्वा जपति ॥ ९ ॥

स्पष्टम्। मंत्रोऽपि विवृतः ॥ ९ ॥

इह रडिरिति क्रूरं दृष्ट्वा ॥ १० ॥

इह रडिरित्यादिकं क्रूरं सिंहादिकं दृष्ट्वा जपतीत्यनुषंगः ॥

इह रडिरिह रतिरिह धृतिरिह विधृतिरिह स्वधृतिरिह रन्तिरिह रमतामग्ने वेट् स्वाहा वट् ॥

'लड विलासे' लडनं रडिः क्रीडा इह अस्मासु रमताम् । तथा रतिः प्रीतिः । सर्वत्र रमतामित्यनुषजति । इह धृतिः संतोषः । इह विधृतिर्विधरणं स्थैर्यम् । स्वधृतिः स्वस्य धनस्य धारणम् । इह रंतिः रमणं रन्तिः, रज्ज्वादिकं हिंस्रदर्शनादस्मत्सकाशान्मा दूरीभूदित्यर्थः । अग्ने वेट् स्वाहा वट् संप्रदानार्थीया निपाताः ॥ १० ॥

नमो अस्तु सर्पेभ्य इति सर्पान् ॥११॥

दृष्ट्वा जपतीत्यनुषंगः ॥

नमो अस्तु सर्पेभ्यो ये के च पृथिव्यामधि ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥
येषु वा यातुधाना ये वा वनस्पतींरनु ।
ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥
ये वादो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येऽप्सु सदांसि चक्रिरे तेभ्यः सर्पेभ्यो नमः ॥

गतार्थम् ॥ ११ ॥

ये तीर्थानीति तीर्थे ता मन्दमानेति च ॥ १२ ॥

तीर्थे जपति प्रतीकमुद्रितान्मन्त्रानित्यर्थः । ये तीर्थानीति व्याख्याता । तीर्थमत्र निपानं नद्यवतारस्थानम् । यथोक्तं

'तीर्थाभिधानमिच्छन्ति त्रितयं कृतबुद्धयः ।
शास्त्रं चैव निपानं च वारि चाप्यृषिसेवितम् ॥'

इति ॥

ता मन्दमाना मनुषो दुरोण अधत्तं रयिं सहवीरं वचस्यवे ।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम् ॥

आश्विनी । जगती । हे अश्विनौ मन्दमानौ स्तूयमानौ हर्षयुक्तौ मद् स्तुतिमोदमदे-त्यादिकादर्थनिर्देशात् मनुषो मनुष्यस्य दुरोणे गृहे रयिं धनं अधत्तं छान्दसो ह्रस्वः आधत्तम् । कीदृशं धनम् । सहवीरम् पुत्रसहितं, सहस्रवीर्यं वा पुत्रपौत्रादिमालायुक्तमित्यर्थः । किंच तीर्थं सुप्रपाणं कृतं युवां कुरुतं स्ववगाहं, तथा स्थाणुं तिष्ठन्त्यस्मिन् संपद इति स्थाणुः । कस्मै । वचस्यवे वच इच्छत्यात्मनः 'सुप आत्मनः

क्यच्' (३।१।१८) 'क्याच्छन्दसि' (३।२।१७०) इत्युत्वं तस्मै वचस्यवे । हे शुभस्पती शुभस्य पालयितारौ दुर्मतिं दुष्टां मतिमस्य मनुष्यस्य अपहतं विनाशयतम् । कीदृशीं दुर्मतिम् । पथेष्ठां पथि तिष्ठति पथेष्ठा तां सुरूढामित्यर्थः ॥

अयं नो मह्याः पारं स्वस्ति नैषद्वनस्पतिः ।
सीरा नः सुतरा भव दीर्घायुत्वाय वर्चसे ॥

तीर्थविशेषनदीतरणेऽयं मंत्रः । गायत्री । अयं वनस्पतिर्वानस्पत्यो रथः नोऽस्मान् मह्याः महत्या नद्याः पारं नैषत् नयतु । स्वस्ति अविनाशं कृत्वा । सीरा च नदी नोऽस्माकं सुतरा भव भवतु । दीर्घायुत्वाय दीर्घायुषे, वर्चसे च अस्माकं सीरा भवतु । दीर्घायुत्वायेत्यत्र त्वपत्योरिति सलोपश्छान्दसः ॥

अश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रतराम सखायः ।
अत्राजहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभिवाजान् ॥

अनेन प्रकृता नदी तीर्यते । हे सखायः जन्याः उत्तिष्ठत, संरभध्वं सप्रयत्ना भवत, प्रतरामो नदीम् । प्रयत्नविशेषेण प्रेषणे हेतुमाह यतोऽश्मन्वती पाषाणसंघट्टवती नदी रीयते

तीर्यते । शेव इति सुखनाम । ये चाशेवा अ-
सुखा असन् संति, तानत्रैव स्थाने आजह्याम
त्यजामः त्यक्त्वा तान्गच्छाम इत्यर्थः । वयं
च शिवान्देशविशेषान् अभिवाजान् वाजाभि-
मुखान् अन्नविशेषयुक्तान् तरेम तीर्त्वा प्राप्नु-
यामेत्याशंसा ॥ १२ ॥

इति षड्विंशी काण्डिका ॥ २६ ॥

अथ

सप्तविंशी काण्डिका ।

शन्न इति नदीं तरति ॥ १ ॥

गतार्थं समन्त्रकम् ॥ १ ॥

य ऋत इति रथाङ्गे विशीर्णे ॥ २ ॥

अविशेषाभिधानाद्यस्मिन्कस्मिंश्चिद्रथाङ्गे विशीर्णे श्लथे रथे य ऋत इत्यादिकामैन्द्रीं बृहतीं जपतीत्यर्थः ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ताविह्रुतं पुनः ॥

हे रथ यस्त्वं जत्रुभ्यो ग्रन्थिभ्यो बन्धनेभ्यः ऋते विना अभिश्रिषः विशीर्णो विनाशं प्राप्तः पुरा पूर्वमेवातृदः आतर्दनादहिंसित एव नष्ट इत्यर्थः, तं त्वा मघवा पुनः निष्कर्ता सन्धिं सन्धीयत इति सन्धिस्तं निःशेषेण पुनः करिष्यतीत्यर्थः । सहि सन्धाता सन्धानशीलः । कीदृशं सन्धीयमानं त्वां करिष्यति । अविह्रुतमकुटिलगतियोग्यम् । कीदृशो मघवा । पुरूवसुः बहुधनः । चिदिति पादपूरणो निपातः ॥

अपराह्णेऽधिवृक्षसूर्ये गृहानुपयायोर्जं बिभ्रतीति गृहान्प्रतिदृश्य जपति ॥३॥

अपराह्णसमयेऽधिवृक्षसूर्ये यदा वृक्षाणामुपर्येव रविरश्मयो दृश्यन्ते नाधस्तात्, तदा गृहानुपयाय, गृहग्रहणेन स्वग्राम उपलक्ष्यते, स्वग्रामसमीपं गत्वा, तत्र स्वगृहान् प्रतिदृश्य आभिमुख्येन दृष्ट्वा ऊर्जं बिभ्रतीत्यादि जपति। वध्वा एष जपो मंत्रलिङ्गात् ॥

ऊर्जं बिभ्रती वसुवनिः सुमेधा गृहानागां मोदमाना सुवर्चाः ।
अघोरेण चक्षुषा मैत्रेण गृहाणां पश्यन्ती वय उत्तिरामि ॥
गृहाणामायुः प्र वयं तिराम गृहा अस्माकं प्रतिरन्त्वायुः ।
गृहानहं सुमनसः प्रपद्ये वीरघ्नी वीरपतिः सुशेवा ॥
इरां वहतो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशामि ।
येषां मध्येऽधिप्रवसन्नेति सौमनसं बहु ॥
गृहानुपह्वयामहे ते नो जानन्तु जानतः ।
सूनृतावन्तः स्वधावन्त इरावन्तो ह सामदाः ॥
अक्षुध्या अतृष्यास्त गृहा मास्मद्बिभेतन ।
उपहूता इह गाव उपहूता अजावयः ॥
अथो अन्नस्य कीलाल उपहूतो गृहेषु मे ।
उपहूता भूरिधनाः सखायः साधुसम्मदाः ॥
अरिष्टाः सर्वपूरुषा गृहा नः सन्तु सर्वदा ।

अहं गृहानागां आगता, ऊर्जं बिभ्रती

अन्नं धारयन्ती पुष्णती च, वसुवनिः 'वन षण संभक्तौ' वसूनि धनानि विभजमाना, सुमेधाः शोभनया प्रज्ञया युक्ता, मोदमाना हृष्यन्ती, सुवर्चाः शोभनदीप्तिः, गृहाणामिति व्यत्ययेन द्वितीयार्थे षष्ठी, अघोरेण सौम्येन, मैत्रेण हितैषिणा चक्षुषा गृहान्पश्यन्ती । वय इति धननाम, धनमुत्तिरामि ददामि परिजनाय । वयमेतेषामायुः प्रतिरामः उपलेपनादिद्वारेण स्थैर्यं सम्पादयामः । गृहा अपि गृहाधिष्ठात्र्यो देवता अस्माकमायुः प्रतिरन्तु सम्पादयन्तु । अहमेतान् गृहान् प्रपद्ये गच्छामि प्रविशामि । कीदृशान् । सुमनसः सौमनस्यकारिणः । वीरघ्नी गत्यर्थोऽत्र हन्तिः, पुत्राणां प्रापिका लम्भिका । वीरपतिः विक्रान्तियुक्तभर्तृका । सुशेवा शेवोऽन्नं धनं च, सुधना । कीदृशान् गृहान् । इरामन्नं वहतः धारयतः । तथा घृतमुक्षमाणा आसिञ्चन्तो बहुगवादिकत्वात् ये गृहास्तानहं सुमनस्का सती प्रविशामि । किंच येषां गृहाणां मध्ये निवसन् बहु सौमनसमेति प्रपद्यते, तान् गृहानुपह्वयामहे आह्वयामः । तेऽस्माञ्जानतो ज्ञानयुक्तान् जानन्तु । गृहा-

धिष्ठातृदेवताप्रसादाच्च वयं सूनृतावन्तः सत्य-वाचः स्याम, तथा स्वधावन्तः पितृयज्ञकारिणः इरावन्तोऽन्नवन्तः, हेत्यनर्थकः, सामदाः स्याम सान्त्वनलक्षणेन प्रथमेनोपायेन स्वीकारकाः स्यामेत्यर्थः। यथोक्तं

'साम दानं च भेदश्च दण्डश्चेति चतुर्विधः।
मायेन्द्रजालोपेक्षाश्च सप्तोपायाः प्रकीर्तिताः॥'

इति। अस्मभ्यमिति तादर्थ्ये चतुर्थी, तेनास्मदर्थं सत्यवचनयुक्ता यूयं भवतेत्यप्यर्थः सम्पद्यते। अस्मभ्यं सामदा भवतेति प्रदाने चतुर्थी अपि योज्या। हे गृहा अस्माभिरधिष्ठिताः सन्तः अस्मत् मा बिभेतन अस्मत्सकाशाद्भयं मा कार्षुः॥ इह च गृहेषु उपहूता आहूता गावस्तथा अजा अवयश्च अथो तथा अन्नस्य संबन्धी कीलालो मृष्टरस आहूतो मम गृहेषु, तथा सखायः सहायाः, भूरिधनाः बहुवित्ताः, आहूतास्ते साधु कृत्वा सम्मदाः सम्यक् हर्षयुक्ताः सर्वदा सन्तु, तथा अरिष्टा अनुपहिंसिता नोऽस्माकं गृहाः सर्वपूरुषाश्च सर्वदा भवन्तु॥ ३॥

इति सप्तविंशी काण्डिका॥ २७॥

अथ

अष्टाविंशी काण्डिका ।

उलपराजीं स्तृणात्याशयनीयात् ॥ १ ॥

उलपो वीरणः, प्रसूना दीर्घदर्भा इति तु प्रसिद्धिहीनं वचो मध्यदेशादौ वीरणानामेव तथा प्रसिद्धेः । ऋत्विक् वीरणपंक्तिं स्तृणाति रचयति रथावतरणस्थानादारभ्य वधूशयन-गृहविशेषं यावत् ॥ १ ॥

तया प्रविशति ॥ २ ॥

तया राज्या प्रविशति गृहं रथादवतीर्य वधूसहितो वरः ॥ २ ॥

अध्याहिताग्निं सोदकं सौषधमावसथं प्रतिपद्यते ॥ ३ ॥

अध्याहितः स्थापितो विवाहाग्निर्यत्र तं, तथा सोदकमुदकुम्भभूषितं, सौषधं व्रीह्याद्यो-षधिसनाथं, आवसथं गृहविशेषं प्रतिपद्यते प्रविशति। अत ऊर्ध्वं हि पाकयज्ञेष्वधिक्रियते ।

वास्तुहोमानन्तरं चैष प्रवेश इष्यते । उक्तं हि सूत्रं 'अमीवहा वास्तोष्पत इति चतसृभिर्वास्तोष्पतीयस्य स्थालीपाकस्येष्ट्वाथ वास्त्वाविशेत्' (१२।१) इति ॥

अमीवहा वास्तोष्पते० ॥

आद्या गायत्री । तिस्रस्त्रिष्टुभः । ब्रह्मण आर्षम् । हे वास्तोष्पते माध्यमिकदेवताविशेष वायुरूप नोऽस्माकं अनमीव एधि, 'अम रोगे' रोगशून्यो भव अस्मान्नीरोगान्कुर्वित्यर्थः । अमीवानं व्याधिं हन्तीति अमीवहा व्याधिप्रध्वंसकारी, अनमीवस्तु रोगप्रागभावस्यैव स्थैर्यहेतुरित्यपौनरुक्त्यम्, तथा सुशेवः सुखसेव्यो भव । किं कुर्वन् । विश्वा रूपाण्याविशन् नानारूपाणि धारयन्, अश्वादीनि नानारूपाणि वा आविशन् प्रवेशयन् समृद्धं गृहं कुर्वन्नित्यर्थः ॥ १ ॥

हे वास्तोष्पते अस्मान् प्रविविक्षून् प्रतिजानीहि, आभिमुख्येनानुकूल्येन पश्य, ततश्च स्वावेशः सुप्रवेशो रोगरहितोऽस्माकं भव । यत्

त्वा ईमहे याचामहे, तन्नः प्रतिजुषस्व तेन याचितेनास्मान् प्रीणीहीत्यर्थः । तस्मादस्माकं द्विपदे मानुषरूपे, चतुष्पदे गवादिके शं भव सुखरूपो भव ॥ २ ॥

हे वास्तोष्पते अस्माकं प्रतरणो भव दुर्गमस्थानेभ्योऽस्मान् प्रतारयेत्यर्थः । हे इन्दो माध्यमिकत्वसामान्यात् चन्द्र अस्माकं गोभिरश्वैश्च गये गृहे स्फानः स्फीतो भव । तेन तव सख्ये वर्तमाना वयं अजरासः अजीर्णाः स्याम । त्वं चास्मान् प्रतिजुषस्व प्रीणीहि । क इव कान् । पितेव पुत्रान् ॥ ३ ॥

हे वास्तोष्पते ते तव सम्बन्धिन्या संसदा वेगादिसंपदा शग्मया सुखरूपया वयं सक्षीम संगच्छेम । हिरण्वया सुवर्णादिकया, गातुमत्या यज्ञादिकर्मवत्या यज्ञाद्युपयोगिन्येत्यर्थः । वरमुत्कृष्टं कृत्वा नोऽस्मान् अलब्धलाभात्मके योगे, प्राप्तपरिरक्षणात्मके च क्षेमे वर्तमानः पाहि रक्ष । यूयं त्वं व्यत्ययेन पात पाहि स्वस्तिभिरविनाशैः सर्वकालम् ॥ ४ ॥

रोहिण्या मूलेन वा यद्वा पुण्योक्तमपरेणाग्निमानडुहे रोहिते चर्मण्युपवेश्यापिवा दर्भेष्वेव जयप्रभृतिभिर्हुत्वाग्निरैतु प्रथम इति च ॥ ४ ॥

रोहिण्या मूलेन वा नक्षत्रेण युक्ते चन्द्रमसीति ज्ञेयम् । यद्वा पुण्योक्तं ज्योतिःशास्त्रे पुण्यरूपं श्रेयस्करं यद्दिनमुक्तं, तत्र वा । अपरेणाग्निं प्रकृतत्वादावसथ्यम्, अनडुह इदमानडुहं वार्षभं तत्र, रोहिते चर्मण्युपवेश्य वधूं वरः स्वयं चोपविश्य, केवलेषु वा दर्भेषु वधूमुपवेश्य स्वयं चोपविश्य जयहोमप्रभृतिकमाज्यभागान्तमाज्यसाधनत्वादर्थादाज्यधर्मयुक्तमुपसमाधानादिपूर्वकं हुत्वा, अग्निरैतु प्रथम इत्यादिभिश्च कर्मान्तराणि कुर्यात् । कानि तानि । पाकयज्ञा अर्थात् ॥

अग्निरैतु प्रथमो देवतानां सोऽस्याः प्रजां नयतु सर्वमायुः । तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं निरुन्ध्यात्स्वाहा ॥ १ ॥

अग्निरैतु इति वैश्वदेव्यश्चतस्त्रस्त्रिष्टुभः । वि-

श्वेषु देवेष्वागच्छत्सु सर्वदेवतानां प्रथमोऽग्रेऽग्निरा एतु एतु आगच्छतु । सोऽग्निः सर्वदेवपुरःसरोऽस्या वध्वाः प्रजां नयतु प्रापयतु, तां च प्रजां सर्वमायुः नयतु प्रापयतु । द्विकर्मकः अजां नयति ग्राममितिवत् । तच्चायुरग्निना प्राप्यमाणं वरुणो राजानुमन्यतां तत्रानुमतिं ददात्वेवमस्त्विति । राजग्रहणं तेनानुमतेन तदनुचरत्वात्सर्वे देवा अनुमन्यन्ते इत्याशयेन । यथाच इयं स्त्री वधूः पुत्रस्येदं पौत्रमघं पापं निरुन्ध्यात् पुत्रशोकं नानुभवेत्तथा तेन प्रकारेण वरुणो राजा अनुमन्यताम् ॥ १ ॥

अग्निरिमां त्रायतां गार्हपत्यः सोऽस्याः प्रजां मुञ्चतु मृत्युपाशात् । अरिक्तोपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा ॥ २ ॥

इमां वधूमग्निरावसथ्यस्त्रायतां रक्षतु । इयं वधूररिक्तोपस्था अस्तु उपस्थ उत्सङ्गो बालकसुतैः क्रमेण जायमानैरस्या उत्सङ्गोऽरिक्तोऽशून्योऽस्त्वित्यर्थः । तथेयं जीवतां चिरायुषां पुत्राणां माता भवतु । पुत्राणामयं पौत्रस्तं चानन्दं सुखमियमाभिमुख्येन विशेषेण बुध्यताम् ॥२॥

मा ते गृहे निशि घोर उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु। जीवपुत्रा पतिलोके विराज पश्यन्ती प्रजां सुमनस्यमानां स्वाहा ॥ ३ ॥

हे वधु ते तव गृहे निशि दिवा घोरो रोदनादिशब्दो मा उत्थात् रोदनादिशब्दो दुष्टस्त्वद्गृहे मा भूत्कदाचिदित्यर्थः। रुदत्यो रोदनं कुर्वत्यस्त्वत्तव सकाशादन्यत्र संविशन्तु अन्यत्र तव दूरवर्तिनि देशे तिष्ठन्त्वित्यर्थः। त्वं पतिलोके पतिकुले विशेषेण राज शोभस्व जीवपुत्रा दीर्घायुर्बहुपुत्रा सती, तथा सुमनस्यमानां सुखिनीं प्रजां पुत्रादिकां पश्यन्ती सती ॥ ३ ॥

मा ते कुमारः स्तनधः प्रमायि मा त्वं विकेश्युर आवधिष्ठाः। स्तनन्धयं ते सविताभिरक्षत्वा वाससः परिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षन्तु नित्यं स्वाहा ॥ ४ ॥

तव कुमारो बालकः स्तनन्धयः स्तनपः मा प्रमायि मा मृत। मा च त्वं विकेशी मुण्डा सती उरो वक्ष आवधिष्ठाः भर्तृविरहकृतमुरस्ताडनं तव मा भूदित्यर्थः। तव स्तनन्धयं सविता अभिरक्षतु बृहस्पतिश्च अभिरक्षतु आ वाससः परि-

धानात् परिधानवस्त्रपर्यन्तं यावत् रक्षतु, विश्वे देवाश्च नित्यमभिरक्षन्तु ॥ ४ ॥

एताभिश्चतसृभिर्ऋग्भिश्चतस्र आहुतयो दातव्या वरेण स्वयमेवमुत्तरा अपि । अग्ने प्रायश्चित्त इत्यादिभिर्यजुर्भिरन्या दश आज्याहुतयः क्रमापक्रमाभ्याम् ॥

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ।
यास्यां भृशा तनूस्तामस्या नाशय स्वाहा ॥

प्रायश्चित्तं पापनिवारणं धर्मजननं च कर्मोच्यते । तत्कारणत्वादग्निः प्रायश्चित्तिः । हे अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिर्दोषापसारे शुभजनने च निमित्तमतोऽस्यां वध्वां या भृशा अपवित्रा अतिशयेन बीजवशेन बालभावकृतकुचेष्टावशेन च तनूस्तामस्या वध्वा नाशय तद्गतमशुभं नाशय । वरस्य हि गार्भबैजिकदोषा जातकर्मादिभिर्नाशिताः, वध्वास्तु तानि प्रायेण न कृतानि

'गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानां प्रतिहन्यते ॥' (मनुः २।२७)

इति स्मृतेः । एनः पापमशुद्धिः ॥

वायो प्रायश्चित्ते० । सूर्य प्रायश्चित्ते० । चन्द्र प्रायश्चित्ते० । विष्णो प्रायश्चित्ते० । विष्णो प्रायश्चित्ते० । चन्द्र प्रायश्चित्ते० । सूर्य प्रायश्चित्ते० । वायो प्रायश्चित्ते० । अग्ने प्रायश्चित्ते० ॥

एतानि सानुषङ्गाणि पराणि पञ्च यजूंषि अपक्रमेण । तेनग्निभिश्चतसृभिश्चतस्रो, यजुर्भिश्च दशभिर्दशेति चतुर्दशाहुतयः संपन्नाः, त्र्यायुषमित्यनेन पंचदशी,—इत्यादित्यदर्शनः । स आज्यैकदेशो योऽनेन यजुषा वक्ष्यमाण आसेकस्तामेवाहुतिं मन्यते मन्त्रावृत्तिं वा ॥ ४ ॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषमित्याज्यस्यैकदेशे दध्यासिच्य दधिक्राव्ण इति त्रिर्दधि भक्षयित्वा माणवकायोत्सङ्ग इरामग्न इति फलानि प्रददाति ॥ ५ ॥

स्वयंकर्तृकत्वादासां स्रुवेण पूर्वोक्ता घृताहुतीर्हुत्वा त्र्यायुषमित्यादियजुषा पृथक्पात्रोद्धृते घृते घृतैकदेशे दध्यासिच्य 'दधिक्राव्णः' इत्यनया त्रीन्वारान् वधूं दधि भक्षयित्वा वरो माणवकाय बध्वा उत्सङ्गे निहिताय फलानि

प्रददाति 'इराममे' इति मन्त्रेण। मणिभिर्मन्त्रै-
रोषधिभिस्त्रिभिरुपायैः साध्यमानत्वात् त्र्यायुषं
बालयुववृद्धावस्थात्रयभावित्वात् यागदानहो-
मसाध्यत्वात्तदारम्भकत्वाद्वा त्र्यायुषं यत् जम-
दग्नेः त्र्यायुषं, यच्च कश्यपस्य, यच्च देवानां,
तत्सर्वमस्त्विति वर आशास्ते ॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥

आग्नेयी। अनुष्टुप्। इन्द्रस्यार्षम्। दधि क्राम-
तीति दधिक्रावा 'अन्येभ्योऽपि दृश्यते'(३।२।७५)
इति क्वनिप्। अग्निर्वैश्वानर उच्यते। सहि सर्वं
भक्षितं जरयति जठरे स्थितो दध्यादिकम्। तस्य
दधिक्राव्णोऽग्नेर्जाठरस्याहमकारिषं करोमि स-
न्तर्पणमर्थात्। कीदृशस्य। जिष्णोर्जयनशीलस्य,
अश्वस्य अशनस्य व्यापिनो वा, वाजिनोऽन्नपतेः।
नोऽस्माकं सुरभि सुगन्धि विद्याद्युद्गारभूषित-
मर्थान्मुखं दधि भक्ष्यमाणमाकरत् करोतु। लो-
डर्थे लेट्। नोऽस्माकमायूंषि प्रतारिषत् प्रतरतु
दधातु। पूर्ववत् पंचमो लकारः। इराममग्न
इतीयं व्याख्याता ॥ ५ ॥

इत्यष्टाविंशी काण्डिका ॥ २८ ॥

अथ

एकोनत्रिंशी काण्डिका ।

तूष्णीमुपचरितं स्थालीपाकं श्रपयित्वा तस्याग्निमिष्ट्वा प्रजापतिं च शेषं प्राश्नीतः । अन्नमेव विवननमन्नं संवननं स्मृतम् । अन्नं पशूनां प्राणोऽन्नं ज्येष्ठं भिषक् स्मृतम् ॥ अन्नमयेन मणिना प्राणसूत्रेण पृश्निना । सिनोमि सत्यग्रन्थिना हृदयं च मनश्च ते ॥ सह वाचा मनो अस्तु सह चित्तं सह व्रतम् । चक्रमिवानडुहः पदं मामेवान्वेतु ते मनः॥ मां चैव पश्य सूर्यं च मा चान्येषु मनः कृथाः । चाक्रवाकं संवननं मम चामुष्याश्च भूयादिति ॥ १ ॥

तूष्णीमेव यत्रोपचारो निर्वापादिस्तं चरुं स्वरससिद्धत्वादुदकेन श्रपयित्वा तस्यांशेनाग्निं प्रजापतिं चेष्ट्वा नाम्नैव तूष्णींग्रहणात् हुतशेषं

प्राश्नीतः वधूवरावेकत्र पात्रे सह । गृह्यान्तरेषु हि समशनमिति संज्ञा । सहाशनं च समशनमिति प्रसिद्धम् । संवननमिति च मन्त्रलिङ्गम् । अन्ये त्वत्रापि चैकपात्रे न सह भोजनमिच्छन्ति । यथाहि यजमानपञ्चमा इडां प्राश्नन्ति सपत्नीका भुञ्जत इत्यतः पञ्चसंख्यासहश्रवणेऽपि इळाया गृहमेधीययोः पृथगेवाशनं, तद्वदिहापि भवितव्यम् । पाकयज्ञप्रतिषेधार्थं पुनस्तूष्णीमुपचरितग्रहणम् । उक्तं ह्येतत् 'तेष्वावृदुपचारस्तूष्णीम्' (१३।७) इति । भक्षणं तु अन्नमेव विवननमित्यादिभिश्चतसृभिरनुष्टुब्भिः, मन्त्रोच्चारणं चरुकर्मकम् ॥

'वन षण संभक्तौ' अन्नमेव विवननं विभजनं, अन्नमेव संवननं स्मृतं सह भुज्यमानं संश्लेषणमित्यर्थः । अन्नं पशूनां प्राणः तेन हि जीवन्ति । अन्नमेव ज्येष्ठं प्रशस्ततमं भिषग्भेषजं स्मृतम् । तेन हि बुभुक्षादिकृता व्याधयो निवर्त्यन्ते ॥

वरो ब्रूते हे वधु तवाहं हृदयं च मनश्च सिनोमि 'षिञ् बन्धने' बध्नामि । मननं मनो ज्ञानं मन्यतेऽनेन मनः बाह्येन्द्रियपञ्चकं, हृदयं

चित्तम्। केन। सत्यग्रन्थिना सत्यं निर्व्याजचरितमेव ग्रन्थिस्तेन, पृश्निना शुक्लेन शुचिना धर्मरूपेणेत्यर्थः। अन्नं मणिरिव, प्राणः सूत्रमिव हाराद्यलंकाररूपमेतत्॥

हे वधु तव च मम च वाचा सह मनोऽस्तु यादृशं वचनं तादृशं निर्व्याजं चित्तमस्तु, नतु दौर्जन्येनान्यच्चेतसि अन्यद्वाचि। एवमावयोश्चित्तं चैतन्यं समानमस्तु, व्रतं च सफलं विहितं कर्म। तव मनो मामेवान्वेतु चक्रमिवानडुहः पदं यथा शकटचक्रं शकटकर्षकस्य वृषभस्य पदमनुगच्छति॥

मामेव सूर्यमेव च पश्य। अन्येषु पुरुषेषु मनो मा कृथाः। मम चामुष्याश्च वध्वाश्चाक्रवाकमिव संवननं भूयात्। यथा चक्रवाकपक्षिमिथुनं यथाप्राप्तमतिस्नेहात् वृष्ट्यादिकं संविभज्य भुंक्ते तद्वदावां, तद्वदतिप्रीतिरावयोरस्त्वित्यर्थः॥ १॥

इति श्रीजालन्धरीयभट्टोपेन्द्रसूनुहरिपालपुत्रदेवपालविरचिते समन्त्रचारायणीयगृह्यभाष्ये विवाहः परिपूर्णः॥

इत्येकोनत्रिंशी काण्डिका॥ २९॥

अथ

त्रिंशी काण्डिका ।

अथ गर्भाधानम्

संवत्सरं ब्रह्मचर्यं चरतो द्वादश रात्रीः षट् तिस्र एकां वा ॥ १ ॥

ब्रह्मचर्यममैथुनं चरित्वा गर्भाधानं कार्यमिति । तत्पूर्णिमायाममावस्यायां न मैथुनं कर्तव्यमिति च संकल्पः । एकैककर्तृकमत्र व्रतम् । संवत्सरं प्रथमः कल्पः । यौवनमदस्यातिशयात्त्वनुकल्पेनापत्कल्पो विकल्पः—द्वादश रात्रीः षट् तिस्र एकां वेति ॥ १ ॥

तौ संविशतः ॥ २ ॥

तौ वधूवरावेकस्मिन् शयने भवतः । विवाहोत्तरकालप्रथमशयने आधाने च समानमेतद्विधानमनन्तरमन्त्रचतुष्टयजपसहितम् ॥ २ ॥

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् । इह प्रजामिह रयिं रराणः प्रजायस्व प्रजया पुत्रकाम ॥ अप-

इयं त्वा मनसा दीध्यानां स्वायां तनू ऋद्ध्यै नाधमानाम् । उप मामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे ॥ प्रजापते तन्वं मे जुषस्व त्वष्टर्देवेभिः सहसा न इन्द्रः । विश्वैर्देवैर्यज्ञियैः संविदानः पुंसां बहूनां मातरः स्याम ॥ अहं गर्भमादधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः । अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अवरीषु पुत्रानिति स्त्र्यादिव्यत्यासं जपतः ॥ ३ ॥

एतास्त्रिष्टुभः प्रथमसंवेशने गर्भाधाने च वधूवरौ जपतः स्त्र्यादिव्यत्यासं कृत्वा, प्रथमां स्त्री, द्वितीयां वरः, तृतीयां स्त्री, चतुर्थीं वरः । व्यत्यासो विपर्ययः । पुरुषो हि प्रधानम् । तस्य पूर्वं क्रियायोगोऽन्यत्र, इह तु विपर्ययः । स्त्री आदिर्यत्र व्यत्यासे, स स्त्र्यादिव्यत्यासः ॥

वधूर्वदति–हे पुत्रकाम त्वामहमपश्यं प-

श्यामि, चेकितानं देदीप्यमानं ब्रह्मवर्चसा-
दिना अतिशयेन दीप्तिमन्तम् । केन पश्यामि ।
मनसा, नतु चक्षुषा । कीदृशम् । तपसो जातं
तप इति प्रजापतेः सत्कर्मणश्च नाम, प्रजा-
पतेर्ब्रह्मणः सकाशाज्जातं, तपसश्चाविर्भूतं वृद्धिं
गतम् । इह प्रजां मयि पुत्ररूपां रयिं च धनं
रराण आददत् प्रजया प्रजायस्व प्रजामुत्पा-
दयेत्यर्थः ॥ १ ॥

वर आह—पश्यामि त्वां हे पुत्रकामे दी-
ध्यानां दीप्तिमतीं मनसा । कीदृशीम् । नाध-
मानां 'नाधृ नाथृ याञ्चोपतापैश्वर्याशीःषु' प्रजां
याचमानाम् । कुत्र । स्वायां तनू स्वस्यां तन्वाम् ।
किमर्थम् । ऋद्धौ समृद्धौ लोकद्वयाभ्युदयाय ।
मामुप मम समीपे वर्तमाना त्वमुच्चा महती
पूज्यतमा सत्पुत्रादियोगात् युवतिस्तरुणी सती
बभूयाः अतिशयेन भूयाः । प्रजया प्रजायस्व
आत्मा वै पुत्रनामेति वचनात् प्रजारूपेण प्रजा-
यस्व पुत्रवती भव ॥ २ ॥

वधूराह भर्तरि प्रजापतित्वमध्यारोप्य—हे
प्रजापते मम तन्वं तनूं शरीरं जुषस्व । हे त्वष्टः

हे प्रजापते त्वं इन्द्रः सन् सहसा बलेन देवै-र्विश्वैश्च देवैरनुपतितः सन् नोऽस्माकं संविदानः सम्यक् जानानः। यज्ञियैर्यज्ञार्हैरिति देवविशेषणम्। वयं च बहूनां पुंसां पुत्राणां मातरो निर्मात्र्यः स्याम ॥ ३ ॥

वर आह—ओषधीषु फलपाकान्तासु अहमेव गर्भं फलजननसामर्थ्यमादधामादधे। जीवात्मनां परमात्मनो भेदाभावादेवमभिधानम्। अत एवाह विश्वेषु सर्वेषु भूतेषु अहमेवान्तस्तिष्ठामि अन्तर्यामितया, पृथिव्यामहमेव प्रजामनवद्यामजनयं जनयिष्यामि च। अहमेव जनिभ्यो जननीनां स्त्रीणामवरीषु जठराभ्यन्तरवर्तिनीषु गर्भग्रहणीषु पुत्रान् जनयामि बीजमादधामि ॥ ४ ॥

एवमेवर्तौ प्रजाकामौ संविशतः ॥४॥

गतार्थम् ॥ ४ ॥

करदिति भसदमभिमृशति ॥ ५ ॥

करदिति यजुषा भसदं स्त्रीचिह्नं वरोऽभिमृशति। करत् कुर्वाणं प्रजां, भवेत्यर्थः ॥ ५ ॥

भसदित्युपरि जननम् ॥ ६ ॥

पुंचिह्नं भसदिति यजुषा अभिमृशति स्त्री । हे पुंजनन त्वं भसद्दीप्यमानं सत्कार्यजनन-समर्थं भवेत्यर्थः ॥ ६ ॥

बृहदिति जातम् ॥ ७ ॥

बृहदित्यनेन जातं वीर्यं प्रक्षिपति । बृहद्वि-स्तीर्णं पुत्रजननसमर्थं भवेत्यर्थः ॥ ७ ॥

इति त्रिंशी काण्डिका ॥ ३० ॥

अथ

एकत्रिंशी काण्डिका ।

अथ सीमन्तः

तृतीये गर्भमासे सीमन्तं कारयते शुद्धपक्षस्य पुण्याहे पर्वणि वा यथोक्त-मुपसमाधाय जयप्रभृतिभिर्हुत्वा पश्चा-दग्नेर्दर्भेषु प्राङासीनायाः सर्वान्केशान्सं-प्रमुच्य प्रसाधयते ॥ १ ॥

गर्भग्रहणादारभ्य यस्तृतीयो मासस्तत्र शुक्लपक्षस्य पर्वणि मुख्ये दिने सीमन्तोन्नयनसंज्ञया यौगिक्या प्रसिद्धं यत्संस्कारकर्म, तत्कारयते, नतु विद्वानपि स्वयं कुर्यादिति णिचः प्रयोगात् दर्शितम्। एतच्च पात्रस्यैव केचित्संस्कारमिच्छन्ति आधारसंस्कारादेव गर्भस्योपकारो भविष्यति गोलकसंस्कारेणेव चक्षुष इति वदन्तः। तथाच स्मृतिः

'सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥'

इति। अन्ये तु गर्भस्यैव संस्कारं मन्यन्ते तत्रैव तृतीये गर्भमास इत्यस्योपपत्तेः। पात्रमात्रसंस्कारत्वे हि किं गर्भमासव्यपेक्षया, यदा कदाचित्सीमन्तो विधीयते, कार्यः सीमन्त इति। स्मृतेरपि

'गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानां प्रतिहन्यते ॥'

(मनु० २।२७)

इति। अपरे तूभयसंस्कारमाहुः। तत्र क्षेत्रसंस्कार एवानुमततमप्रायो वेदार्थविदां सकृदनु-

ष्ठानस्य प्रसिद्धत्वाद्बाहुल्येन । यथोक्तमुपसमाधानं कृत्वा जयप्रभृतिभिराज्यभागान्तं हुत्वा, प्रकृतस्य आवसथ्यस्य अग्नेः पश्चाद्भागे अग्नेर्दर्भेषु प्राङ्मुख्या उपविष्टायाः सर्वान् केशान् सम्यक् प्रकर्षेण मुक्तान् कृत्वा, कङ्कतेन दारुमयोभयदिक्कभूरितरदन्तयोगिना वालस्पष्टीकरणेन प्रसाधयते स्पष्टीकरोति वक्ष्यमाणाभिस्तिसृभिर्ऋग्भिः ॥ १ ॥

यं सीमन्तं कङ्कतस्ते चकार यद्वा क्षुरः परीववर्ज वपंस्ते । स्त्रीषु रूपमश्विनौ तन्निधत्तं पौंस्येनेमं संसृजतं वीर्येण ॥ इन्द्राणी चक्रे कङ्कतं स सीमन्तं विसर्पतु । पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥ पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतमिति ॥ २ ॥

इतिशब्दः करणप्रधानः । अनेन मन्त्रत्रयेण केशान् प्रसाधयते इति पूर्वेण संबन्धः ॥ यं

सीमन्तं ते तव कङ्कतश्चकार कृतवान्, क्षुरो वा यं चकार सीमन्तं, क्षुर इव तीक्ष्णत्वात्कङ्कत इति व्याचक्षते विवाहादूर्ध्वं क्षुरसंसर्गस्य स्त्रीष्वमाङ्गलिकत्वात् । दृष्टश्चोपमायां वाशब्दः 'समुद्रो वा महासत्त्वः' इत्यादौ निपातानामनेकार्थत्वात् । यत् वपन् केशान्स्पष्टीकुर्वन् कङ्कतस्ते तव परीववर्ज वर्जितवान् वालानां शिरोविदारणभयात्, तद्रूपं सीमन्ताख्यसंस्कारयुक्तत्वात्स्त्रीषु हे अश्विनौ निधत्तं कुरुतं, तथैव तद्रूपं पौंस्नेन वीर्येण संसृजतमश्विनौ ॥ १ ॥

अमुं कङ्कतमिन्द्राणी शची चक्रे कृतवती । अतोऽयमुत्कृष्टत्वात्कङ्कतः सीमन्तं विसर्पतु चिनोतु संपादयत्वित्यर्थः । हे अग्ने इयं पत्नी त्वया विवाहसमये दत्ता, इदानीं पुनः प्रजया सह पतिभ्यः एतां जायां दाः देहि पुत्रवतीं सम्पादयेत्यर्थः ॥ २ ॥

अग्निरिमां पत्नीं पुनरदात् ददौ आयुषा वर्चसा च सह । अस्या यः पतिर्भर्ता स दीर्घा-

युरस्तु। जीवाति शरदः शतं, जीवातीति लोडर्थे लट्, शरदां शतं जीवतु वर्षशतं जीवतादित्यर्थः ॥ २ ॥

त्रिः श्वेतया शलल्या शमीशाखया सपलाशया वा सीमन्तं विचिनोति यास्ते राक इति ॥ ३ ॥

त्रीन्वारान् त्रिः, श्वेतया शुक्लया, शलल्या शललिः श्वावित्सेधा, तस्याः शलाका शललिरुपचारात् तया, शमीशाखया सपलाशया सपत्रया सीमन्तं विचिनोति 'यास्ते राके' इति त्रिष्टुभा। शलल्या ताम्रशलाकया श्वेतयालोहितयेति यद्व्याचक्षते, तन्न दृष्टानुरूपम्॥

यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥

ब्रह्मण आर्षम् । हे राके देवपुत्रि यास्तव शोभना मतयः, सुपेशसः सुरूपा अभिमतफलदानोन्मुखत्वं मतीनां सुरूपत्वं, याभिः सुमतिभिर्दाशुषे दात्रे यजमानाय वसूनि धनानि ददासि, ताभिरुपलक्षिता सत्यद्यास्मिन्नहनि नोऽस्मानुपागहि उपागच्छ, सुमनाः

यथादैवतं जुहोति 'अग्निस्तुविश्रवस्तमम्' 'इन्द्र क्षत्रं' 'प्र तद्विष्णुः' 'पुमान्' इत्यभिजुहोति ॥ २ ॥

'दशमे मासि सूतवे' इति श्रुतेः, दर्शनाच्च दश गर्भमासाः । तत्र पञ्च अर्धभागः, षड् भूयांसः, सप्त भूयिष्ठाः । भूयिष्ठः सप्तमो गतो येषु, तेषु गर्भमासेषु सत्सु, अष्टमे मासि शिष्टाचारात् । त्रीन् स्थालीपाकान् श्रपयेत् आग्नेयमैन्द्रं वैष्णवं च । तेषां मध्यादन्यतममन्यतमं गृहीत्वा यथादैवतं जुहोति । यत्रैकः स्थालीपाकस्तत्र देवताभेदेऽपि एकं कर्म द्रव्यदेवतासंयोगस्यैक्यात् । इह तूभयभेदात् संयोगभेदेन कर्मबहुलत्वम् । अग्निस्तुवीत्यादिना अग्निं जुहोति, इन्द्र क्षत्रमित्यादिना इन्द्रम्, प्र तद्विष्णुरित्यादिना विष्णुम्, पुमानित्यादिनैकैकस्माद्भागमुद्धृत्य स्विष्टकृतं जुहोति ॥

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् । अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥ १ ॥

अग्निर्दाशुषे हविर्दत्तवते यजमानाय पुत्रं

ददाति । कीदृशम् । तुविश्रवस्तमं तुविशब्दो भूरिनामसु पठितः, श्रवःशब्दोऽन्नवचनो यशोवचनो वा, बह्वन्नतमं बहुयशस्कतमं वा, तुविब्रह्माणं ब्रह्मशब्दो वेदवचनोऽत्र बहुवेदविदमित्यर्थः, तथोत्कृष्टं सर्वातिशायिनं, अतूर्तं त्वरारहितं अतरलं स्फीतमिति यावत् , श्रावयतां पतिं ऋत्विजां पतिं यज्वानमित्यर्थः ॥१॥

इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥ २ ॥

हे इन्द्र त्वं क्षत्रमभि क्षतत्राणं प्रत्यजायथाः जातः । ओज इति अस्य विशेषणम् । क्षात्रमोजो बलं च लक्षणीकृत्य त्वं जात इत्यर्थः । वामं वननीयं संविभागार्हम् । हे वृषभ वर्षक । केषाम् । चर्षणीनां मनुष्याणां देवा अपीह मनुष्याः । अमित्रयन्तममित्रमिवाचरन्तं जनमसुरलोकं त्वमपानुदः अपसारितवानसि । कीदृशं जनम् । उरुं विस्तीर्णम् । अपानुद्यं च तं देवेभ्यो देवार्थं देवानां वा सुब्व्यत्ययेन लोकं कृतवानसि ॥ २ ॥

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षयन्ति भुवनानि विश्वा ॥ ३ ॥

व्याख्यास्यते ॥ ३ ॥

पुमानग्निः पुमानिन्द्रः पुमान्विष्णुरजायत । पुमांसं जनयेत्पुत्रं दशमे मासि सूतवे ॥ येन जातेन विभुना जीवेम शरदः शतं पश्येम शरदः शतमिति तं नो मंहस्व शतिनं सहस्रिणं गोसनिमश्वसनिं वीरम् ॥

आभ्यामृग्यजुषाभ्यां स्विष्टकृत्क्रियते। अग्न्यादयः पुमांसं पौरुषातिशययुक्तं पुत्रं जनयेयुर्यतस्त एव त्रिलोक्यां पुमांसः पौरुषातिशययुक्ता अजायन्त जाताः। दशमे मासि सूतवे सोतुं तुमर्थे तवेङ्प्रत्ययः। येन जातेन सता विभुना प्रभुणा वयं शरदः शतं जीवेम पश्येम च, तं पुत्रं नोऽस्माकं मंहस्व वर्धयस्व, शतिनं सहस्रिणं शतसहस्रादिधनयुक्तं, गोसनिं गवां संविभक्तारमेवमश्वसनिं वीरं पुत्रं विक्रान्तं वा विक्रमयुक्तम् ॥ २ ॥

इति द्वात्रिंशी काण्डिका ॥ ३२ ॥

अथ

त्रयस्त्रिंशी काण्डिका ।

अथ सोष्यन्तीसवनम् ॥ १ ॥

अनन्तरं सोष्यन्तीसवनं नाम दृष्टार्थं कर्मोच्यते । यौगिकीयं संज्ञा । सूयतेऽनेनेति सवनं सुखप्रसवं कर्म । सोष्यमाणाया आसन्नप्रसवायाः सवनं सोष्यन्तीसवनम् ॥ १ ॥

विजनिष्यमाणाया अद्भिः पाणिं स्रवन्तं शिरस्याधाया हृदयादभिमृशेत् ॥२॥

विजनिष्यमाणाया आसन्नप्रसवायाः अद्भिः स्रवन्तं पाणिं शिरस्याधाय हृदयं यावदभिमृशेत् । भर्ता अत्र कर्ता, तदसन्निधावाप्तः कश्चिद्देवरादिः ॥ २ ॥

मन्त्रमाह

यथायं वातः पवते यथा समुद्र एजति । एवं ते गर्भ एजतु सह जरायुणावपद्यतामिति । क्षिप्रमेव प्रजायते ॥३॥

अनेन मन्त्रेणाभिमृशेत्। तथा सति क्षिप्रमेव सुखेन प्रसूयते इति दृष्टार्थतामस्य कर्मण आह ॥ यथा प्रत्यक्षो वायुरयं वेगवाही पवते धावति, यथावा समुद्र एजति कम्पते, एवं ते तव गर्भ एजतु तूर्णं प्रजायतां, जरायुणा गर्भाशयेन सह अवपद्यतां निर्गच्छतु ॥३॥

इति त्रयस्त्रिंशी काण्डिका ॥ ३३ ॥

अथ

चतुस्त्रिंशी काण्डिका।

अथ नामकर्म

पुत्रे जाते नाम धीयते ॥ १ ॥

पुत्रे जाते जातकर्म कृत्वा नाभिवर्धनादनन्तरं नाम धीयते संकल्प्यते—इदं नाम करिष्यते इति केचिद्व्याकुर्वते, नामकरणं हि 'एकादश्यां नाम कुर्वीत पुण्ये वाहनि' इत्यशौचशुद्धौ स्मृतम्। अन्ये त्वाहुः—जाते सति एकादशं तदन-

न्तरं वा सुलग्नं नामकर्मणि नातिक्रामेदित्येवं-परमेतदिति । वयं तु तत्त्वमदूरे वक्ष्यामः ॥ १ ॥

घोषवदाद्यन्तरन्तस्थं चतुरक्षरम् ॥ २ ॥

नाम्न आदौ घोषवदक्षरं कर्तव्यम्, मध्ये चान्तस्थसंज्ञकम्, चत्वार्यक्षराणि यत्र तत् । अक्षराणि अचोऽत्र हलामनवधारणात् ॥ २ ॥

यथोपपत्ति वा ॥ ३ ॥

यथावा देवताप्रसादलब्धत्वाद्यनुसारेण तदुपपद्यते, तथा कर्तव्यम् ॥ ३ ॥

अग्निमत्रानीय तस्मिन्नाज्यभागान्तं हुत्वा सहिरण्ये कांस्ये संपातानवनयेत् 'हिरण्यगर्भः' 'संवत्सरस्य प्रतिमां' 'काय स्वाहा, कस्मै स्वाहा, कतमस्मै स्वाहा, प्रजापतये स्वाहा' प्रजापते नहि त्वदिति च द्वाभ्याम् ॥ ४ ॥

यत्र गृहे प्रसवस्तत्र लौकिकमग्निमाहृत्य तत्रैवाज्यभागान्तान् होमान् कृत्वा हिरण्ययुक्ते कांस्यपात्रे संपातान् हुतशेषबिन्दूनवनयेत् स्वा-

वयेत् हिरण्यगर्भ इत्यष्टाभिराहुतिभिः। हिरण्यगर्भ इत्येकाहुतिः। संवत्सरस्य प्रतिमामिति द्वितीया। काय स्वाहा, कस्मै स्वाहा, कतमस्मै स्वाहा, प्रजापतये स्वाहेति चतस्रः। प्रजापते नहि त्वदिति द्वाभ्यां द्वे। एवमष्टौ भवन्ति। केचित् प्रधानकर्मत्वाच्चतुर्गृहीतेनैव होम इत्याहुः॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

एषा विवाहकाण्डे विवृता॥

संवत्सरस्य प्रतिमां ये त्वा रात्र्युपासते।
तेषामायुष्मतीं प्रजां रायस्पोषेण संसृज॥

हे रात्रि त्वं संवत्सरस्य प्रतिमा निर्मात्री, त्वां ये जनाः उपासते, तेषां प्रजामायुष्मतीं कुरु रायस्पोषेण धनपुष्ट्या संसृज संयोजय॥

काय स्वाहा॥

काय प्रजापतये सुहुतमस्तु।

कस्मै स्वाहा। कतमस्मै स्वाहा। प्रजापतये स्वाहा॥

कप्रभृतीनि चत्वारि प्रजापतिनामानि॥

प्रजापते नहि त्वदन्य एता विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु स्वाहा॥

विराट् । हे प्रजापते त्वदन्यो नास्ति य एतानि विश्वानि सर्वाणि जातानि जन्मवन्ति भूतानि परिबभूव परिभूतवान् वशीकरोति व्याप्नोतीति यावत् । एता एतानि, विश्वा विश्वानि 'शेश्छन्दसि बहुलम्' (६।१।७०) इति शेर्लुक् । परितेत्यत्र त इति वर्णागमः । यत्फलं कामयमाना जुहुमस्तन्नोऽस्तु ॥

असा अमुष्य पुत्रोऽमुष्यासौ पुत्रः । वयं स्याम पतयो रयीणां स्वाहा ॥

असा अमुष्य चेति नामविशेषनिर्देशः । असौ विष्णुमित्रोऽमुष्य यज्ञमित्रस्य पुत्र इति पितापुत्रयोर्द्विर्नामोच्चारणं षष्ठ्यन्तस्य पितृनाम्नो मध्ये, पुत्रनाम्न आद्यन्तयोः । वयं रयीणां धनानां पतयः स्वामिनः स्याम सम्पद्येमहे ॥

अग्नेरायुरसीति हिरण्येन मुखं मेध्यं कृत्वा पाणिना मुखमद्भिः संस्पृश्य प्रक्षाल्य स्तनाननुमन्त्रयते मधु वात ऋतायत इति तिसृभिः प्रत्यृचमुभावुत्तमया ॥५॥

अग्नेरायुरसीत्यादिना मन्त्रेण हिरण्येन मुखं

मेध्यं पवित्रं कृत्वा जलाविलेन हस्तेन मुखं स्पृष्ट्वा बालकस्य मातुःस्तनाननुमन्त्रयते प्रक्षाल्य बालकस्य पिता, तदसन्निधौ पुरोहित एकैकया ऋचा एकैकम्, उत्तमयान्यया तूभौ। तदपेक्षमेव बहुवचनं स्तनानिति । मधु वात इति दक्षिणम्,मधु नक्तमिति वामम्, मधुमान्न इति द्वौ। मधुशब्दो जगत्प्रजननस्यामृतस्य नित्यानन्दमयस्य मधुविद्याप्रसिद्धस्य नाम मन्त्रत्रये ज्ञेयः ॥

मधु वात ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसा मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

ऋतो यज्ञः। यज्ञमिच्छति यः स ऋतायच्छब्देन क्यजन्तेन शंत्रन्तेन चोच्यते, ऋतायते यज्ञमिच्छते यजमानाय वातो मधु अस्तु अमृतत्वकारी भवतु। सिन्धवो नद्यो मधु जलं क्षरन्ति क्षरन्तु। ओषधीः ओषध्यः फलपाकान्ताः माध्वीर्मधुररससंयुक्ता भवन्तु। मधु

नक्तम्, उतशब्दोऽप्यर्थे, नक्तं सन्ध्या, सापि उषसा रात्र्या सह मध्वस्तु नः। पार्थिवं रजः पार्थिवलोकः मधुमानस्तु। द्यौरन्तरिक्षं मध्वस्तु नः पिता। वनस्पतयो मधुमन्तः सन्तु, सूर्यश्चास्माकं मधुमानस्तु, गावश्चास्माकं माध्वीमाध्व्यो मधुमत्यः सन्तु ॥ ५ ॥

हिरण्येन सम्पातान्सन्निघृष्य मधु चेत्येके तन्मुखे कृत्वा प्रपाययत्यायुर्धय जरां धय सत्यं धय श्रियं धयोर्जं धय रायस्पोषं धय ब्रह्मवर्चसं धय ॥ ६ ॥

सुवर्णेन संपातान् सन्निघृष्य बालस्य मुखे कृत्वा पाययति। एके पुनर्मन्यन्ते मधु च, मधुयुक्तान् संपातान् सन्निघृष्य पाययेदित्यर्थः। उत्सर्गेण पितृकर्मकत्वात् जातकर्मप्रभृतीनां, पिता ब्रूते—हे बालक आयुर्धय पिव, एवं जरां पिव, पीयमानं सम्पातघृतं समधु वा स्तनक्षीरं च तवायुरादेः कारकमस्त्वित्यर्थः। ऊर्जमन्नं बलं च। रायस्पोषो धनपुष्टिः। वेदादिविद्यासमृद्धिर्ब्रह्मवर्चसम् ॥ ६ ॥

जीव शरदः शतं पश्य शरदः शतमिति मूर्धनि निघ्राप्य स्वस्त्ययनं वाचयति ॥ ७ ॥

बोधश्चमेत्यनुवाकम् । स्वार्थे णिच् वाचयतीति । शिष्टं स्पष्टम् ॥

बोधश्च मा प्रतीबोधश्च पुरस्ताद्गोपायतामस्वप्नश्च मानवद्राणश्च दक्षिणतो गोपायतां गोपायमानश्च मा रक्षमाणश्च पश्चाद्गोपायतां जागृविश्च मारुन्धती चोत्तराद्गोपायताम् ॥

अनमित्रं नो अधरागनमित्रमुदकृधि । इन्द्रानमित्रं नः पश्चादनमित्रं पुरस्कृधि ॥

अनमित्रैरहोभिः सचेमहि विश्वे देवा अनमित्रा न उषसः सन्तु निम्रुचः ॥ याः षडुर्वीः पञ्च प्रदिशस्ता नः पान्तु मित्रधा नो मित्रे दधाता अभयं नो अस्तु ॥

ये रात्रीमनुतिष्ठथ ये च भूतेषु जागृथ ।
पशून्ये सर्वान्रक्षथ ते न आत्मसु जागृत ॥

बोध प्रतीबोधास्वप्नानवद्राण गोपायमान रक्षमाण जागृवेऽरुन्धति ये देवास्तनूपाः स्थ ते म इह तन्वं पात बोधप्रतीबोधेत्यसौ वा आदित्यो बोधोऽग्निः प्रतीबोधोऽस्वप्नानवद्राणेति चन्द्रमा वा अस्वप्नोऽयं यः पवते सोऽनवद्राणो गोपायमान रक्षमाणेत्यहर्वै गोपायमानो रात्री रक्षमाणो जागृवेऽरुन्धतीति यज्ञो वै जागृविर्दक्षिणारुन्धत्येते वै देवा राष्ट्रभृतस्तानेवेह आत्मनो गोपीथाय ॥

एतत्स्वस्त्ययनं, स्वस्तिरविनाशस्तस्यायनं प्रा-

पणं अविनाशलाभकारणम् । राष्ट्रभृतामार्षम् । राष्ट्रं जगद्बिभ्रति धारयन्ति पुष्णन्ति च ये ते राष्ट्रभृत आदित्यादय ऋतवोऽपीत्येके । बोधादयोऽत्रैवानुवाके पुरस्ताद्व्याख्याताः । आदित्यो बोधः, अग्निः प्रतीबोधः प्रकाशकत्वात् । चन्द्रमा मनोरूपेणास्वप्नः सततजागरणात्, प्राणरूपो वायुरनवद्राणः अकुत्सितगतित्वात् । दिवसो गोपायमानो जीवननिमित्तक्रियानुष्ठापनद्वारेण, रक्षमाणो रात्रिः । जागृविः यज्ञः प्रजापतिरूपः 'यज्ञो वै प्रजापतिः' इति श्रुतेः सर्वान्तर्यामिरूपेण सर्वप्राणिषु जागरणाज्जागृविः, अरुन्धती दक्षिणा । साहि अरीन्निवारयन्ती सती यजमानाय फलं ददाति ॥

बोध आदित्यो मां पुरस्तात् पूर्वस्यां दिशि गोपायतां रक्षतु, प्रतीबोधश्चाग्निः । अस्वप्नश्चन्द्रो मां दक्षिणस्यां दिशि गोपायतां, अनवद्राणश्च वायुः । प्राणः गोपायमानो दिवसो मां पश्चिमदिग्भागे गोपायतां, रक्षमाणश्च रात्रिकालः । जागृविर्यज्ञः प्रजापतिरुत्तरदिग्भागे मां गोपायतां, अरुन्धती च दक्षिणा ॥

अनमित्रं नोऽधरागित्यैन्द्री, अनुष्टुप् । न मित्रममित्रं नामित्रमनमित्रं मित्रमित्यर्थः नञ्द्वयेन प्रकृतार्थाभिद्योतनात् । हे इन्द्र नोऽस्माकं अधरागधस्तनदिग्भागे उदक्कोत्तर-दिग्भागेऽनमित्रं कृधि कुरु, यस्तत्रास्मान्हिंसि-तुमिच्छति, तमनुकूलं सम्पादयेत्यर्थः । एव-मुत्तरत्र । पश्चात्पश्चिमदिशि । पुरः पूर्वस्यां दिशि ॥

अनमित्रैरहोभिरिति द्वे शक्वर्युष्णिहौ । अ-भिधेया सर्वत्र देवता । हे विश्वे देवाः सर्वे देवा वयं मित्रीभूतैरहोभिः सचेमहि, उषसः प्रभा-तकालाः, निम्रुचश्च रात्रयोऽस्माकं मित्राणि सन्तु । 'म्रुचु म्लुचु गतौ' नितान्तं गच्छत्यास्य आदित्य इति निम्रुचः ॥ याः षड्देवता उर्वी उर्व्यः महत्यः । कास्ताः ॥ द्यौः, पृथिवी, अहः, रात्रिः, उषः, ओषधयः तथा पञ्च प्रदिशश्च-तस्रः प्रागाद्या ऊर्ध्वा पञ्चमी । ता नोऽस्मान् पान्तु रक्षन्तु । हे अनन्तरोक्ता यतो यूयं मि-त्रधा हितस्य कार्यस्य विधात्र्यस्ततो नोऽस्मान् मित्रे शुभकर्मणि दधात धारयत, अभयं चा-

स्माकमस्तु युष्मत्प्रसादात् ॥ हे प्रदर्शितदेवा ये यूयं रात्रीमनुतिष्ठथ रात्रीं लक्षणीकृत्य तिष्ठथ, ये च भूतेषु जागृथ, सर्वांश्च पशून् रक्षथ, ते नोऽस्माकं सम्बन्धिषु आत्मसु शरीरेषु जागृत ॥

बोध प्रतीबोधेत्यादिनाष्टानां संबोधनम् । हे बोधादयः अरुन्धतीपर्यन्ताः ये यूयं देवास्तनूपाः स्थ तनूनां शरीराणां रक्षका भवथ, ते मे मम इह गहने भवे तन्वं तनूं पात रक्षत । बोधादीन् प्रतीकैरवच्छिद्य व्याचष्टे बोधप्रतीबोधेत्यादिना, गतार्थमेतत् । एते वै देवाः, वैशब्दोऽवधारणे, एत एव बोधादयो राष्ट्रस्य जगतो भर्तार ऋतवश्च, अतोऽहं तानेवेट्टे स्तौमि । किमर्थम् । आत्मनो गोपीथाय रक्षणाय । अन्यान्यप्यत्र स्वस्त्ययनानि पठनीयानि । वच्चिश्चुरादौ पठ्यते, ततः स्वार्थे णिच् स्वस्त्ययनं वाचयतीति । तेन युक्तं स्वकर्तृकं वचनं पितुः । स्वकर्तृकाणि ह्येतान्युत्सर्गेण प्राक् चूडाकरणात् ॥ ७ ॥

ति चतुस्त्रिंशी काण्डिका ॥ ३४ ॥

अथ

पञ्चत्रिंशी काण्डिका ।

सर्षपान्फलीकरणमिश्रान्दर्व्या जुहोति 'शण्डो मर्कोपवीतः' 'आलिखन्' 'हर्य-क्षणः' 'केशिनी' इति ॥ १ ॥

बालकसूतिकयोः रक्षार्था अशौचकालेऽमी होमाः, अतश्च दृष्टार्था एव । फलीकरणं कम्बुकाः, तैर्मिश्रितान्सर्षपान्दर्व्या दशाहं यावत् सायंप्रातर्जुहुयात् शण्ड इत्यादिचतु-र्भिर्मन्त्रैः ॥

शण्डो मर्कोपवीतस्तौण्डुलेय उलूखलश्चपलो नश्यतामितः स्वाहा ॥ १ ॥

इह सूतिकास्थानाच्छण्डादयो नश्यन्तु पलायन्तामिति समुदायार्थः । शण्डादयः पि-शाचानां संज्ञाः । एकैको मन्त्रसंबन्धः । शण्ड इतः स्थानान्नश्यतु, एवं मर्कः, उपवीतः, तौ-ण्डुलेयः, उलूखलश्चपलो नश्यतामितः । स्वाहा सुहुतमस्तु ॥ १ ॥

आलिखन्नवलिखन्किवदन्त उलूखलश्चपलो नश्यतामितः स्वाहा ॥ २ ॥

समानं पूर्वेणैतत् ॥ २ ॥

हर्यक्ष्णः कुम्भिः शक्तिर्हन्ता चुपणीमुखश्चपलो नश्यतामितः स्वाहा ॥ ३ ॥ केशिनी श्वलोमिनी कचा कौचापकाशिन्यपेतो नश्यतामितः स्वाहा ॥ ४ ॥

हर्यक्ष्ण इत्यादयः संज्ञाः । केशिनी नाम राक्षसी । तथा श्वलोमिनी, कचा, कौचा, अपकाशिनीत्येतान्यपि राक्षसीविशेषनामानि ॥४॥

एवं सायंप्रातर्दशाहं जुहुयात् ॥ २ ॥

अनेन प्रकारचतुष्टयेन दशाहं जुहुयात् अशौचकालं यावज्जुहुयादित्यर्थः ॥ २ ॥

इति पञ्चत्रिंशी काण्डिका ॥ ३५ ॥

अथ

षट्त्रिंशी काण्डिका ।

अथ नामकरणम्

दशम्यां तस्मिन्नेवाग्नौ पयसि स्थालीपाकं श्रपयित्वा सर्वगन्धैः फलोत्तरैः सशिरस्कं स्नापयित्वाहतेन वाससा प्रच्छाद्य स्थालीपाकस्य जुहोति कया नश्चित्र इति द्वाभ्यां 'कया तच्छृण्वे प्रजापतये स्वाहा' प्रजापते नहि त्वदिति च द्वाभ्याम् ॥ १ ॥

दशम्यां व्यतीतायामशौचशुद्धावेकादशेऽहनि द्वादशेऽहनि वा तत्र नक्षत्रादिवैगुण्ये दिनान्तरे नामधेयं दशम्यां द्वादश्यां वापि कारयेत्

'पुण्येऽहनि मुहूर्ते वा नक्षत्रे वा गुणान्विते ।'

इति स्मरणात् । औदयिक्या च व्यवस्थया त्रयोदशी तिथिर्गृह्यते, नत्वन्याय्यादुत्थानादन्याय्याच्च संवेशनादनद्यतनकाल इत्यादि-

कया, 'रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिः' इति विभातायामपि रजन्यामुदयात् प्रागशौचानुवृत्तिदर्शनात् । तस्मिन्नेव सूतिकागारस्थे सूतकाग्नौ पयसि स्थालीपाकं श्रपयित्वा सर्वौषधिप्रभृतिभिः सुगन्धिद्रव्यविशेषैरुपरिविनिहितमङ्गलार्थजातीपूगफलविशेषैः सशिरस्कं स्नापयित्वा, पुंलिङ्गनिर्देशात् स्त्रियं वर्जयति, अनुपभुक्तेन वस्त्रेण संच्छाद्य तस्य स्थालीपाकस्य संबन्धिभिरवदानैर्व्यत्ययेन स्थालीपाकेन जुहोति कया नश्चित्रेति पञ्चाहुतीः ॥ १ ॥

अग्नेरायुरसीति तुल्यमा ललाटाभिमर्शनात् ॥ २ ॥

अग्नेरायुरसीत्यादिकमायुषेष्ट्या तुल्यमित्यतिदेशः । अवधिमाह आ ललाटाभिमर्शनात् । 'तस्य ललाटमभिमृश्याश्विनोः प्राण इति जपति'(१०)इति वक्ष्यति । तदनन्तरमायुषेष्ट्या समानमित्यर्थः ॥ २ ॥

तदेव नाम धीयते ॥ ३ ॥

अत्रानुवाके असावित्यस्य स्थाने तदेव नाम धीयते यत्तु जातकर्मणि कृतं, नान्यत् ॥ ३ ॥

अन्यदित्येके ॥ ४ ॥

एके पुनराहुरन्यद्विधीयते । द्वे हि नाम्नी ब्राह्मणस्य कर्तव्ये । तत्र यद्रहस्यं जातकर्मण्युक्तं 'पुत्रे जाते नाम धीयते' (३४।१) इति, तस्य प्रयोजनं परैरभिचारे क्रियमाणेऽनुच्चारणादि, प्रकटं त्वेकादशाहादौ व्यावहारिकम् । तथाच श्रुतिः 'तस्माद्ब्राह्मणो द्विनामा' इति॥४॥

प्राक् स्विष्टकृतः कंसे पूतमाज्यमासिच्य हिरण्यं चाबन्धनीयमग्नेरायुरित्यवधाय तस्य जुहोतीन्द्रस्य प्राण इति पञ्चभिः ॥ ५ ॥

स्विष्टकृतः पूर्वं पूतमाज्यं कांस्यपात्रे आसिच्य प्रक्षिप्य, तत्र च हिरण्यं प्रक्षिप्य अग्नेरायुरसीत्यादिना मन्त्रेण । कीदृशं सुवर्णम् । आबन्धनीयं बालकस्य कण्ठादौ बन्धनार्हम् । तस्याज्यस्य जुहोति इन्द्रस्य प्राण इत्यादिभिः पञ्चभिर्मन्त्रैः ॥ ५ ॥

प्राक्संस्थितयजुषो ब्रह्मा घृते हिरण्यमवपद्यते सर्वे चर्त्विजो यदसर्प इति ॥६॥

संस्थितयजुर्होमात्पूर्वं ब्रह्मा घृते हिरण्यमवपद्यते अवष्टभ्नाति यत्तद्बालगलादिबन्धनार्थं घृते निहितं सर्वे च ऋत्विजस्तदवष्टभ्नन्ति यदसर्प इत्यादिमन्त्रैः ॥ ६ ॥

पावमानेनेत्युद्धृत्य देवा आयुष्मन्त इति यजमानाय प्रयच्छति ॥ ७ ॥

आज्यात्सुवर्णं पावमानेनेत्युद्धृत्य यजमानाय प्रयच्छति देवा आयुष्मन्त इत्यादिमन्त्रैः ॥

तत्पिबति निरवधयेत् ॥ ८ ॥

तत् सुवर्णनिःस्रावमाज्यं बालकः पिबति । तच्च निःशेषेणावधयेत् पिबेत् ॥ ८ ॥

हिरण्याद्धृतं प्रक्षाल्येममग्न इति हिरण्यमाबध्नाति ॥ ९ ॥

हिरण्यलग्नं घृतं प्रक्षाल्य तद्धिरण्यं बध्नाति बालकस्य गलादौ इममग्न इत्यादिना ॥ ९ ॥

तस्य ललाटमभिमृश्याश्विनोः प्राण इति जपति ॥ १० ॥

ललाटतटं हस्तेन स्पृष्ट्वा जपति अश्विनोः प्राण इत्यादिकम् ॥ १० ॥

अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि जीव शरदः शतं पश्य शरदः शतमिति मूर्धनि निघ्राय स्वस्त्ययनं वाचयति ॥ ११ ॥

अङ्गादङ्गादित्यादिना बालस्य मूर्धनि शिङ्घनं कृत्वा स्वस्त्ययनं वक्ति। क्वचिन्निघ्राप्येति पाठः, तत्र स्वार्थे णिच्। पित्रसन्निधौ वा मातरं प्रयुज्येति केचित्। ऋत्विग्वा पितुः प्रयोजको विवक्षितः ॥ ११ ॥

एवमत ऊर्ध्वं विप्रोष्य ॥ १२ ॥

अतो नामकरणादूर्ध्वं यदा प्रवासादायाति पिता, तदानेनैव प्रकारेण मूर्धन्यभिघ्राणं कुर्यात् ॥ १२ ॥

एवं मासि मासि स्थालीपाकस्येष्ट्वा जातकर्मणा वाज्यस्य ॥ १३ ॥

एवमेव प्रतिमासं जन्मदिने स्थालीपाकेन जातकर्मविधिवदाज्येनेष्ट्वा निघ्राणं मूर्धनि कुर्यात् ॥ १३ ॥

एवं संवत्सरम् ॥ १४ ॥

प्रतिमासमिमां कर्तव्यतां संवत्सरं याव-त्कुर्यात् ॥ १४ ॥

मांसं तु नाश्नीतः ॥ १५ ॥

मांसं तु बालकस्य माता पिता च संवत्सरं यावन्नाश्नीयात् ॥ १५ ॥

समाप्ते संवत्सरेऽजाविभ्यां वाग्नि-धान्वन्तरी इष्ट्वा सर्पिष्मदन्नं ब्राह्मणा-न्भोजयेत् ॥ १६ ॥

प्रथमे संवत्सरे समाप्ते अजेनाग्निमविना धन्वन्तरिमिष्ट्वा वाशब्दादाज्येन स्थालीपाकेन वा सर्पिषा प्रचुरेण युक्तमन्येन च पवित्रेण दधिप्रभृतिना अन्नं ब्राह्मणान् भोजयेत् । तैः सुप्रीतैः स्वस्त्ययनाशीःप्रभृतिभिरभिनन्दे-देनम् ॥ १६ ॥

कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचि-ष्ठया वृता ॥ १ ॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सद-न्धसः । दृढा चिदारुजे वसु ॥ २ ॥

व्रतस्यार्षम् । इन्द्रः प्रजापतिर्वा देवता ।

चित्रश्चित्रचरितः प्रजापतिरिन्द्रो वा नोऽस्मान्कया ऊत्या आभुवदाभावयति जनयति । अवनमूतिः 'सुपां सुलुक्पूर्वसवर्णा……' (७।१।३९) इति तृतीयैकवचनस्य पूर्वसवर्णैकादेशः ऊतीशब्दाल्लुक् च । कीदृशः प्रजापतिः । सखा समानख्यानः अन्तर्यामी । कीदृशानस्मान् । सदावृधः सर्वकालं वृद्धियुक्तान् । कया वृता वर्तनेनाभावयति । कया शचिष्ठया शक्त्यतिशयेन चैतन्यातिशयेन वा अतिशयेन शकिता शचिष्ठा 'तुरिष्ठेमेयःसु' (६।४।१५४)इति तृचो लोपः, छान्दसो वर्णव्यत्ययश्चकारः, केन शक्त्यतिशयेन वर्तयेदित्यर्थः । स्रष्टृत्वादिशक्त्यतिशययुक्तः प्रजापतिर्वृद्धिविषये कृतावस्माभिरिज्यते, स इष्टया प्रीतः सन् बालं वृद्ध्यादिसंयुक्तं संपादयत्विति तात्पर्यार्थः ॥

हे प्रजापते को यजमानः त्वा मत्सत् मादयति, अन्धसोऽन्धसा हविषा, दृढा दृढानि, वसु वसूनि धनानि, आरुजे आरुजति वितरति दक्षिणादिद्वारेण । कीदृशो यजमानः । सत्यः उत्तमसत्त्वः, तथा मदानां मंहिष्ठः हृष्टानामा-

नन्दयोगिनां मध्ये वृद्धतमः परमानन्दयुक्तो ब्रह्मस्वभाव इत्यर्थः । 'बहि महि वृद्धौ' इति धातोः प्रकृतित्वं मंहिष्ठशब्दे इष्ठन्नन्ते ॥

कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु काचिदृष्वः । पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥

अत्रापि प्रजापतिर्देवता । अहं शृण्वे शृणोमि वेदात् । किं तत् । काचिदेवास्य प्रजापतेः शक्तिर्लोकोत्तरास्ति प्रज्ञा वा । का । यया शच्या शक्त्या प्रज्ञया वा स ऋष्वो महत्तमः पुरु अंहः पापं मुहुर्मुहुः पुनःपुनः कृणोति कृन्तति नाशयति । कस्मै । दाशुषे यजमानाय । पापं च नाशयित्वा, अनन्तरं जरित्रे स्तोत्रे दाशुषे पुरु सुबहु द्रविणं धनं दधाति ददाति करोति वा । कीदृशः प्रजापतिः । शचिष्ठः शक्ततमः प्राज्ञतमो वा, विचयिष्ठः विविधशक्तिनिचयवत्तमः । कयेति व्यत्ययेन तृतीया प्रथमास्थाने ॥

प्रजापतये स्वाहा ॥

प्रजापतये सुहुतमस्तु । प्रजापते नहि त्वदिति, असा अमुष्येति द्वयं व्याख्यातम् ॥

अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृतस्तेनास्मा अमुष्मा आयुर्धेहि

ब्रह्मण आर्षम्। अनेन हिरण्यं घृतेऽवदधाति। हे सुवर्ण असि त्वमग्नेरायुः, आयातीत्यायुः, अग्नेरागतं त्वमुत्पन्नमित्यर्थः। तथाच श्रुतिः

'अग्नेर्यद्रेतः सिच्यते तद्धिरण्यमभवत्'

इति। तस्यैवंभूतजननस्य ते तव मनुष्या आयुष्कृत इन्धनाध्माननिर्मन्थनजागरणादिना मनुष्या अग्नेरायुः कुर्वन्ति, तद्द्वारेण सुवर्णस्य। तेन मनुष्याणामुपकारकत्वादस्मै यजमानाय, अमुष्मै च बालकायायुर्देहि कुरु वा॥

इन्द्रस्य प्राणः स ते प्राणं ददातु यस्य प्राणस्तस्मै ते स्वाहा॥

इन्द्रोऽत्र देवता। इन्द्रस्य प्राणः, इन्द्रः प्राणस्य स्वामी, अतः स इन्द्रस्तुभ्यं प्राणं ददातु। यस्य प्राणस्तस्मै इन्द्राय ते तुभ्यं स्वाहा॥

पितॄणां प्राणस्ते ते प्राणं ददतु येषां प्राणस्तेभ्यो वः स्वाहा॥

पितृदेवताको यतः पितृस्वामिकः प्राणो-

ऽतस्ते पितरस्ते तुभ्यं प्राणं ददतु। येषां प्राणस्तेभ्यः पितृभ्यो वो युष्माकं सुहुतमस्तु ॥

मरुतां प्राणस्ते० विश्वेषां देवानां प्राणस्ते० प्रजापतेः प्राणः स ते प्राणं ददातु परमेष्ठिनः प्राणः स ते प्राणं ददातु ययोः प्राणस्ताभ्यां वां स्वाहा ॥

प्रजापतिः प्राणस्य स्वामी । स तुभ्यं प्राणं ददातु । परमेष्ठी प्राणस्य प्रभुः। स तुभ्यं प्राणं ददातु। उभयोः प्रजापतिपरमेष्ठिनोर्ययोः प्राणस्ताभ्यां वां युवाभ्यां स्वाहा ॥

यदसर्पस्तत्सर्पिरभवो यन्नवमैस्तन्नवनीतमभवो यदध्रियथास्तद्घृतमभवः ॥

घृतं निरुच्यते हे घृत यत् यस्मात्त्वमसर्पः सृप्तं, ततः सर्पिर्भूतमसि। यस्माच्च नवं प्रत्यग्रं सत् ऐः आगतमसि, ततो नवनीतमुच्यसे। यस्मादध्रियथास्तद्घृतं भूतमसि 'धृ धारणे' इत्यस्य वर्णव्यत्यये घृतशब्दः ॥

घृतस्य धारामममृतस्य पन्थामिन्द्रेण दत्तं प्रयतं मरुद्भिः। तत्त्वा विष्णुरन्वपश्यत्तत्त्वेळा गव्यैरयत् ॥

विष्णोरार्षम्। धारां पन्थामिति प्रथमायाः स्थाने द्वितीया । येयं घृतस्य धारा, सा अमृतस्य अमरणधर्मस्य पन्था उपायः। इदं हि घृ-

तमिन्द्रेण यजमानेभ्यो दत्तं वृष्ट्यादिद्वारेण, प्रयतं च मरुद्भिः प्रकर्षेण यतं नियम्य स्थापितं वचनादिद्वारेण । तत् दीयमानं नियम्यमानं च त्वां विष्णुरपश्यत् । तत्त्वामिळा देवताविशेषः गवि ऐरयन्निक्षिप्तवती ॥

पावमानेन त्वा स्तोमेन गायत्र्या वर्तन्योपांशोर्वीर्येणोद्धराम्यसौ ॥

पावमानेन स्तोमेन बर्हिष्पवमानादिना, गायत्र्या वर्चा, वर्तन्या सामावयवेन, उपांशोर्ग्रहस्य वीर्येण सामर्थ्येन उद्धरामि त्वाम् । असाविति नाम प्रतीयात् ॥

बृहता त्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ ॥

गतार्थम् ॥

अग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे जीवनस्य या असौ ॥

अग्नेरुन्नयामीति विपरिणतस्यानुषङ्गः, न तूद्धरामीत्यस्यानुषङ्गः 'व्यवयान्नानुषज्येत' (पू० मी० २।४९) इति न्यायात् । पावमानेनेत्यादि समुच्चितं मन्त्रत्रयमाहुः सुवर्णोद्धरणे भिन्नाख्यातत्वेन भिन्नमन्त्रत्वात् । अन्ये तु एकमन्त्रतां मन्यन्ते ॥

देवा इत्यादयः षट्

देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेषामयमायुषायुष्मानस्त्वसौ ॥ १ ॥

तेषामायुषा देवानामायुषा तत्परिमाणेन जीवनेन अयं यजमानो बालश्चायुष्मानस्तु । असाविति पूर्ववत् ॥

ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तस्यायमायुषायुष्मानस्त्वसौ ॥२॥

ब्रह्म वेदः । तच्चायुष्मदविनाशि । तद्धि ब्राह्मणैर्ब्रह्मसम्बन्धिभिरध्ययनधारणादिभिरनुच्छित्तिकर्मकम् । तस्यायमित्यादि पूर्ववत् ॥

अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तस्यायमायुषायुष्मानस्त्वसौ ॥ ३ ॥

वनस्पतय इन्धनानि अरण्यं च । समानमन्यत् ॥

यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तस्यायमायुषायुष्मानस्त्वसौ ॥ ४ ॥

दक्षिणालोभेन ऋत्विजः अभ्यस्यन्ति यज्ञविद्यां, सम्यगनुतिष्ठन्ति च कर्माणि । तेन दक्षिणया आयुष्मत्त्वं यज्ञस्य ॥

सोम आयुष्मान्स ओषधीभिरायुष्मांस्तस्यायमायुषायुष्मानस्त्वसौ ॥ ५ ॥

ओषधयो व्रीह्याद्याः, ताभिः । चरुपुरोडाशादिना इष्टमन्नादि चन्द्रमसमाप्याययतीति कृत्वा भवत्योषधीभिरायुष्मान् सोमः ॥

ओषधय आयुष्मतीस्ता अद्भिरायुष्मतीस्तासामयमायुषायुष्मानस्त्वसौ ॥ ६ ॥

वृष्ट्या वर्धन्ते ध्रियन्ते चौषधयः ॥

इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥

हे अग्ने इमं बालकं यजमानं च आयुषे वर्चसे च कृधि कुरु, विद्यासंपत्तिर्वर्चः, यथा एतस्यायुर्वर्चश्च भवति तथा कुर्वित्यर्थः । हे वरुण त्वमपि तिग्ममुत्कटमोजो बलं संशिशाधि सम्यक् संपादय । हे अदिते देवमातस्त्वमस्मै शर्म सुखं यच्छ देहि मातेव जननी यथा । हे विश्वे देवा यूयं यथा जरदष्टिरसत् भवति, तथा कुरुत, जरामश्नोति व्याप्नोति जरदष्टिः, जराजर्जरितशरीरमेनं कुरुतेत्यर्थः ॥

अश्विनोः प्राणस्तौ ते प्राणं दत्तां तेन जीव ॥
मित्रावरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव ॥
बृहस्पतेः प्राणः स ते प्राणं ददातु तेन जीव ॥

अश्विनावत्र देवता । अश्विप्रभृतिभिर्दत्तेन प्राणेन जीवेति गतार्थम् ॥

अङ्गादङ्गात्संभवसि हृदयादभिजायसे । आत्मा वै पुत्र-नामासि जीव शरदः शतं पश्य शरदः शतम् ॥

सर्वाङ्गपरिस्नुतरससारवीर्यसंभूतत्वादङ्गादङ्गात्सम्यग्भवसि, हृदयसंकल्पितमनोरथसंभूतत्वाच्च हृदयादाधिक्येन जायसे । वैशब्दोऽवधारणे । किं बहु ब्रूमहे, आत्मा वै पुत्रनामासि, त्वं मच्छरीरेण संभूतत्वान्मदीयमेव मूर्त्यन्तरमसि पुत्रनामाङ्कितमुपकारितरमित्यर्थः । एवंभूतस्त्वं शरदां शतं प्राणान्धारय पश्य च पटिवन्द्रियो भव वर्षशतम् । एवं हि गर्भाधानादि नामकरणान्तं व्याख्यातम् । अनन्तरं चूडाकर्म सूत्रकारेणोक्तम् । स्मृतिषु हि निष्क्रमणान्नप्राशने नामकरणानन्तरमुक्ते 'तृतीये मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ।' 'षष्ठे मास्यन्नप्राशनं कर्तव्यम्' इत्यादिना, तेन तेऽपि अवश्यकर्तव्ये । चन्द्रदर्शनं चातो गृह्यान्तरानुसारेणेहापि दर्शयति ॥ १६ ॥

इति षट्त्रिंशी काण्डिका ॥ ३६ ॥

अथ

सप्तत्रिंशी काण्डिका ।

तृतीयेऽर्धमासे दर्शनमादित्यस्य पुण्याहे पर्वणि वोदिते त्वादित्ये रथचक्रमात्रं स्थण्डिलमुपलिप्य तस्मिन्यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वा 'तरणिः' 'दिवो रुक्म०' 'उदु त्यं०' 'चित्रं देवाना' मित्याज्यस्य जुहोति ॥ १ ॥

जन्मनः प्रभृति मासद्वये व्यतीते तृतीयस्य मासस्य प्रथमार्धेऽतीते आदित्यस्य दर्शनं बालः कारयितव्यः। तत्रेयमितिकर्तव्यता। पुण्यदिने ज्योतिःशास्त्रशुद्धे, पर्वणि वा सुनक्षत्रादियोगिनि दर्शनं कारयितव्य इत्येकस्यैव पर्वण इतरतिथिसमुदायेन सह विकल्पदर्शनादुत्कर्षातिशयः प्रतीयते। उदिते एवादित्ये रथचक्रपरिमाणं स्थण्डिलमुपलिप्य, गेहाङ्गने आदित्यरश्म्यलङ्कृते तत्रोपलिप्ते प्रतिष्ठाप्य लौकिकमग्निं यथोक्तमुपसमाधाय उपसमाधा-

नमुद्धतावोक्षणपरिसमूहनपर्युक्षणपरिस्तरणप-
वित्रकरणाज्यविलयनाज्यवीक्षणाद्युपस्थानरू-
पं कृत्वा, ततो जयप्रभृतिभिर्जयाकारैराघा-
रादाज्यभागान्तैर्हुत्वा तरणिर्विश्वदर्शत इति
दिवो रुक्म इति उदु त्यमिति चित्रं देवानामिति
चतसृभिराज्यस्य जुहोति ॥ १ ॥

'मित्रो जनान्' 'प्र स मित्रे'ति स्थाली-
पाकस्य ॥ २ ॥

जुहोतीत्यनुषज्यते । मित्रो जनानिति प्र स
मित्रेति च द्वाभ्यां स्थालीपाकस्य जुहोति ॥२॥

अभ्यावर्तस्वेति कुमारमभ्युदानयति ॥

अभ्यावर्तस्वेत्यादिना मन्त्रेण कुमारमभिमुखं
कृत्वा उन्नमय्यानयति पिता गुरुर्वा ॥ ३ ॥

द्रष्ट्रे नम इत्युपस्थानमादित्यस्याद्दश्र-
न्नस्येति च ॥ ४ ॥

द्रष्ट्रे नम उपद्रष्ट्रे नम इत्यादिना बालस्य
पिता आदित्योपस्थानं करोति बालं सम्मुखं
कृत्वोत्सङ्गे ॥ ४ ॥

सर्पिष्मदन्नं ब्राह्मणान्भोजयेत् ॥ ५ ॥

बहुघृतदध्यादियुक्तं हविष्मदन्नं ब्राह्मणान्भोजयेत् ॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमाभासि रोचनम् ॥

प्रजापतेरार्षमुत्तरत्रापि । गायत्री । सूर्यो देवता । हे सूर्य असि त्वं तरणिस्तारयति संसारसागरादिति तरणिः, तथा दर्शतो द्रष्टुर्विश्वस्य सर्वस्य ज्योतिष्कृत् प्रकाशकारी अन्धतमसस्यापसारकः, विश्वमाभासि रोचनं यत्किंचिद्रोचनं प्रकाशमानं तद्विश्वं समस्तं त्वमेवाभासि प्रजापतिरूपः ॥

दिवो रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥

अयमादित्यो दूरे उदेति दूरं गच्छति चेष्टते । कुतः । दिवः अन्तरिक्षात् । रुक्मः 'रुच दीप्तौ' दीप्तः, सुवर्णवर्णो वा । उरुचक्षा बृहद्दर्शनः । अर्थः अर्यते प्राप्यते अर्थ्यते वा मोक्षार्थिभिरित्यर्थो ब्रह्म। तरणिर्व्याख्यातः। भ्राजमानो दीप्यमानः । जायन्त इति जनास्त्रयो लोका नूनं निश्चितं कृत्वा सूर्येण प्रसूता जनिता जगतां प्रजापतिविवर्तत्वात् ब्रह्मपरिणा-

मत्वाद्वा सूर्यस्य च ब्रह्मात्मकत्वात्। अयं हि सूर्यः अपांस्यन्नानि आविष्कुर्वन् वृष्टिद्वारेण अर्थांश्च यागदानादीन् वेगेनार्यमाणानयन्प्रवर्तयन् दिवसकरणद्वारेण दृश्यते । 'उदु त्यं' 'चित्रं देवानां' 'मित्रो जना'निति व्याख्याताः॥

प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षते व्रतेन। न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥

हे मित्र आदित्य यो मर्तो मर्त्यस्तवं व्रतेन व्रतं कर्म शिक्षते, स प्रयस्वान् अन्नवान् प्रास्तु प्रकर्षेण भवतु। यः त्वोतः त्वया रक्षितः, स न केनचिद्धन्यते, न जीयते पराभूयते। नाप्येनमंहः पापमश्नोति व्याप्नोति अन्तितः अन्तिकात्, नापि दूरात् ॥

अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह ।
वपां ते अग्निरिषितो अरोहत् ॥

हे पृथिवि यज्ञेन पयसा च सह अभ्यावर्तस्व मम साम्मुख्येन आगच्छ, प्रसन्ना भूत्वा मां पयस्वन्तं याज्ञिकं च सम्पादय । अग्निरिषितः प्रेषितः सन् ते तव वपां सारं वेदिमरोहत् आरोहतु ॥

द्रष्ट्रे नम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमोऽनुख्यात्रे नमः शृण्वते नम उपशृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः श्रान्ताय नमस्तपसे नमः ॥

घोराणामार्षम्। आदित्यः स्तूयते परब्रह्मरूपत्वात्सर्वमयत्वेन। द्रष्टा जीवात्मा, उपद्रष्टा अन्तर्यामी। तस्मै उभयात्मने नमः। वेदादिप्रमाणेन दृष्टं धर्मादिकमनु पश्चाद्योगाभ्यासेन स्फुटं पश्यतीत्यनुद्रष्टा योग्यात्मा, तस्मै नमः। ख्यातीति ख्याता प्रकाशमानः सर्वो लोको धर्मिरूपः, उपख्याता धर्मो रूपादिः, अनुख्याता धर्माधर्मरूपादिगतः। शिष्टं स्पष्टम् ॥

अदृश्रन्नस्य केतवो विरश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ॥

अस्य आदित्यस्य केतवः अश्वा रश्मयो वा अदृश्रन् दृश्यन्ते जनाननु जायमानाँल्लक्षणीकृत्य। विरश्मयो विगतरज्जवो बन्धनशून्या इत्यर्थः। भ्राजन्तो देदीप्यमाना अग्निप्रख्याः ॥

इति चारायणीयसमन्त्रगृह्यभाष्ये आदित्यदर्शनम् ॥

इति सप्तत्रिंशी काण्डिका ॥ ३७ ॥

अथ

अष्टात्रिंशी काण्डिका।

एवं चन्द्रदर्शनम् ॥ १ ॥

एवंशब्देन रथचक्रपरिमाणस्थण्डिलोपलेपनान्तस्यातिदेशः ॥ १ ॥

विशेषमाह

'मक्षूधाता मातरिश्वा' भूयो जात इति च द्वाभ्यामाज्येन चतुर्गृहीतेनाज्यभागान्ते जुहोति ॥ २ ॥

आप्यायस्वेति सं ते पयांसीति च द्वाभ्यां स्थालीपाकस्य ॥ ३ ॥

नवो नव इत्युपस्थानं चन्द्रमसः प्रकाशो दक्षिणा ॥ ४ ॥

नवो नव इत्यनेन मन्त्रेण चन्द्रमसः उपस्थानं कर्तव्यम्। प्रकाश आदर्शो दक्षिणा दातव्या ॥

मक्षूधाता मातरिश्वा वचोभिश्चन्द्रो अमृताद्वर्धते जायमानः। आयुः प्रजाममृतं सौभगत्वं प्र चन्द्रमास्तिरते दीर्घमायुः ॥

चन्द्रमा दीर्घमायुः प्रतिरते प्रतिरतु ददातु, तथा प्रजां पुत्रादिकाममृतममरणधर्मकत्वं सौभगत्वं सौभाग्यं लोकप्रियत्वम् । द्विरायुर्ग्रहणमतिशयार्थम् । स हि प्रतिपदादावमृतात् परब्रह्मणो जायमानो वर्धते प्रतिदिनम् । औणादिकोऽसिःप्रत्ययः । पूजितस्य चतुर्थपुरुषार्थस्य धाता विधाता भवति ॥

भूयो जातो हविषश्चन्द्रमा अस्मात्पूर्णः पुरस्तात्पयसो हविर्भिः । पयो गर्भो देवता पिन्वमानश्चन्द्रोऽमृतत्वमभयं कृणोतु ॥

पयोभिश्च भूयः पुनःपुनर्बहुकृत्वो वा पयः क्षीरं, गर्भः गर्भान् देवता यज्ञोद्देश्याः पिन्वमान ओषध्याद्याप्यायनमुखेन पोषयंश्चन्द्रो दुःखभयरहितममृतत्वं मे करोतु ॥

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥

हे सोम आप्यायस्व वर्धयास्मान् । वृष्ण्यं सेक्तृत्वमाप्यायकत्वं ते तव विश्वतः सर्वतः समेतु समागच्छतु । किंच वाजस्यान्नस्य सङ्गथे सम्बन्धनिमित्तं भव ॥

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि दिष्व ॥

हे सोम ते तव पयांसि संयन्तु त्वया संगच्छन्ताम् । वाजा वाजानि अन्नानि च संगच्छन्ताम् । वृष्ण्यानि च आप्यायकत्वानि त्वया संगच्छन्ताम् । कीदृशस्य तव । अभिमातिषाहः सङ्ग्रामाणां प्रसोढुरभिभवितुः । हे सोम अस्माभिराप्यायमानो हविषा अमृतत्वाय भव स्वर्गायेत्यर्थः । श्रवांसि चान्नान्युत्तमानि देहि यज्ञोपयोगीनि ॥

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।
भागं देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥

अयं चन्द्रमाः प्रतिपदादौ वर्धमानो नवो नवो भवति । अह्नां दिनानामुषसां च रजन्यन्तानामग्रमेत्यागच्छति केतुश्चिह्नभूतः प्रतिपदादिकालस्य सूचकत्वात् । किंच भागं देवेभ्यो ददात्यमृतमयत्वादमृतस्य च दीर्घमायुः प्रतिरते । इति चन्द्रदर्शनम् ॥

इति अष्टात्रिंशी काण्डिका ॥ ३८ ॥

अथ

एकोनचत्वारिंशी काण्डिका ।

षष्ठे मास्यन्नप्राशनम् ॥ १ ॥

प्रसवादारभ्य षष्ठे मासे बालकस्यान्नप्राशनं कर्तव्यम् ॥ १ ॥

सर्वाण्यन्नानि संयूय 'आयुर्दा देव' घृतप्रतीक इति हुत्वान्नपते अन्नस्येति कुमारमन्नं प्राशयेत् ॥

सर्वाणि हविष्यान्नानि मिश्रीकृत्य आयुर्दा देव इति घृतप्रतीक इति च द्वाभ्यां हुत्वा अन्नपते अन्नस्येति मन्त्रेण कुमारमन्नं प्राशयेत् ॥

आयुर्दा देव जरसं वृणानो घृतं वसानो घृतपृष्ठो अग्ने ।
घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसं नयेमम् ॥

हे अग्ने गव्यं गोप्रभवममृतममृतत्वकारि, चारु उत्कृष्टं, घृतं पिबन् इमं बालं जरसं नय वृद्धत्वं प्रापय । क इव कम् । पितेव पुत्रम् । हे देव द्योतमान आयुर्दा आयुषो दाता त्वं, अतो जरसं जरां वृणानो वर्धयन् घृतं च वसान

आच्छादयन् वितरन् घृतपृष्ठः सन् हूयमानेनोपरिवर्तिना घृतेन युक्तः सन् जरसं नयेमम् ॥

घृतप्रतीको घृतपृष्ठो अग्निर्घृताहवनो घृतमस्य धाम ।
घृतप्रुषो हरितस्त्वा वहन्तु घृतं पिबन्यजताद्देव देवान् ॥

त्रिष्टुप् । आग्नेयी । घृतं प्रतिकायति आह्वयति यः, स घृतप्रतीकः । घृतपृष्ठो व्याख्यातः । घृतस्य आ समन्तात् हवनं होमो यत्र, स घृताहवनः । तथा घृतमस्याग्नेर्धाम गृहम् । यतस्त्वमेवंभूतोऽग्निरतो हे भगवन् देव अग्ने घृतप्रुषो घृतकणाः हरितोऽश्वा इव त्वां वहन्तु प्राप्नुवन्तु आप्याययन्त्वित्यर्थः । त्वं च घृतं पिबन् हे देव देवान् यज पूजय प्रीणीहि । अग्निद्वारेण हि देवानां तृप्तिर्भवति ॥

अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो देहि द्विपदे चतुष्पदे ॥

हे अन्नपते सोमराज 'सोमो वा ओषधीनां राजा' इति श्रुतेः अन्नस्य नो देहि अन्नमस्मभ्यं प्रयच्छ, अनमीवस्य शुष्मिणः, अमीवो रोगस्तद्रहितं, शुष्मं सुखं सुखकारि । प्रदातारं प्रतारिषः, प्रकर्षेण तारय संसारसागरक्लेशम-

पसारयास्य । ऊर्जमन्नं बलं च नोऽस्माकं देहि द्विपदे चतुष्पदे च गवाश्वादिके । इत्यन्नप्राशनम् ॥

इत्येकोनचत्वारिंशी काण्डिका ॥ ३९ ॥

अथ

चत्वारिंशी काण्डिका ।

तृतीयस्य वर्षस्य भूयिष्ठे गते चूडाः कारयते ॥ १ ॥

जन्मनः प्रभृति यस्तृतीयो वर्षस्तस्य भूयिष्ठे भागे गते सति चूडाकर्म कर्तव्यम् । अर्धमवधिं कृत्वा सप्तमो मासो भूयान्, अष्टमस्तु भूयिष्ठस्तस्मिन् गते नवमे मासि कर्तव्यम् । दक्षिणेन विदुषापि न स्वयं पित्रा कर्तव्यमिति णिचोक्तम् ॥ १ ॥

दक्षिणतः कपूजा वसिष्ठानाम् ॥२॥

कपूजा चूडा । सा वसिष्ठगोत्रसंभूतानां द-

क्षिणे शिरसो भागे कर्तव्या । दक्षिणे दक्षिणत आद्यादिभ्यस्तसिः ॥ २ ॥

उभयतोऽत्रिकश्यपानाम् ॥ ३ ॥

उभयोः शिरसो दक्षिणोत्तरभागयोरत्रिगोत्रे कश्यपगोत्रे च जातानां शिखा कर्तव्या ॥ ३ ॥

मुण्डा भृगवः ॥ ४ ॥

भृगुगोत्रजा मुण्डा निःशिखाः कर्तव्याः॥४॥

पञ्चचूडा आङ्गिरसः ॥ ५ ॥

आङ्गिरसगोत्रे ये जातास्ते पञ्चचूडाः कर्तव्याः ॥ ५ ॥

वाजिमेके ॥ ६ ॥

एके वाजिमिच्छन्ति आङ्गिरसानाम् । वाजिः केशपङ्क्तिः ॥ ६ ॥

मङ्गलार्थं शिखिनोऽन्ये ॥ ७ ॥

ये कथितेभ्योऽन्येऽगस्त्यविश्वामित्रादिगोत्रजास्ते शिखिनो भवन्ति । किमर्थम् । मङ्गलार्थम् । निःशिखत्वं त्वमङ्गलधर्मः अरिष्टहेतुः । तथाच पठन्ति

'अमेध्यमेतच्छिरो यदशिखम् ।'

इति ।

'यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।'

इति च निन्दावादो यन्मूलं शिखाकर्मस्मरणम् ॥ ७ ॥

यथाकुलधर्मं वा ॥ ८ ॥

कुलधर्मानतिक्रमेण वा एकशिखत्वादि कर्तव्यं कुलाचाराणामपि धर्मत्वेन स्मरणात्

'येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यति ॥'

(मनु० ४।१७८)

शुद्धपक्षस्य पुण्याहे पर्वणि वा यथोक्तमुपसमाधाय जयप्रभृतिभिर्हुत्वायमगात्सविता क्षुरेणोष्णेन वाय उदकेन एहि । आदित्या रुद्रा वसवः सचेतसः सोमस्य राज्ञो वपत प्रचेतस इत्युष्णा अपोऽभिमन्त्रयते ॥ ९ ॥

पुण्याह इत्यादि हुत्वेत्यन्तं व्याख्यातम् । आयमगादित्यादिना उष्णा अपोऽभिमन्त्रयते मन्त्रेण । जगती च्छन्दः । विश्वेदेवा देवता । ब्रह्मण

आर्षमुपनयनसमाप्तिं यावत् । अयं सविता क्षुरेणोष्णेन चोदकेन सहागात् आगतः । अतो हे वायो त्वमप्याभ्यां सह एहि आगच्छ । हे आदित्याः रुद्राः वसवः सचेतस एकचित्ताः सन्तो यूयमप्यस्य सोमस्येव राज्ञो माणवकस्य वपत मुण्डयतैनमित्यर्थः 'सोमो वा ओषधीनां राजा' इति श्रुतेः राजानमिवैनं गैरवभाजनं मन्यमाना मुण्डयतेति यावत् ॥ ९ ॥

'उष्णाश्च शीताश्च समेत्य सर्वा बृहस्पतिः सविता सत्यधर्मा । तदनुमन्यताम् ॥' आर्द्रदानवः स्थ जीवदानवः स्थोन्दतीरिहैनमवताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इत्यभ्युन्देत् ॥ १० ॥

उष्णाश्चेत्यादिना वर्चसे इत्यन्तेनाभ्युन्देत् 'उन्दी क्लेदने' माणवकस्य शिरः अभिमन्त्रिताभिरद्भिः प्रक्षालयेदित्यर्थः ॥

हे आपः इहैव स्थाने एनं माणवकमवत रक्षत उष्णाश्च शीताश्च सर्वाः समेत्य संभूय । तच्चावनं बृहस्पतिः सविता चानुमन्यताम

भ्युपगच्छतु । कीदृशः । सत्यधर्मा सत्यमेव ह्यस्य धर्मः, सत्यसंकल्पो ह्यत एवायम्। हे आपः आर्द्रदानवः आर्द्रभावस्य दात्र्यः स्थ भवथ। ददाति इति दानुः, औणादिको दानुशब्दः। एवं जीवदानवो जीवदात्र्यः स्थ भवथ। उन्दतीः क्लेदयन्त्यः । आप उन्दन्तु जीवसे जीवनाय दीर्घायुत्वाय च आयुषे त्वपत्यो-रिति सलोपः । वर्चसे ब्रह्मवर्चसाय रूपवि-शेषाय ॥ १० ॥

दक्षिणे केशान्त ओषधे त्रायस्वेति दर्भमन्तर्धाय स्वधित इति क्षुरेणाभिनि-धाय येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपते-दमद्यायुष्माञ्जरदष्टिर्यथासदयमसौ ॥ येन धाता बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत्। तेनास्यायुषे वप सौश्लोक्याय स्वस्तये ॥ येन पूषा प्रजापतेरग्नेः सूर्यस्य चायुषेऽ-वपत्। तेनास्यायुषे वप सौश्लोक्याय स्व-

स्तये ॥ येन भूयश्च रात्री ज्योक्पश्या च सूर्यम् । तेनास्यायुषे वप सौश्लोक्याय स्वस्तय इति प्रदक्षिणं प्रतिदिशं प्रतिमन्त्रं दर्भक्षुरकर्म ॥ ११ ॥

शिरसो दक्षिणे भागे ओषधे त्रायस्वैनमिति मन्त्रेण दर्भमन्तर्धाय स्वधिते मैनं हिंसीरित्यनेन क्षुरेणाभिनिधायावष्टभ्य सदर्भान् केशान् येनावपदित्यादिभिश्चतसृभिरनुष्टुब्भिः दक्षिणभागादारभ्य प्रदक्षिणं यथा भवति, तथा प्रतिदिशं प्रतिमन्त्रं दर्भक्षुरकर्म कर्तव्यमृत्विजा आद्यया दक्षिणे भागे, द्वितीयया पश्चिमे भागे, तृतीययोत्तरस्मिन्, चतुर्थ्या त्वग्रे ॥

हे ओषधे एनं माणवकं त्रायस्व गोपाय । हे स्वधिते क्षुर एनं माणवकं मा हिंसीः । येनावपद्येन क्षुरेण सविता सोमस्य राज्ञो वरुणस्यावपदुप्तवान् शिरः, तेन हे ब्रह्माण अद्यास्मिन्नहनि वपत मुण्डयत इदं बालकस्यास्य शिरः । कीदृशः सविता । विद्वान् जानन् । तथा वपत यथायं बाल आयुष्मान् दीर्घा-

युर्जरामश्नुते व्याप्नोति जरदष्टिश्चासौ भवति। असाविति नामविशेषो लक्ष्यते । येन धाता, येन क्षुरेण प्रजापतिर्बृहस्पतेरग्नेरिन्द्रस्य च शिर उप्तवान् दीर्घायुत्वाय, तेनैवास्य क्षुरेण बालस्य शिरो वप दीर्घायुत्वाय च सुश्लोकत्वाय कीर्तये तथा स्वस्तयेऽविनाशाय । येन पूषेति अनन्तरव्याख्यया गतार्थः। येन भूयश्च रात्री ज्योक्पश्या च सूर्यं, येन क्षुरेण रात्रिः सूर्यमवपत् भूयः पुनःपुनः । ज्योक् चिरकालं, पश्यतीति पश्या ज्योक्पश्या बहुदर्शना रात्रिः। तेनेत्यादि समानम् ॥ ११ ॥

यत्क्षुरेण वर्तयता सुपेशसा वप्तर्वपसि केशान् । शुन्धि शिरो मास्यायुः प्रमोषीरिति लोहायसं क्षुरं केशवापाय प्रयच्छति ॥ १२ ॥

यत्क्षुरेणेत्यादियजुषा नापिताय क्षुरं ददाति लोहायसमिति शस्त्रान्तरजातिविशेषस्य संज्ञा नापितप्रसिद्धा । अन्ये तु क्षुरग्रहणेनैव लोहत्वस्य सिद्धत्वात् स्तुत्यर्थं लोहग्रहण-

मित्याहुः । यत्क्षुरेण येन क्षुरेण अतितैक्ष्ण्या-दिगुणभाजा प्रशस्ततमेनेत्यर्थः यदिति लुप्त-तृतीयैकवचनान्तम् , हे वप्तः मुण्डयितः नापित येन क्षुरेण केशान्वपसि सुपेशसा सुरूपेण, तेन वर्तयता परिवर्तमानेन अस्य आयुर्मा प्रमोषीः मैनं वधीरित्यर्थः; किं तर्हि, शुन्धि शिरोऽस्य, शोधय शिरोऽस्य ॥ १२ ॥

मा ते केशाननुगात्तेज एतत्तथा धाता ददातु ते । तुभ्यमिन्द्रो बृहस्पतिः सविता वर्च आदधुरिति प्रपततोऽनुमन्त्रयते १३

अनया पुरस्ताद्बृहत्या केशान् पततोऽनु-मन्त्रयते । तव एतत्प्रसिद्धं रूपादिकं तेजः के-शाननु केशानां पश्चात् मा गात् । तथा धाता प्रजापतिस्ते तुभ्यं तेजो ददातु । तथा तुभ्य-मिन्द्रो बृहस्पतिः सविता वर्चो रूपविशेषा-दिकं आदधुः ददतु ॥ १३ ॥

सुहृत्परिग्राह्यानुप्यमानान्हरितगोमये समवचिनोति ॥ १४ ॥

सुहृदेव पतन्तः केशा ग्राह्या इति नियमः ।

तानुप्यमानान् मुण्ड्यमानान् पततः हरितगोमये समवचिनोति सम्यगवचिनोति प्रतीच्छति हरितगोमये संमिश्रीकृत्य पिण्डीकरोतीति क्वचिदाचारः ॥ १४ ॥

उप्त्वाय राज्ञो वरुणस्य केशान्सोमो धाता सविता विष्णुरग्निः । तेभ्यो निधानं बहुधान्वविन्दन्नन्तरा द्यावापृथिवी अवस्युरिति प्रागुदीचीं ह्रियमाणाननुमन्त्रयते ॥ १५ ॥

अनया वैश्वदेव्या त्रिष्टुभा मित्रेण प्रागुदीचीं दिशं नीयमानान् केशाननुमन्त्रयते कर्ता । उप्त्वाय उप्त्वा मुण्डयित्वा वरुणस्य राज्ञः सम्बन्धिनः केशांस्तेभ्यस्तदर्थं यन्निधानं स्थानं, तद्बहुधा अन्वविन्दन् ज्ञातवन्तः । कुत्र । द्यावापृथिव्योरन्तराले मध्ये । के ते । सोमश्चन्द्रो, धाता प्रजापतिः, सविता आदित्यः, विष्णुरग्निः । अवस्युरिति प्रत्येकमभिसम्बध्यते । अवनमवः रक्षणम् । अवनमिच्छति

'सुप आत्मनः क्यच्' 'क्याच्छन्दसि' इति उप्रत्ययः अवनकाम इत्यर्थः ॥ १५ ॥

अरिक्ते पर्याश्लेषयत इति श्रुतिः ॥१६॥

अरिक्ते दूर्वालतावनस्पतिप्रभृतौ शीतप्रदेशे समाश्लेषयते केशान्मित्रमिति श्रुत्या प्रतिपादितं श्रुतिमूलमेतत्कर्मेति प्रदर्शितं 'यत्र बाणा निष्पतन्ति कुमारा विशिखा इव ।' इत्यादिना ॥ १६ ॥

कर्त्रे वरं ददाति ॥ १७ ॥

ऋत्विजे वरं दक्षिणां यथाशक्ति ददाति यजमानः । चतुर्वर्षा गौर्दक्षिणात्रेत्याहुः ॥१७॥

पक्ष्मगुणं तिलपेशलं केशवापाय प्रयच्छति ॥ १८ ॥

सूक्ष्मैरूर्णागुणैर्वेष्टितं तिलपात्रं नापिताय ददाति ॥ १८ ॥

सर्पिष्मदन्नं ब्राह्मणान्भोजयेत् ॥१९॥

गतार्थम् । चूडाकरणेऽङ्गनिर्देशात्प्रधानानभिधानात्प्रधानमाज्येनाग्नेयया वैश्वदेव्या वा

कर्तव्यमित्याहुः। यद्वोपसमाधायेत्यनेनाज्यभागान्तरमुक्तं तदेव प्रधानम्। येषां त्वग्निसंस्कारमात्रमुपसमाधानं, तेषां पूर्वं प्रधानम् ॥१९॥

इति चूडाकरणविवृतिः समाप्ता ॥

समाप्ता च चत्वारिंशी काण्डिका ॥ ४० ॥